आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ९७

श्रीमज्जैमिनिप्रणीते मीमांसादर्शने

तृतीयाध्यायषष्ठपादमारभ्य तदध्यायान्तस्तत्परिशि-
ष्टरूपया श्रीमन्मुरारिमिश्रप्रणीताङ्कत्वनिरुक्त्या
सनाथीकृतो द्वितीयभागस्योत्तरार्ध-
रूपस्तृतीयो भागः ।

श्रीकुमारिलभट्टविरचिततन्त्रवार्तिकाख्यव्याख्यासहितशाबरभाष्यसमेतः ।

स चायं भागः पुण्यपत्तनीयमीमांसाविद्यालयाध्यापकपदाधिष्ठितैः
'मीमांसाविद्वान्' पदभाग्भिर्गुरुवर्यवैद्यनाथशास्त्रिचरणान्ते-
वासिभिस्तीर्थहल्लीग्रामाभिजनसुब्बाशास्त्रिभिः संशोधित-
ष्टिप्पण्यादिना समलंकृतश्च ।

स च

बी. ए. इत्युपपदधारिभिः
विनायक गणेश आपटे
इत्येतैः

पुण्याख्यपत्तने
श्रीमन्महादेव चिमणाजी आपटे
इत्यभिधेयमहाभागप्रतिष्ठापिते
आनन्दाश्रममुद्रणालये
आयसाक्षरैर्मुद्रयित्वा
प्रकाशितम् ।

शालिवाहनशकाब्दाः १८५३
खिस्ताब्दाः १९३१

मूल्यं सपादरूप्यकद्वयम् (२।४) ।

निवेदनम् ।

अहो नु खलु भोः ! सुचिरनिचितसुयशःपुञ्जधवलितदिगन्तरास्तत्तच्छास्त्राध्ययनाध्यापननचटुलतरमतयो जैमिनिमुनिशबरस्वामिकुमारिलभट्टेतत्रिवाणीसंगमसमुद्भूतमीमांसासहस्रपत्रामोदाघ्राणैकरसिकाः पण्डितप्रकाण्डाः, पुण्यकर्माणः सुधर्माण आनन्दाश्रमसंस्कृतग्रन्थावलीग्राहकमहाभागाश्च पश्यन्तु भवन्तः संप्राप्तमिदं द्वितीयं सुदिनम् । यदद्य प्रतिष्ठापक 'कै० महादेव चिमणाजी आपटे महाभागपरिष्कृतपूर्वसंप्रदायसिद्धग्रन्थमुद्रणनिर्बन्धवशवर्तिन्या मुद्रणद्वारा प्राचीनसंस्कृतशास्त्रीयग्रन्थोद्धारिण्याऽऽनन्दाश्रमसंस्थया पूर्वमीमांसाशास्त्रे तन्त्रवार्तिकसंवलितशाबरभाष्यसमेतजैमिनीयसूत्राणां द्वितीयाध्यायगतद्वितीयपादमारभ्य तृतीयाध्यायान्तो द्वितीयो भागः खण्डद्वयात्मकः स्वकीये मुद्रणालये मुद्रयित्वा प्रथमभाग इव सर्वात्मना स्वतन्त्रताभाक् प्रकाश्यत इति ।

तस्यैतस्यापि मुद्रणार्थमेतत्संस्थास्थपुस्तकजिघृक्षुमाननीयपण्डितप्रवरकृतसंसूचनग्रन्थमहत्तोपयुक्तताद्यवलोकनतत्तादृशमन्मनीषेत्येतत्त्रितयानुग्रहादियं संस्था स्वाधिकारेणैव प्रावर्तिष्ट । अत एवायमपि भागोऽप्रतिबन्धमानन्दाश्रमसंस्कृतग्रन्थावल्यां प्रवेशं लब्धवान् । यो यो ग्रन्थः स्वल्पो वा महान्वाऽऽनन्दाश्रमसंस्कृतग्रन्थावलीं प्रवेष्टुमीहते स स सर्वात्मनैतत्संस्थासत्तामुररीकृत्यैव प्रविशति । इतरथा मुद्रणयन्त्राधिरोहणमप्यस्य सुदुर्लभं भवति तत्र का वार्ता ग्रन्थावलीप्रवेशस्य । किं च ग्रन्थावल्यन्तरजिगमिषवोऽपि ग्रन्थाः परकीयसत्तां वहन्तो नार्हेयुरेतत्संस्थां प्रवेष्टुम् । तदेवं स्थितमेतत्—यदानन्दाश्रमसंस्कृतग्रन्थावलीप्रविष्टोऽयं नोत्सहते लेशतोऽप्यन्यसत्तां परिग्रहीतुमिति ।

तदेवमानन्दाश्रमसंस्थयोपक्रम्यमाणैतद्द्वितीयभागमुद्रणावसरे श्रीयुतमीमांसाविद्यालयकार्यधूर्वहाग्रेसरैर्मीमांसाविद्यालयाध्यापकपदाधिष्ठितमीमांसाविद्वानीतिपदालङ्कृततीर्थहळ्ळीसुब्बाशास्त्रिद्वारा कृतसंस्करणस्य टिप्पणीपाठान्तरादिभिः परिष्कृतस्यैतद्भागस्य तथा प्रेक्षावतां महोपकारकस्याप्यद्ययावत्क्वाप्यमुद्रितस्य तृतीयाध्यायार्थभूतशेषत्वनिर्वचनरूपस्य श्रीमुरारिमिश्रविरचिताङ्गत्वनिरुक्त्याख्यस्य च ग्रन्थस्य मुद्रणे उपयोगार्थं प्रदानेनातुलं साहायकमाचरितमिति सानन्दमभिनन्दये तेषां परोपकारशालित्वम् । मीमांसापण्डितैः सुब्बाशास्त्रिभिः काशी इत्युपाह्वव्याकरणरत्नमहादेवशास्त्रिभिश्चोपर्युक्तग्रन्थद्वयस्य संस्करणं तथा सामीचीन्येन संपादितं यथाऽस्माकमिवान्येषामपि विदुषां मनः संतोषमावहेत् ।

तदिदं पुस्तकद्वयमादाय संमुद्र्य श्रीमत्सच्चिदानन्दचरणयोः प्रकाशितोऽयं पूर्वमीमांसादर्शने खण्डद्वयात्मको द्वितीयो भागः । तत्राऽऽदौ प्रतिपुटं जैमिनिमुनिप्रणीतं सूत्रं

तदधोभागे तदूद्व्याख्यानभूतं शाबरभाष्यं, तदधोभागे च तावतः शाबरभाष्यस्य विवरणभूतं तन्त्रवार्तिकं निवेशितम् । अङ्गत्वनिरुक्तिग्रन्थस्तु तृतीयाध्यायार्थोत्यन्तोपकारकतयैतद्भागान्ते तृतीयाध्यायादनन्तरं संगृहीतः । ततः सूत्राणां तन्त्रवार्तिकश्लोकानां चाकारादिवर्णानुक्रमं संगृह्य प्रारम्भे निवेदनादनन्तरं मत्कृतो जैमिनीयसूत्राणां पाठभेदविचारः पृथगेव संनिवेशितोऽस्ति स वाचकैरवश्यं प्रेक्षणीयः ।

एवं पुस्तकमारचय्य यस्य संस्थाधीशितुः श्रीमतः सच्चिदानन्दस्य कृपाकटाक्षवशादेतन्मुद्रणं मद्धस्तादनन्तरायं समजनि तत्सत्तां वहदिदं द्वितीयभागरूपं पुस्तकं तस्यैव चरणयोः कमलमिव द्वितीयं समर्पयति प्रकाशकः—

पुण्यपत्तने
फाल्गुनशुक्लप्रतिपदि
सौम्यवासरे शके १८९२

आपटेकुलोद्भवो गणेशात्मजो
विनायकरायः ।
(आनन्दाश्रमम्यानेजिंगट्रस्टी) ।

जैमिनीयसूत्राणां पाठभेदविचारः ।

मीमांसान्यायसूत्राणां पाठभेदः प्रदर्श्यते ।
यथामति विचारेण बहुग्रन्थावलोकतः ॥ १ ॥

अस्ति हि तेषु तेषु ऋषिप्रणीतेषु दार्शनिकेषु सूत्रेषु पाठभेदो नाम महान्प्रबन्धो विद्वद्गोष्ठीविषयः । नायमपूर्वतया कैश्चिदधुनातनैरेव विद्वद्भिः परिकल्प्यतेऽपि तु बहोः कालादयमविच्छिन्नपरम्परया संप्रवर्तितोऽध्येत्रध्यापकप्रवरैः । इदं हि तत्र निदानं समामनन्ति आचार्याः—भिद्यन्ते हीमानि सारवन्त्यल्पाक्षराणि सूत्राणि, तत्र तत्र—

'पाठतोऽप्यर्थतो वाऽपि शब्दतश्च क्वचित्क्वचित् ।
प्रतिभा च पुनस्तत्र कालतो विदुषां मता' ॥

तदिदं शब्दानामर्थवैलक्षण्यं ऋषिवर्यैः सूचितमाचार्यवर्या विशदीकृत्य शिष्यबुद्धौ प्रवेशयन्तीति सुप्रथितमेतदाचार्यकल्पानां सांप्रतिकानामपि विदुषां संसदि ।

तत्र चाखिलदर्शनमूर्धन्यभूतानि भगवतो जैमिनेः किल परःसहस्राणि प्रमेयपराणि वाक्यसूत्राणि, येषु हि परःसहस्रा युक्तयो न्यायापरनामधेया लौकिकवैदिकव्यवहारोपयोगिन्यः प्रपञ्चिताः । यत्सूत्राध्ययनाध्यापने न्यायापरनामधेययुक्तीनां विशदीकरणे च ब्रह्मप्रजापतीन्द्राग्निवसिष्ठप्रमुखा महान्तो भगवन्तः, शबरस्वामि—कुमारिलभट्ट—पार्थसारथिमिश्र—खण्डदेवप्रभृतयः संप्रतिपन्नपाण्डित्याः परिनिष्ठितमतयो व्यापृतमनस्का दरीदृश्यन्ते त एव महात्मानो नवनवोन्मेषशालिन्याऽप्रतिमया मनीषया व्याचख्युस्तानीमानि बह्वर्थानि मीमांसान्यायसूत्राणि । सैवार्थप्रदर्शनप्रणालिका सोमनाथरामकृष्ण—वासुदेवाध्वरि—भट्टशंकर गागाभट्ट—नीलकण्ठप्रभृतिभिरनवरतपरिश्रमेण परिपालिता । एवमेवास्माभिरिदानींतनैरपि यथामत्यास्वादितदर्शनरसास्वादैः सा प्रणालिका परिपालयितव्येत्ययं प्रयत्नः । वेदव्यापारपराण्येव हीमानि सूत्राणि सूक्ष्मेक्षिकया विचारयितव्यानीति सांप्रतम् । आहुश्चात्र कण्ठतो भट्टपादाः—' मीमांसा तु लोकादेव प्रत्यक्षानुमानादिभिरविच्छिन्नसंप्रदायपण्डितव्यवहारैः प्रवृत्ता, न हि कश्चिदपि प्रथममेतावन्तं युक्तिकलापमुपसंहर्तुं क्षमः ' इति ।

त्रिविधामत्र पाठभेदमर्यादां प्रदर्शयन्ति ग्रन्थकृतः ।

(१) प्रथमतो भाष्यकारास्तावच्चेच्छब्दविशिष्टानि सूत्राणि चेदन्तान्येवाभ्युपगच्छन्ति, यथा—

लोकवदिति चेत् १-२—२०, न पूर्वत्वात् १—२—२१, व्यर्थे स्तुतिरन्याय्येति चेत् १—२—२८, अर्थस्तु विधिशेषत्वाद्यथा लोके १—२—२९, कारणं स्यादिति चेत् १—४—१७, आनर्थक्यादकारणं कर्तुर्हि कारणानि गुणार्थो हि विधीयते

१–४–१८, एतादृशि चेदन्तानि सूत्राणि आभासमूत्राणीति भाष्यकृतां व्यवहारः। एवं सर्वत्र चेच्छब्दविशिष्टेषु सूत्रेषु ।

(२) इतरे तु वासुदेवाध्वरिप्रभृतयो यत्र भाष्यकृद्भिः चेदन्तसूत्रविभजनमकारि तत्राविभक्तमेव सूत्रं पठन्ति–**व्यर्थे स्तुतिरन्याय्येति चेदर्थस्तु विधिशेषत्वाद्यथा लोके** । १–२–२९, **कारणं स्यादिनिचेदानर्थक्यादकारणं कर्तुर्हि कारणानि गुणार्थो हि विधीयते** । १–४–१८, इत्यादि बहुषु स्थलेषु–क्वचिदक्षरतः, क्वचिच्छब्दतश्च पाठभेदो दृश्यते, परं विशेषतः स नार्थभेदाय प्रभवतीति वक्तुं युक्तम् । पार्थसारथि–खण्डदेव–माधवप्रभृतयस्तु भाष्यकारीयमेव पन्थानमनुसरन्ति । क्वचित्क्वचिदक्षरशब्दभेदं पठन्ति ।

अन्यच्च, अर्थसौकर्यार्थमपि पाठभेदशैलीं भाष्यकृतो बभाषिरे यथा—**तदर्थशास्त्रात् । वाक्यनियमात् । बुद्धशास्त्रात् । अविद्यमानवचनात् । अचेतनेऽर्थबन्धनात् । अर्थविप्रतिषेधात् । स्वाध्यायवदवचनात् । अविज्ञेयात् । अनित्यसंयोगान्मन्त्रानर्थक्यम्** । इति नव सूत्राणि भाष्यकृत्पाठे । पार्थसारथिमाधवप्रभृतयस्तु भाष्यकृतामेव पाठमनुसरन्ति । **कौस्तुभवृत्तिकृतौ** तु–‘ **तदर्थशास्त्राद्वाक्यनियमाद्बुद्धशास्त्रादविद्यमानवचनादचेतनेऽर्थबन्धनादर्थविप्रतिषेधात्स्वाध्यायवदवचनादविज्ञेयादनित्यसंयोगान्मन्त्रानर्थक्यम्** । इत्यविभक्तमेव सूत्रं पठतः । समर्थयतश्च स्वपाठम् । **कौस्तुभे**—‘ मन्त्रानर्थक्यमित्यन्तस्यैकसूत्रत्वेऽपि व्याख्यासौकर्यार्थं खण्डशः प्रत्येकं पञ्चम्यन्तसूत्रावयवोपन्यासः ’ इति, **वृत्तिकृच्च** —‘ भाष्ये तदर्थशास्त्रात् ’ इति ।

वस्तुतस्तु–ऐकसूत्र्ये समास एवाऽऽवश्यकः । पञ्चम्यन्तसूत्रोल्लेखस्य भाष्यकारेण स्वीकृतत्वात्कथं नु नाम खण्डशः सूत्राणि न प्रविभक्तानीति न विद्मः । नाप्यन्यैरपि—ऐकसूत्र्यवादिभिः समासघटितः सूत्रपाठोऽङ्गीकृतस्तत्**सिद्धिवत्** **१––४—२३** । अतोऽत्र न कश्चिदपि भाष्यकृदितरयोः सूत्रपाठे विशेष इति प्रतीमः ।

अन्यच्च–यत्र तु अर्थतः पाठभेदो भाष्यकृतामभिप्रेतस्तत्र त एव विशेषं कण्ठरवेण प्रदर्शयन्ति, यथा—एकादशाध्याये प्रथमचरणे पञ्चदशसूत्रभाष्ये—‘ **ऐकशब्द्यादिति चेत्** ’ इत्यत्र ये तु ‘ **ऐककर्म्यात्** ’ इति सूत्रं पठन्ति तेषामयमर्थ इति चेत्पश्यसि इत्यादि । भूयान्ह्यत्रार्थतः पाठभेदीयविषयः, अधिकरणात्मकोऽपि च वार्तिककारैर्विवृतोऽस्ति । स तत एवानुसंधेयो भविष्यति । एवं चात्र भाष्यकृतः सरणिर्यथा सूत्राधिकरणार्थो विद्वद्बुद्धौ सौलभ्येन प्रविष्टो भवेत्तथा तद्ग्रन्थप्रणयनशैल्यालक्ष्यते । न तत्र सूत्रविभागरूपगौरवचिन्तां चिन्तयन्तीति । भूयःसु सूत्रेषु चाल्पीयानेव भेद

एतद्वृत्तौ दृश्यते। यथा-' दर्शनाद्विनियोगः स्यात् ' इति भाष्ये। ' दर्शनाद्विनियोगस्य' इति वृत्तौ। प्राय इमे वृत्तिकारा. खण्डदेवकृतभाट्टकौस्तुभगृहीतपाठैर्विसंवदन्ते यथा खण्डदेवः—' तदशक्तिश्च तदनुरूपत्वात् ' १-३-२७ कौस्तुभे। वृत्तिकृत्—तदशक्तिश्चानुरूपत्वात् १—३—२५।

(३) भगवन्तो भट्टपादा वार्तिककाराः स्वग्रन्थे जैमिनीयसूत्राणां तत्र तत्र अर्थत एव पाठभेदमुरीकुर्वन्ति न प्रायः शब्दतोऽक्षरतश्च, नापि केवलं पाठभेदं लिपिमात्रतः प्रदर्श्य विरमन्ति, अपि तु तत्र तत्र स्वाभिप्रायम्, औदासीन्यं, अर्थविशेषं वाऽऽविष्कुर्वन्ति। यथा-द्वितीयाध्याये चतुर्थपादे तन्त्रवार्तिके 'अद्विर्वचनं वा श्रुतिसंयोगाविशेषात् १-४-१६ इत्यत्र " अत्रान्तरे भाष्यकारस्य सूत्रं प्रभ्रष्टम् ' वाक्यासमवायात् ' इति। तदेवं व्याख्येयम्-नैकस्मिन्पुरुषे शाखान्तरवाक्यं समवैति ' इति। इदं च सूत्रं वार्तिके, कौस्तुभे, वृत्तौ च दृश्यमानमपि पार्थसारथिमिश्रमाधवप्रभृतिभिस्तु न संगृहीतम्। तथाऽन्यत्रापि वार्तिके तृतीये चतुर्थाङ्घ्रौ —' विधिना चैकवाक्यत्वात् '—३-४-९ इत्येतत्सूत्रस्याग्रे ' इतः परं षट्[1] सूत्राणि भाष्यकारेण न लिखितानि। तत्र व्याख्यातारो विवदन्ते- केचिदाहुर्विस्मृतानि। लिखितो ग्रन्थः प्रलीन इत्यपरे। फलगुत्वादुपेक्षितानीत्यन्ये। अनार्षेयत्वादित्यपरे। तथा च ' दिग्विभागश्च तद्वदिति ' निवीताधिकरणातिदेशस्तदानन्तर्यादुपपद्यत इति। वृत्त्यन्तरकारैस्तु सर्वैर्व्याख्यातानि ' इति वार्तिकमारचय्य भट्टपादा अन्यदप्याहुः—' सन्ति च जैमिनेरेवंप्रकाराण्यप्यनत्यन्तसारभूतानि सूत्राणि। व्यवहितातिदेशाश्च ' पानव्यापच्च तद्वत् ' इत्यादिषु आश्रिताः। तस्मात्सूत्रमात्रं व्याख्येयम्। इत्युक्त्वाऽपि भूयांसि हि सूत्राणि टुप्टीकासमये परित्यक्तानीति ज्ञायते। यथा च भगवतः पाणिनेर्महाभाष्यकारैः स्पष्टार्थत्वाद्यथास्थानं कानिचित्सूत्राणि न व्याख्यातानि तथाऽत्रापि ह्यनत्यन्तसारवन्ति सन्तीत्युक्तत्वात्तान्येव परित्यक्तानीति प्रतिभाति, अत्यन्तसारवन्ति हि संगृहीतानि। वार्तिककाराणां समयेऽधिकरणस्थितिरप्येतादृशीति सत्यं यतस्त औपरिष्टिकसूत्रविवेकविप्रतिपत्तौ तत्र कैश्चित्त्रीण्यधिकरणानि कल्पितानि अपरैश्चत्वारीति।

तदेतत्सर्वावलोकनेन निश्चितं भवति-नेमानि जैमिनीयसूत्राणि पाणिनीयवच्छब्दप्रधानानि नापि ब्रह्मसूत्रवदक्षरप्रधानानि, अपि तु प्रमेयप्रधानानीति कृत्वैव सर्वे व्याख्यातार इमानि सूत्राणि व्याख्यास्यन्ति। आहुश्चात्र खण्डदेवपादाः—नवमे चतुर्थाङ्घ्रावेक-

---

१ ' उपवीतं लिङ्गदर्शनात्सर्वधर्मः स्यात् ' ' न वा प्रकरणात्तस्य दर्शनम् ' ' विधिर्वा स्यादपूर्वत्वात् ' ' उदकत्वं चापूर्वत्वात् ' ' सतो वा लिङ्गदर्शनम् ' ' विधिस्तु धारणेऽपूर्वत्वात् ' इति षट् सूत्राणि ज्ञेयानि।

विंशतितमे सूत्रे—' अत्र च सूत्रव्याख्यानुरोधेन किंचिद्वैलक्षण्येन भाष्यकारेणैकाधिकरण्यं, वार्तिककारेण चाधिकरणद्वयमाश्रितम् । तत्-प्रमेयमात्रलेखनप्रवृत्तेन मयोपेक्षितम् ' इति ।

अन्यत्रैषु सूत्रेषु, पाणिनीयसूत्रेषु यथा भगवता पतञ्जलिना संहितापक्ष आश्रितस्तथा वर्तेत इत्यप्यनुमिमीमहे । तत्र मानमप्यस्ति तच्च खण्डदेवस्तु स्वकृतकौस्तुभग्रन्थे द्वितीयाध्याये चतुर्थचरणे विंशतितमे ' **समाप्तिवच्च** संप्रेक्षा ' २–४–२० इति सूत्रे—' सूत्रं तु–समाप्तिमती, अकारप्रश्लेषेण, असमाप्तिमती वा या, अपेक्षा-बुद्धिरूपा संप्रेक्षा सा, अभेदसाधिकैवेति व्याख्येयम् ' इति व्याचख्यौ । तेन ज्ञायते संहितापक्षेऽप्येषां सूत्राणां पाठ आसीदिति । प्रायस्तावल्लोके येषा शब्दानामर्थाः प्रसिद्धास्त एव भाष्यकारप्रभृतिभिः मीमांसासूत्रव्याख्यातृभिः स्वीकृताः । अतो लौकिके पदाऽर्थे, एतेषां सर्वेषामाग्रह. । अत एव च सूत्राक्षरार्थो न प्रतिपाद्यते प्रायः । अतो हि अवीवृतत् खण्डदेवः—' प्रमेयमात्रलेखनप्रवृत्तेन मयेति ' । भाष्यकारा अपि शास्त्रारम्भ एवाबीभषन्—" लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि सति संभवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम् । नाध्याहारादिभिरेषा परिकल्पनीयोऽर्थः परिभाषितव्यो वा इतरथा वेदवाक्यानि व्याख्येयानि स्वपदार्थाश्च व्याख्येया इति प्रयत्नगौरवं प्रसज्येत " इति । वार्तिककारा अपि —' वाच्यवाचकसंबन्धो नाऽऽचार्यैरुपदिश्यते, अन्यथानुपपत्त्या हि व्यवहारात्स गम्यते' इत्याहुः । अपि च '**दोषात्त्विष्टिर्लौकिके** ' इत्यत्र तृतीयाध्याये चतुर्थचरणे भूयान् हि लौकिकोऽपि विषयो वार्तिके पदर्शितः किं पुनः सूत्रकारा अपि–' **मुख्यं वा पूर्वचोदनाल्लोकवत्** ' १२ । २ । २३ इति लोकं संगृह्णाति । अत एतत्सिद्धं भवति–पूर्वमीमांसासूत्रेषु न कैरपि व्याकरणसूत्रवल्लाघवगौरवचिन्ता प्रस्तूयते । अपि तु प्रमेयचिन्तैव ' वेदार्थ-ज्ञानरत्ने मे तृष्णाऽतीव विजृम्भते ' इति वार्तिककारैरुक्तत्वात् । तस्मादिमानि भगवतो जैमिनेः सूत्राणि प्रमेयपराणीति सिद्धम् ।

यत्र हि प्रतिभयाऽपि भवति पाठभेदस्तदपि निदर्शयाम.—**उत्पत्तौ वाऽवचनाः स्युरर्थस्यातन्निमित्तत्वात्** १–१–२४ इत्यत्र—**उत्पत्तौ वा रचनाः स्युरर्थस्यातन्निमित्तत्वात्** १–१–२४ इति सुबोधिन्यां तत्र भगवता रामेश्वरसूरिणा सूत्रं पठ्यते—एवं च वृत्तिः—उत्पत्तौ पदार्थज्ञानोत्पत्तौ सत्या वाक्यवाक्यार्थयोः संबन्धा रचनाः पुरुषकल्पिताः स्युः । भाष्ये तु—' वा, अवचनाः—अप्रमाणं स्युः ' इति ॥ १ । १ । २४ ।

प्रख्याभावाच्च योगस्य १ । १ । २२ इति भाष्यपाठः ।

प्रख्याभावाच्च योग्यस्य ,, ,, ,, इति सुबोधिनी ।

प्रेक्षाभावाच्च संयोगस्य ,, ,, ,, इति कुतूहलवृत्तिः।

अत्र श्रीसंज्ञके पुस्तके—अस्तीदं प्रातिभज्ञानमधिकम्। तदेवम्—प्रख्याभावाच्च योग- स्येतीदं सूत्रं नन्वित्यारभ्य नैतदेवमिति पूर्वपक्षप्रतिपादकपदेभ्य उत्तरत्र बोद्धव्यमिति भावः। वायुसंबन्धस्य प्रख्यानाभावात्र वायुकारणकः शब्दस्तस्मान्नित्य इति सूत्रार्थो ध्येयः।

तृतीयेऽध्याये पञ्चमे पादे–'**चमसेषु समाख्यानात्संयोगस्य तन्निमित्तत्वात्**' ३–५–२२ '**उद्गातृचमसमेकः श्रुतिसंयोगात्**' ३–२–२३ इत्यनयोः सूत्रयोर्मध्ये–'**तस्माच्चाब्राह्मणस्य सोमं प्रतिषेधाति**' इति सूत्रं पठन्ति। तत्र वासुदेवाध्वरि.–'केचित्तु नेदं सूत्रं किं तु संग्राहकं भाष्यमेवेति मन्यन्त इत्याह। रामेश्वरसूरिस्तु—इदं सूत्रमिति मन्यमानः सूत्रमेवाविवृतत्। '**प्रकृतौ वाऽद्विरुक्त- त्वात्**'। ३–६–२ इति सूत्रेऽकारश्लेषं बभाषे भाष्यकारः। वासुदेवाध्वरी तु विनाऽकारमविवृतदेतत्सूत्रम्। तथा वार्तिककाराः '**तद्वर्जं तु वचनप्राप्ते**' ३–६–३ इति सूत्रे '**तद्वर्जं तु वचनप्राप्तेः**' इति वा पाठ इत्याहुः। एवं त एव '**तत्रार्थात्प्रतिवचनम्**' ३–९–४२ इति सूत्रे '**वदनमिति** वा पाठः' इत्यपि।

तदत्रास्माभिः सहायत्वेन संगृहीतानि भाष्यपुस्तकानि—

१ प्राच्यविद्यासंशोधनमन्दिरात्तावत्त्रीणि पुस्तकानि। तत्रैकं लिखितं समग्रं ससूत्र- पाठं च। तदेतदतीव शुद्धमित्यपि निवेदयितुमुत्सुकाः स्मः। अवशिष्टे द्वे पुस्तके अपूर्णे।

२ अन्यच्च लिखितमेकमपूर्णमेव मुम्बापुरीस्थ 'एल्फिन्स्टन् कॉलेज्' इत्याख्यकला- शालीयपुस्तकालयात्, संस्कृतमहाविद्याध्यापकराजेन्द्रगडकराख्यैरश्वत्थामाचार्यैर्महता कृपाकटाक्षेण दत्तम्।

३ भाट्टकौस्तुभपुस्तकं त्वेकं कर्नाटकाक्षरैर्लिखितं श्रीगुरुवर्यमीमांसाकण्ठीरव वैद्य- नाथशास्त्रिचरणानाम्।

अन्यच्चैकं भाट्टकौस्तुभाख्यं अध्यायत्रयपर्यन्तं श्रीस्मृतितत्त्वविद्भ्रमरधर्मशास्त्रप्रवीण- धातारकुलमण्डनदातारोख्यगङ्गाधरशास्त्रिपुस्तकालयात्संपादितम्।

मुद्रितानि तु—

४ '**कलकत्ता एशियाटिक्सोसायटी**' इत्यनया संस्थया मुद्रितं भाष्यं सूत्रपाठ- सहितम्।

५ आनन्दाश्रमे मुद्रितं जैमिनीयाधिकरणरत्नमालासंज्ञकम्।

६ कुतूहलवृत्तिर्नाम वाणीविलासमुद्रणालये मुद्रितमपूर्णम्।

७ जैमिनीयसूत्रवृत्त्याख्यम्—काश्यां मुद्रितम् ।

८ तन्त्रवार्तिकं टुप्टीका च काश्यां मुद्रितम् ।

९ शास्त्रदीपिका निर्णयसागरीया ।

१० तत्रत्यैव भाट्टदीपिका च ।

११ भाट्टकौस्तुभः काञ्च्यां काश्यां च मुद्रितः ।

१२ जैमिनीयसूत्रमात्रयुतमेकम् ।

तदेतेषु पाठभेदप्रदर्शनाय लिखितान्येवाङ्गीकृतानि न मुद्रितानि । तत्र तु कानिचनाक्षराणि, केचन शब्दा अपि दोषस्खलनादिप्रधानमनुष्यस्वाभाव्याद्बहुदोषसंभावनायाःसंभावितत्वात् कुतूहलवृत्तौ तु बहवः पाठभेदाः प्रदर्शिता इति ।

तदेतद्यद्यपि लिखितेष्वपि समानं तथाऽपि मुद्रितपुस्तकान्न्यूनदोषो ह्येतेष्वधिगत इति लिखितम् ।

तत्रेमाः संज्ञाः—

श्रीः—प्राच्यविद्यासंशोधनमन्दिरस्थमुत्तम पूर्णम् ।

ग—कुतूहलवृत्तिर्वाणीविलासीया ।

णे—' कलिकातानगरीय एशियाटिक् सोसायटी ' इत्याख्यसंस्थास्थम् ।

शा—मुम्बापुरीस्थम् । एल्फिन्स्टनकॉलेज इत्याख्यशालीयम् ।

य—कौस्तुभाख्यं दातारीयम् ।

न—वार्तिकटुप्टीकापुस्तकम् ।

मः—इतरत् ।

एतेषु श्रीसंज्ञकपुस्तकस्य एव पाठ इतरपाठैर्विचार्यैव मुख्यः स्वीकृतोऽस्ति अन्यस्य तु अधः प्रदर्शनमात्रं क्वचित् क्रियते । तदेतद्विचारितं विचारमेकाः परिनिष्ठितमतयश्चाऽऽकलयन्त्विति सर्वमनवद्यम् । एवं सानन्दमावेदयति विदुषः प्रति प्रकाशक —

आपटेकुलोद्भवो गणेशात्मजो विनायकरायः ।
(आनन्दाश्रमस्यानेजिंगट्रस्टी) ।

मीमांसाविद्यालयविज्ञानम् ।

विदितमेवेदं वः किल भगवतो जैमिनेर्दर्शनं सर्वोत्कर्षेण सर्वदर्शनमूर्धाभिषिक्तमिति जेगीयते विद्वद्वरेण्यैरिति । यस्य च दर्शनस्य अध्ययनाध्यापनकृते भूयसाऽनेहसा प्रयतमानेन मीमांसाविद्यालयपरिषन्मण्डलेन भूयो द्रव्यं व्ययीकृत्य, ये च महीशूरराजकीयपरीक्षासमिति मीमांसाविद्वत्परीक्षाया प्रथमकक्ष्यायामुत्तीर्णा ब्रह्मश्रीसुब्बावधानिनः, ये च पुनर्ब्रह्मश्रीविद्वच्छिरोमणि के० रामशास्त्रि (कृष्णशास्त्र्यपरनामधेय) धर्माधिकारिकृपाकटाक्षेण, श्री ६ महामहोपाध्याय पूज्यपादविरूपाक्षशास्त्रिणामनुग्रहेण च, श्री १०८ श्रीमद्भगवत्पूज्यपादीयाहर्निशनारायणस्मरणकृतसहायेन विद्यालयोद्दिष्टकार्यार्थमात्मसात्कृताः । ताश्च तत आनीय विद्यालये तन्त्रवार्तिकटुप्टीकायुतशाबरभाष्यसहितजैमिनिदर्शनसंशोधनकार्येऽध्यापनकार्ये च ते नियोजिताः । तैश्चैतत्कार्यं सावधानतया कृतम् । एवं संशोधितं पुस्तकमानन्दाश्रमाधिकारि ' विनायक गणेश आपटे ' इत्येतेषां सविधे समर्पितम् । तैश्च तदेतावत्कालेनाऽऽतन्त्रवार्तिकं भागद्वयं आनन्दाश्रमसंस्कृतग्रन्थावल्या प्रकाशितम् । अतस्तेषामुपकारभरमाजीवितं विद्यालयो न विस्मरिष्यति ।

मीमांसाशास्त्रशाबरभाष्यवार्तिकविषये यत्किंचित्पण्डितप्रकाण्डानां वक्तव्यमासीत्तत्सर्वं विस्तरशः श्री ६ पूज्यपादैः प्रथमभागीयोपोद्धाते निरवर्णीति नात्र किमप्युल्लेख्यमवशिष्यते ।

परमन्यदेतदेकमेवास्माकमिदानीं कार्यं नान्तरीयकमिति तत्र उद्युक्ताः स्मः ।

अतिकठिनेऽस्मिन्भाष्यवार्तिकादिग्रन्थसंशोधनकार्ये यैर्द्रव्यद्वारा पुस्तकादिद्वारा च साहाय्यमन्वष्ठायि तेषां नाममात्रमत्रोल्लिख्य वा अनृणाः स्मः ।

१ भाण्डारकर ओरि० रि० इन्स्टिट्यूट इत्याख्यसंस्थाद्वारा डॉ. श्रीपाद कृष्ण बेलवलकर

२ एल्फिन्स्टन कॉलेज इत्याख्यमहाशालाद्वारा ' अश्वत्थामा बाळाचार्य गजेंद्रगडकर '

३ आगतमीमांसाशास्त्रतत्त्वा भिषजामग्रेसराः 'नरहरि शिवराम परांजपे'

४ अग्निहोत्रनिधिव्यवस्थापकमहाशयाः ' दत्तात्रेय वामन पोतदार '

तत्र प्रथमो भागो मीमांसाशास्त्रमर्मजिज्ञासुभिर्नागपुरीयैर्महाभागैः संशोधनद्रव्यं प्रदाय उपकृतो मीमांसाविद्यालयः ।

द्वितीयोऽयं भागस्तु विदर्भदेशालंकरणभूत 'बुलढाणा' नगरवासिभिर्गर्दे—कानिटकर—काळे—देशपांडे—पळसुले इत्येतैर्महाशयैः संशोधनद्रव्यं प्रदाय ऋणीकृतो विद्यालयः ।

तदेतेषां प्रतिकूलसमयेऽपि कृतसहायानां जैमिनीयतन्त्रसंशोधनदत्तदृष्टीनामुपकारकृतिः कथं नु नामास्माकं विस्मरणमियात् ।

एतावता भूयसा द्रव्यव्ययेन भागद्वये तृतीयाध्यायान्तं तन्त्रवार्तिकशाबरभाष्ययुतं च जैमिनेर्दर्शनं समाप्तिमगात् । अवशिष्टे तृतीये भागे टुप्टीकाशाबरभाष्यसहितं जैमिनेर्दर्शनमचिरादेव विद्यालयेन संशोध्याऽऽनन्दाश्रमाधिकारिणां हस्ते समर्प्येत । तैश्चापि सानन्दं तत्प्रकाश्येत । इति सर्वेषामुपकारजातं स्मारं स्मारमस्माद्विज्ञानाद्विरतिमनुभवामः ।

अङ्गत्वनिरुक्तिर्नामापूर्वोऽयं ग्रन्थः श्रीगुरुवर्यवैद्यनाथशास्त्रिभिर्महता प्रयासेन विद्यालयाय संशोध्य समर्पितः सोऽप्यत्र निवेशितः । केयमस्यापूर्वता वर्णनीया——भगवतो जैमिनेः सूत्राणि त्रयः किल विद्वन्मूर्धन्या भगवत्या वाग्देवताया उपासका व्याचिख्यासुः। मुरारिमिश्रः प्रभाकरः कुमारिलभट्टश्च । तत्र भगवन्तौ कुमारिलभट्टप्रभाकरौ विदुषां संसदि सुप्रथितौ स्तः । भगवान् मुरारिस्तु प्रायः स्मृतिपथाद्ग्रन्थतो नामतोऽपि चातीतः । अतोऽस्य ग्रन्थजातं दुर्लभं तथाऽपि गुरुचरणैस्तन्महता परिश्रमेण संपाद्य उत्तमरीत्या संशोध्य विद्यालयकृतेऽर्पितमिति पुनरेकवारं तेषामुपकृतीः प्रशंसन्तो विरमामः । यदुल्लेखं विना चैतद्विज्ञानोल्लेखसमापनं न भवति तच्चैतत्——उप्पिनबेट्टगिरिकुलभूषणैस्तर्कालंकारतर्कविद्वान् , इत्यादिविद्वद्गोष्ठिसादरसमर्पितपदवीभूषितविग्रहैः, धारवाडनगरीयजगद्गुरुशंकराचार्यपाठशालीयप्रधानसंस्कृताध्यापकैर्नागेशशास्त्रिभिः प्रथमद्वितीयभागसंशोधने यदतुलसहायकमाराचितं तदुपकारभराक्रान्ता वयं पुनस्तदग्रे कथमपि उन्नता भवामः । इति शिवम् ।

विद्वद्वशंवदौ

पुण्यपत्तनीयमीमांसाविद्यालयः	वामन रामचंद्र किंजवडेकर. दिनकर बलवंत देवधर. एम्. ए. मीमांसाविद्यालयकार्यकारिसमितिकार्यवाहाध्यक्षौ.

मीमांसादर्शने द्वितीयभागे भाष्यकारीयाधिकरणसूचीपत्रम् ।

अधिकरणनामानि	उपक्रमोपसंहारावेदिनी संख्या

अधिकरणनामानि	उपक्रमोपसंहारावेदिनी संख्या
दिग्विभागाधिकरणम् ।	८९८-८९९
दीक्षादक्षिणयोः प्रधानमात्रार्थताधिकरणम् ।	१०८१-१०८२
दृतिनवनीताज्यस्य श्येनप्रयोगान्तर्वर्त्याज्यकार्यार्थताधिकरणम् ।	११३६-११३७
देवतासंयोगाभावे यागाविधायकत्वाधिकरणम् ।	६०२-६०४
द्रव्यदेवतासंयोगे यागविधायकत्वाधिकरणम् ।	५९७-६०२
द्रव्यविषये, उद्देश्यतावच्छेदकनिरूपणाधिकरणम् ।	६७१-६७२
द्रव्यसंस्काराणामङ्गप्रधानार्थताधिकरणम् ।	११३३
द्वादशद्वंद्वानामाध्वर्यवत्वाधिकरणम् ।	११२२-११२३
द्व्याम्नातानामुभयप्रयोज्यत्वाधिकरणम् ।	११२०
न	
नित्यनैमित्तिकयोरसामानविध्याधिकरणम् ।	१०५६-१०५८
निवीताधिकरणम् ।	८८९-८९५
नैमित्तिकपतिपदादेरुत्कर्षाधिकरणम् ।	८६५-८६७
नैमित्तिकसाद्यस्क्यादेः प्रकृत्यर्थताधिकरणम् ।	१०३२-१०३७
प	
परुषिदिताधिकरणम् ।	८०९-९००
पर्णतादेः प्रकृत्यर्थताधिकरणम्।	१०१९-१०२९
पवमानेष्टिषु पवमानेष्टचनतिदेशाधिकरणम् ।	१०४०-१०४२
पशुधर्माणामुपाकरणादीनामग्नीषोमीयमात्रार्थताधिकरणम् ।	१०४२-१०५२
पशुसोमाधिकरणम् ।	५९९-६२२
पात्नीवतभक्षणे त्रयस्त्रिंशतोऽनुपलक्षणाधिकरणम् ।	७९४-७९७
पात्नीवतभक्षणे त्वष्टुरनुपलक्षणाधिकरणम् ।	७९३-७९४
पात्नीवतभक्षणे पूर्वदेवतानुपलक्षणाधिकरणम् ।	७९१-७९३
पात्नीवताधिकरणम् ।	६०६-६०८
पुनरभ्युन्नीतभक्षणे, इन्द्रस्याप्युपलक्षणाधिकरणम्	७८८-७९१
पेषणस्य चरुविनियोगाधिकरणम् ।	८८१-८८३
पेषणस्य पूषमात्रदेवत्यचरुविनियोगाधिकरणम् ।	८८३-८८९
पेषणाधिकरणम् ।	८८०-८८१
पौर्णमास्यधिकरणम् ।	४७३-४८९
प्रकरणविनियोगाधिकरणम् ।	८१६-८१८

अधिकरणनामानि	उपक्रमोपसंहारावेदिनी संख्या

समाप्तं चाधिकरणवर्णानुक्रमसूचीपत्रम् ।

अथ तृतीयेऽध्याये षष्ठः पादः ॥

[१] सर्वार्थमप्रकरणात् ॥ १ ॥ पू०

अनारभ्य किंचिदुच्यते । यस्य खादिरः स्रुवो भवति स च्छन्दसामेव रसेनावद्यति । सरसा अस्याऽऽहुतयो भवन्ति । यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति, इत्येवमादि । तत्र संदेहः । किं, खादिरता स्रुवे, पालाशता जुह्वां, प्रकृतौ निविशत उत प्रकृतौ विकृतौ चेति । किं प्राप्तम् । सर्वार्थमप्रकरणात् । प्रकृतिविकृत्यर्थमेवंजातीयकम् । कुतः । अप्रकरणात् । न कस्यचित्प्रकरणे श्रूयन्ते । तानि वाक्येन सर्वत्र भवेयुरिति ॥ १ ॥

प्रकृतौ वाऽद्विरुक्तत्वात् ॥ २ ॥ सि०

प्रकृतौ वा निविशेरन्ननारभ्याधीतानि पात्राणि । कुतः । अद्विरुक्तत्वात् । एवमद्विरुक्तं भविष्यतीति । द्विरुक्ततायां को दोषः । असंभव इति ब्रूमः । यद्धि प्रकृतौ विकृतौ च भवति, अस्ति तत्, प्रकृतौ । प्रकृतौ

इदानीमनारभ्याधीतानां प्रकृतिलिङ्गसंयुक्तानां प्रकरणसंबन्धे सति किं प्रकृतिप्रकरणसंबन्ध उत सर्वार्थत्वमिति विचारः । तत्र श्रुत्यादिषट्काभावेऽप्यश्वप्रतिग्रहेष्टिवत्क्रतुसंबन्धो योजयितव्यः । स्रुवाद्युद्देशेन हि, अत्र खादिरत्वादीनि विधीयन्ते । ते च स्रुवादयः ‘ स्रुवेणावद्यति ’ ‘ स्रुवेणाऽऽघारमाघारयति ’ ‘ स्रुवेण पार्वणौ जुहोति ’ ‘ जुह्वा जुहोति ’ इत्यादिभिर्वाक्यैः कर्माङ्गत्वेन प्रतिपादिताः । तत्संबन्धित्वेन चोपनीतमात्राण्येव खादिरत्वादीनि स्रुवसंस्पर्शिना क्रतुकथंभावेन गृह्यन्ते । न हि तेषामन्यत्फलमस्तीति चतुर्थे वक्ष्यामः । न च निर्व्यापाराज्जातिविशेषात्फलोत्पत्तिरवकल्पते । न च व्यापारसंबन्धजननार्था काचित्क्रिया प्रस्तुता दृश्यते । नापि वाक्योपात्ता । न चात्र स्रुवादिर्विधीयते, वाक्यभेदप्रसङ्गात् । अतः स्रुवाद्यनुवादेन विधीयमानानां खादिरत्वादीनां स्रुवादिस्वरूपेऽन्यथाऽप्युपपद्यमानेऽनर्थकं विधानमिति तदुपप्लावितकर्मसंबन्धो विज्ञायते । तत्रानारभ्यवादत्वादेव स्रुवादिसंबन्धस्य प्रकृतिविकृतिष्वविशेषात्सर्वार्थत्वमिति पूर्वः पक्षः ॥ १ ॥

सर्वविधीनामप्राप्तस्वविषयत्वाद्यत्र प्रमाणान्तरेण प्राप्तिर्नास्ति तत्र खादिरत्वाद्युपदेशः । प्रकृतौ च न कुतश्चित्प्राप्तिः । विकृतिष्वङ्गान्तरार्थमवश्यकल्पनीयेनातिदेशेन खादि-

---

१ अन्यथा—क्रत्वन्तरेणेत्यर्थः ।

चेदस्ति, चोदकेनैव विकृतिं प्राप्नोति । ततो नानारभ्यविधिमाकाङ्क्षति । तस्मादनाकाङ्क्षितत्वादनारभ्यविधिर्न तत्र विदधाति । तेन ब्रूमः प्रकृत्यर्थ एवेति ॥ २ ॥

तद्वर्जं तु वचनप्राप्ते ॥ ३ ॥

अप्रकरणात्प्रकृतिविकृत्यर्थमेवेत्युच्यते । यत्तु, चोदकेन प्राप्नोतीति । अनारभ्यविधिना प्राप्ते न चोदकमाकाङ्क्षति । तस्मादनारभ्यविधिवर्जं चोदकः प्रापयिष्यति । अनारभ्यविधिवाक्येन प्रत्यक्षेण स्रुवे खादिरता, चोदकवाक्येनाऽऽनुमानिकेन विकृतौ । आनुमानिकाच्च प्रत्यक्षं बलवत् । तस्मात्प्रकृतिविकृत्यर्थोऽनारभ्यविधिः ॥ ३ ॥

दर्शनादिति चेत् ॥ ४ ॥

यद्यनारभ्यविधिश्चोदकाद्बलीयान्, अनारभ्यविधिना प्राप्ते न चोदकमाकाङ्क्षति । निराकाङ्क्षे वैकृते कर्मणि चोदको नैव प्राप्नोति । तत्र प्रयाजादीनां दर्शनं नैवोपपद्येत । दृश्यन्ते च प्रयाजादयः क्वचित्, प्रयाजे प्रयाजे कृष्णलं जुहोति, इति । अथ चोदको बलीयांस्तत एतद्दर्शनमुपपद्यते । तस्मात्प्रकृत्यर्थोऽनारभ्यविधिः ॥ ४ ॥

न चोदनैकार्थ्यात् ॥ ५ ॥

न प्रकृत्यर्थः सर्वार्थ इति ब्रूमः । अप्रकरणे समाम्नानात् । यदुक्तमनार-

---

रत्वाद्यपि प्राप्नोतीति नोपदेशमपेक्षते । तेन द्विरुक्तस्यासंभव इत्याह । तव द्विरुक्तत्वादद्विरुक्तत्वाद्वा ममेति सूत्रम् ॥ २ ॥

प्राप्तेरिति वा पाठः । सत्यं द्विरुक्तत्वमन्याय्यं, तत्र कुत एतदतिदेशप्राप्तत्वादुपदेशो विहन्यते, न पुनरुपदेशसिद्धमतिदेश एव प्रापयेदिति । युक्तं च पदार्थविप्रकर्षादतिदेशो न स्यात् । संनिकर्षात्तु पूर्वतरप्रवृत्तोपदेशाश्रयणम् । अथोच्येत, सामान्यविषयत्वादुपदेशो दुर्बल इति । तदतिदेशोऽपि सर्वाङ्गविषयत्वादविशिष्टम् । तस्मात्स र्वार्थोऽनारम्यवाद इति ॥ ३ ॥

स्थितायां प्रतिज्ञायां चोदयति । यद्यतिदेशादुपदेशो बलवानेवं सति तेनैवोपदेशेनावरुद्धत्वादतिदेशो नैव स्यात् । कुतः । शक्नोति हि प्रकृतिविकृतिसाधारणं खादिरत्वं प्राकृतोपकारसाधने दृष्टशक्तित्वाद्विकृतिं निराकाङ्क्षीकर्तुम् । ततश्च प्रयाजादिदर्शनं विरुध्यते । तस्मादतिदेशविनिर्मुक्तायां प्रकृतावेव निवेशो युक्त इति ॥ ४ ॥

नैतावता शक्यं सर्वार्थत्वं व्यावर्तयितुम् । न ह्येकस्मिन्नंशेऽतिदेशो बाधितः सर्वत्रैव बाधितो भवति । तद्यथा शरैः कुशेषु निवर्तितेष्वपि न प्रयाजादयो निवर्त्यन्ते ।

भ्यविधिना निराकाङ्क्षस्य न चोदक इति । तन्नोपपद्यते । न ह्यनारभ्य-विधिश्चोदनां निराकाङ्क्षी करोति । प्राप्ते हि चोदकेन स्रुवे खादिरताऽनारभ्यविधिना शक्या विधातुम् । असति चोदकेऽनारभ्यविधिरपि नास्ति । न चानारभ्यविधिः स्रुवं प्रापयति, तस्य च खादिरताम् । कुतः । चोदनैकार्थ्यात् । एकार्था हि चोदना, यस्य खादिरः स्रुवो भवति, इति । न चात्र स्रुवः खादिरता चोभयं विधीयते । स्रुवस्य सतः खादिरतामेष शब्द आह । स च चोदकेन प्राप्तः । तस्मादस्ति चोदकः । स ह्यनारभ्यविधिवाक्यस्य प्रत्यक्षत्वात्तं वर्जयित्वाऽन्यं प्रापयति । तस्मात्प्रकृतिविकृत्यर्थोऽनारभ्यविधिः ॥ ५ ॥

उत्पत्तिरिति चेत् ॥ ६ ॥

इति चेत्पश्यसि, उत्पत्तिरेषां प्रकृतिविधिभिस्तुल्या, प्रकृतावङ्गानि संक्षेपेण विस्तरेण चोद्यन्ते[1] । पञ्च प्रयाजान्यजति इति संक्षेपेण । समिधो यजति इत्येवमादिना विस्तरेण । इहापि यस्य खादिरः स्रुवो भवति, इत्येवमादिर्विस्तरः, यस्यैवंरूपाः[2] स्रुच इति संक्षेपः । एवं-रूपः प्रकृतौ विधिर्दृष्टः, अयमप्येवंरूपः । तस्मात्प्राकृत इति सामान्यतो दृष्टानुमानम् । तस्मात्प्रकृत्यर्थोऽनारभ्याविधिरिति ॥ ६ ॥

न तुल्यत्वात् ॥ ७ ॥

नैतदेवम् । न ह्येवं जातीयकं सामान्यतो दृष्टं साधकं भवति ।

समानविषयमात्रे हि बाधो विज्ञायते । तेन खादिरत्वादिप्राप्त्यंशमात्रादतिदेशो निव-र्तते । न च खादिरत्वमक्रियात्मकत्वाच्छक्नोति विकृतिं निराकाङ्क्षीकर्तुम् । युगपच्च प्रकृतिविकृत्योः प्रवर्तमानमशक्यं क्लृप्तोपकारत्वेन निरूपयितुम् । साकाङ्क्षं तु तत्, स्रुवप्राप्त्यभावात् । न चातिदेशाभ्यनुज्ञामन्तरेण स्रुवप्राप्तिः संभवति । न चैत-द्वाक्यं स्रुवस्यापि विधायकम् । प्रधानक्रियानुपादाने सति विशिष्टविधानेऽनुपपद्यमाने वाक्यभेदप्रसङ्गात् । तस्मादनारभ्यवादविधिप्रापिते स्रुवस्य खादिरत्वे तद्वर्जमतिदेशः कल्पयितव्यः ॥ ५ ॥

अत्र तार्किकः कश्चिदाह प्रकृत्यर्थोऽनारभ्यविधिः संक्षेपविस्ताराभ्यां विधीयमानत्वा-त्प्रयाजादिवदिति ॥ ६ ॥

न तावदीदृशेऽर्थेऽनुमानस्य गतिरित्युक्तम्[3] । अपि चानुमानमप्येतन्न भवति ।

---

[1] चोद्यन्त इति पा० । [2] यस्यैवंरूप स्रुव इति पा० । [3] ईदृशेऽर्थे—शब्दैकसमधिगम्येऽर्थे [illegible] । [4] उक्तमिति—तर्कपादे प्रत्यक्षसूत्रे श्लोकवार्तिके । ' तस्माददृष्टपूर्वत्वात्केनचिद्वस्तुना सह । धर्मस्य नानुमेयत्वमसाधारणवस्तुवत् ॥ ९९ ॥ इत्यादिनोक्तमित्यर्थः ।

केवलमत्र प्राकृतविधिसारूप्यं, न तु प्रकृतावेकत्ववतीति प्रमाणमस्ति । अपि च विकृतावपि संक्षेपविस्तराभ्यामङ्गानि विधीयन्ते । तिस्र आहुतीर्जुहोति, इति संक्षेपः । आमनमस्यामनस्य देवा इति विस्तरः । अतो वैकृतैरप्यनारभ्यविधयस्तुल्याः । तस्मादसमहेतुः प्रकृतिनिवेशस्य ॥ ७ ॥

चोदनार्थकार्त्स्न्यात्तु मुख्यविप्रतिषेधात्प्रकृत्यर्थः ॥ ८ ॥

तुशब्दः पक्षं व्यावर्तयति । न सर्वार्थोऽनारभ्यविधिः । प्रकृत्यर्थः स इति ब्रूमः । कुतः । चोदनार्थकार्त्स्न्यात् । कृत्स्नं चोदकः प्रापयति, नानारभ्यविधिना वैकृतमपूर्वं निराकाङ्क्षम् । पात्राणां हि तद्वाक्येन,

---

अनैकान्तिकत्वात् । विकृतावपि संक्षेपविस्ताराभ्यां विधिरुपलभ्यते । तत्रैतत्स्यात् । एकेन विहितत्वात्संक्षेपविस्तारयोरन्यतरो नैव विधायक इति । तदपि प्रकृतौ तुल्यमिति हेतोरसिद्धता । तेनावश्यं विध्यनुवादनिरपेक्षं संक्षेपविस्ताराभिधानमात्रं हेतुर्वक्तव्यः । स चानैकान्तिक इत्युक्तम् । एवं वा । स्वगोत्रेण सूत्रद्वयं गमयितव्यम् । इति चेत्—तत्सर्वार्थत्वं पश्यसि, तदयुक्तम् । यत्र हि पात्राणां विनियोगोत्पत्तिस्तत्र तदङ्गं जातिर्विधातुं शक्यते । न च विकृतावुत्पत्तिः । अतः पात्रशून्यायां तस्यामशक्या जातिर्विधातुम् । प्राप्तिवैषम्यात् । यदि हि प्रकृतिविकृत्योस्तुल्यवत्पात्राणि प्राप्नुयुस्ततः सर्वावस्थोद्देशेन जातिविधानमवकल्पेत । न त्वेवम् । तस्मात्प्रकृत्यर्थतैव युक्तेति । तत्रोत्तरं ' न तुल्यत्वात् ' इति । सर्वथाऽनारभ्यवादः प्राप्तिमपेक्षते । तत्र या चोपदेशेन प्राप्तिर्या चातिदेशेन प्राप्तिः सा सर्वाऽपि प्राप्तित्वेन तुल्या । यद्यप्युपदेशातिदेशयोः संनिकर्षविप्रकर्षौ विद्येते तथाऽपि तौ स्वविषय एव बलाबलं कुरुतो नानारभ्यवादेन सह । अनारभ्यवादो हि पात्रद्वारेण क्रतुगामित्वाद्विप्रकृष्टतरः । तस्मात्सर्वार्थः । तद्वर्जं चातिदेशः ॥ ७ ॥

' प्रकृतौ वा द्विरुक्तत्वात् ' इत्येतदेव न्याय्यम् । यत्तु तद्वर्जं यापयिष्यतीति । तदयुक्तम् । कुतः ।

वर्तेत यदि भेदेन प्रकृत्यङ्गेषु चोदकः ।
तत एवं भवेदेषु युगपत्तु प्रवर्तते ॥

पदार्थातिदेशपक्षे शास्त्रातिदेशपक्षे वा तद्भेदात्कदाचिद्भेदो भवेत् । यागगतस्तु व्यापारोऽतिदिश्यत इति दशमे वक्ष्यामः । स च निरवयवत्वाद्युगपदतिदिश्यते । अनेन चाऽऽत्मसिद्ध्यर्थं युगपदेव प्रयाजाद्यपूर्वाणि गृह्यन्ते । तैश्च प्रयाजादयः । प्रयाजादिभिरपि स्वशास्त्राणि । तेन प्रकृतिवदित्येवंरूपस्यातिदेशस्यैकत्वा-

न चाकाङ्क्षाभावात् । यागाश्चोदनालिङ्गसंयोगात्प्रकृतिमपेक्षन्ते, तथा सर्वे-ऽप्याकाङ्क्षावन्तो भवन्ति । प्राकृताश्च ताञ्छक्नुवन्ति निराकाङ्क्षीकर्तुं, नानारभ्यविधयः । तस्मादवश्यं चोदक उत्पादयितव्यः । स चेदुत्पाद्यते, बाधितोऽनारभ्यविधिना । न चासौ प्रकरणादीनामभावात्स्व-वर्तमानोऽपि वैकृतेन यागेन संबध्येत । तस्माद्वैकृतेन कर्मणा नाना-रभ्यविधिः संबध्यते । न तस्य वैकृतस्य मुख्यस्यानारभ्यविधिर्वाक्य-शेषः । प्रकृतौ चेति विप्रतिषेधे, चोदकसामर्थ्यात्प्राकृते वाक्यशेषे प्राप्तेऽनारभ्यविधिर्न भविष्यति । तस्मादनारभ्यविधिः प्रकृत्यर्थः ॥ ८ ॥

[२] प्रकरणविशेषात्तु विकृतौ विरोधि स्यात् ॥ ९ ॥ सि०

अनारभ्य किंचित्, सामिधेनीनां परिमाणमाम्नातं, सप्तदश सा-मिधेनीरनुब्रूयात्, इति । तत्र संदेहः । किमेतत्प्रकृतावुत विकृताविति ।

त्सर्वाङ्गेष्वविशिष्टस्य सर्वत्र प्रवृत्तिरप्रवृत्तिर्वा, नैकदेशेषु । शरैरपि कुशाः प्राप्ता एव बाध्यन्त इत्युक्तं बलाबलाधिकरणे । तद्यदि तावदनारभ्यवादानुरोधेन खादिरत्वादिवि-षयेऽतिदेशः परित्यज्यते तत एवाङ्गान्तरेष्वपीति सर्वनिवृत्तिप्रसङ्गः । तत्र चोक्तम् । अथ केषांचित्प्राकृतानामनुरोधेन तद्विषयोऽतिदेशः प्रमाणं क्रियते, ततः खादिरत्वादि-प्राप्तिरप्यविशिष्टेति स्फुटं द्विरुक्तत्वं प्राप्नोति । यागगतव्यापारापेक्षित्वाच्च स्वप्रकरणा-म्नानमप्यतिक्रम्य विकृतयः प्राकृतं तावद्गृह्णन्तीति सर्वत्र स्थापयिष्यामः । तेनाप्य-नारम्यवादादतिदेशप्राप्तेः प्राथम्यम् । अवश्यं च प्रकृतिषु स्रुवादिप्राप्तिरपेक्षितव्या । यावता च यत्र न स्रुवादयः प्राप्नुवन्ति तावता खादिरत्वादयोऽपीति नोपदेशविषयत्वं घटते । न चैषां क्रतुसंबन्धो विस्पष्टः । सोऽप्यन्यथाऽनुपपत्त्या स्रुवादिद्वारेण कल्पयि-तव्यः । सर्वार्थत्ववादी च प्रकृतिसंबन्धं तावदभ्युपगच्छति । तेन च परिहृत आनर्थक्ये विकृतिसंबन्धो निष्प्रमाणकः । प्रमाणवत्तरो ह्यतिदेशेन क्रतुसंबन्धः । येषां तु क्रतुसंबन्ध एव प्रत्यक्षस्तेऽनारम्यवादा अपि सर्वार्था एव । यथा 'एष वै सप्तदशः प्रजापतिर्यज्ञ-मन्वायत्तः' इत्येवमादयः । तस्मात्खादिरत्वादि प्रकृत्यर्थमिति सिद्धम् ॥ ८ ॥

(इति—पर्णतादेः प्रकृत्यर्थताधिकरणम् ॥ १ ॥)

अपवादाधिकरणमेतत् । तत्र पूर्वाधिकरणेनैव सामिधेनीसाप्तदश्यानारभ्यवादस्य प्रकृ-

---

१ (अ० ३ पा० ३ अ० ७) २ उक्तमिति—'न चोदनैकार्थ्यात्' इति सूत्रे 'न च खादिर-त्वमक्रियात्मकत्वाच्छक्नोति विकृतिं निराकाङ्क्षीकर्तुम्' इत्यादिनेत्यर्थः ।

किं प्राप्तम् । पूर्वेण न्यायेन प्रकृताविति प्राप्तम् । प्रकृतौ च पाञ्चदश्यमाम्नातं, तेन विकल्प इति । एवं प्राप्ते ब्रूमः । विकृतावेवंजातीयको विधिः स्यात् । कस्मात् । प्रकृतेः पाञ्चदश्येन निराकाङ्क्षत्वात् । ननु विकल्पो भविष्यतीत्युक्तम् । प्रकरणविशेषात्पाञ्चदश्येन न विकल्पः । विषमशासनात् । विकृतौ त्वानुमानिकं पाञ्चदश्यं प्राप्तिकाऽनारभ्यविधिवाक्येन प्रत्यक्षेण साप्तदश्यं निवेक्ष्यते । आहुरुक्तं चैतत्प्रयोगवचनमुपसंहरिष्यतीति । तस्मादेवंजातीयकं विकृत्यर्थम् ॥ ९ ॥

त्यर्थत्वे, प्रकरणाधीतेन पाञ्चदश्येन सह विकल्प इति विशेषाशङ्कां निवर्तयति । कथं पुनः प्राकरणिकेन विशेषविधिना सहातुल्यबलस्य विकल्पोऽभिधीयते । आह ।

तत्र नाम विशेषेण सामान्यस्य निराक्रिया ।
प्रत्यक्षो यत्र संबन्धो विशेषेण प्रतीयते ॥

तुल्यप्रमाणको हि विशेषो बाधको भवति न दुर्बलप्रमाणकः । न च क्रतुप्रयोगादन्यत्र सामिधेन्यो विद्यन्ते । तस्मात्क्रतुप्रयोगप्राप्तिस्तुल्या । ततश्च किं प्रकरणमधिकं करिष्यति । द्वयोस्तुल्यबलयोः प्रमाणयोर्विरोधे सति बलवत्तरेण निर्णयः कर्तव्यः । न च प्रकरणं वाक्याद्बलवत्तरम् । अतो यावत्प्रकरणव्यापारो नैव भवति तावद्वाक्यद्वयेन तुल्यबलेन विकल्पोऽवधार्यते । तेन न्यूनबलं यद्यपि प्रकरणसहस्रमपि च सहायी भवति तथाऽपि न तदनुरोधः कर्तव्यः । तस्मात्प्रकृत्यर्थं साप्तदश्यमिति प्राप्ते ब्रूमः ।

तुल्यो यद्यपि संबन्धः सामिधेनीः प्रतीष्यते ।
तथाऽपि क्रतुसंबन्धवैषम्यान्न विकल्पते ॥

सामिधेनीस्वरूपप्रयुक्तत्वेऽनर्थिका संख्येत्यवश्यं यागापूर्वसाधनत्वकारितः संबन्धोऽभ्युपगन्तव्यः । न च यागापूर्वसाधनत्वं प्रकरणादृते लक्षयितुं शक्यते इति नवमे[2] वक्ष्यामः । तेन प्रकरणानुग्रहविशेषात्पाञ्चदश्यमपूर्वसंबन्धप्रमाणप्रत्यासत्तेर्बलीयः । विधिरपि हि पूर्वं प्रयोजनवति पुरुषं नियुङ्क्ते । साप्तदश्याच्च पाञ्चदश्यं शीघ्रतरं प्रयोजनवदवधार्येत इति विधिकालवैषम्यादतुल्यबलत्वम् । अपि च, क्रतुमविगुणं कर्तुं पुरुषः प्रवर्तते न सामिधेनीः । क्रत्वङ्गत्वे च साप्तदश्यस्य न किंचिच्छ्रुत्यादि प्रमाणमुपलभामहे, यथा पाञ्चदश्यस्य प्रकरणम् । तस्मादेतत्पाञ्चदश्यं सामिधेनीनां दर्शपूर्णमासयोश्च वाक्यप्रकरणाभ्यामवधार्यते । साप्तदश्यं तु केवलं

---

१ एवंजातीयकं विरोधि स्यादिति पा० । २ नवम इति—नवमाध्यायाद्याधिकरण ऊहोपोद्घातविचारावसर इति शेषः ।

सामिधेन्यर्थमेव । तस्येदानीमानर्थक्यपरिहाराय खादिरत्वादिवत्क्रतुसंबन्धः कल्प्यते, यदि त्वसौ प्रतीच्छेत् । न त्वसौ संख्यान्तरावरुद्धः सम्प्रतीच्छति । तत्र सामिधेनीनामुभयथाऽप्यवैगुण्यं भवति । क्रतोः पुनः पाञ्चदश्येन । ततश्च कांस्यभोजिवदमुख्येऽप्यविरोधः स्यात्किमङ्ग पुनर्यत्राङ्गगुणविरोध एव स्पष्टः । तस्मात्क्रत्ववष्टम्भदर्पितेन पाञ्चदश्येनोत्कालितं साप्तदश्यम् । क्लिष्टेन यावदतिदेशेन पाञ्चदश्यं (नैव) विकृतीः प्राप्नोति तावदौपदेशिकेन साप्तदश्येन प्रथमतरावरुद्धत्वात्ताभ्यो निराकृतं केवलप्रकृतिविषयत्वेनैवावधार्यत इति व्यवस्थायामुक्तायामुच्यते—

न साप्तदश्यं बलवद्विकृतिष्वौपदेशिकम् ।
अनारभ्यविधेस्तद्धि सामिधेन्यङ्गतां गतम् ॥
विकृतीनां तु नास्त्येवं प्रमाणं तत्परिग्रहे ।
अतिदेशेन हि प्राप्तिः पाञ्चदश्यस्य तास्वपि ॥
यथा प्रकरणप्राप्तं प्रकृतौ बलवत्तरम् ।
तथाऽतिदेशविज्ञातं क्रत्वङ्गं विकृतिष्वपि ॥

न च सामिधेनीष्वनतिदिष्टासु तद्द्वारेण साप्तदश्यं विकृतीरनुप्रवेष्टुं शक्नोति । यदा तु सामिधेन्योऽतिदेशेन प्राप्स्यन्ते तदा पाञ्चदश्यमपि क्लृप्तोपकारसंबन्धं ताभिरेव सह पूर्वतरमाक्रम्य प्रकृताविव साप्तदश्यबाधकं भविष्यति । तस्माद्यास्वेव पशुमित्रविन्दाध्वरकल्पादौ साप्तदश्यं प्रकरणविहितं तास्वेव तदतिदेशप्राप्तपाञ्चदश्यबाधेन निविशते ।

नानारभ्यविधिप्राप्त्या सर्वास्वेव भविष्यति ।
पश्वादिव्यतिरिक्तासु पाञ्चदश्येन बाधनात् ॥
स्वाङ्गेन पाञ्चदश्येन व्याप्तास्ता ह्यतिदेशतः ।
विहितं सामिधेन्यङ्गं साप्तदश्यं न गृह्णते ॥
एवं च दशमेऽप्येतद्विविक्तं स्थापयिष्यते ।
तेन नैतद्ग्रहीतव्यं सर्वत्र बलवत्तरम् ॥
सूत्रकारोऽपि विकृतौ विरोधीति यदब्रवीत् ।
प्रकृतौ नैतदस्तीति तदेतावद्विवक्षया ॥
सामिधेनीः प्रति प्राप्तिस्तुल्या वाक्येन यद्यपि ।
विशेषः पाञ्चदश्यस्य क्रतौ प्रकरणेन तु ॥

---

१ स्पष्ट इति—तदा 'अङ्गगुणविरोधे च तादर्थ्यात्' (अ० १२ पा० २ अ० ११ सू० २७) इत्यनेनैव निर्णयो भविष्यतीति यावत् । २ (अ० १० पा० ८ अ० ९) इत्यत्रेति शेषः ।

[३] नैमित्तिकं तु प्रकृतौ तद्विकारः संयोग-
विशेषात् ॥ १० ॥ सि०

दर्शपूर्णमासयोराम्नातं, गोदोहनेन पशुकामस्य प्रणयेत्, इति। तथाऽग्नीषोमीये पशौ श्रूयते यूपं प्रकृत्य, बैल्वो ब्रह्मवर्चसकामेन कर्तव्य इति। एवंजातीयकेषु संदेहः। किं प्रकृतौ निवेशो विकृतौ वेति। किं प्राप्तम्। विकृताविति। प्रकृतिरन्येन पात्रेण यूपेन च निराकाङ्क्षा।

अतो यद्यपि दौर्बल्यं वाक्यात्प्रकरणस्य नः।
तथाऽपि विषयान्यत्वात्क्रतौ तद्विनियोजकम् ॥
समानविषयत्वे हि वाक्यात्तद्दुर्बलं मतम्।
क्रतौ त्वप्रतिपक्षत्वान्न तद्वाक्येन बाध्यते ॥
विशेषश्चायमेवास्य यदसाधारणं क्रतोः।
सामिधेनीषु तुल्यत्वे शेषत्वे वाक्यकल्पिते ॥
क्रतुं प्रत्यसमानत्वात्साप्तदश्यस्य बाधकम्।
न श्रुत्याद्युपदेशेन नातिदेशेन तस्य तु ॥
एवं च प्रकृतावेतत्पाञ्चदश्यं प्रतिष्ठितम्।
विकृतौ च न यत्रास्ति साप्तदश्यपुनःश्रुतिः ॥ ९ ॥

(इति–अनारभ्याधीतसाप्तदश्यस्य प्रकृतावनिवेशाधिकरणम् ॥ २ ॥)

यद्वैश्यादिनिमित्तेन साप्तदश्यं विधीयते।
तत्तु स्यात्प्रकृतावेव पाञ्चदश्यस्य बाधकम् ॥
तस्य प्रकरणं तुल्यं प्रकृतौ विनियोजकम्।
निमित्तेन तु संबन्धान्नित्यात्तद्बलवत्तरम् ॥
पाञ्चदश्यमबाधित्वा ह्यात्मानं न लभेत तत्[१]।
रुद्धेषु तेन सर्वेषु प्रयोगेषु श्रुतं हि तत् ॥
साप्तदश्यविधानं तु प्रयोगे वैश्यकर्तृके।
अबाधेनापि तस्याऽऽत्मा पाञ्चदश्येन लभ्यते ॥
प्रयोगाः सन्ति तस्यान्ये विप्रराजन्यकर्तृकाः।
साप्तदश्यमबाधित्वा येष्वात्मा तेन लभ्यते ॥
अतश्च शक्तिवैषम्ये विकल्पो न मतस्तयोः।
समुच्चयोऽपि नैकार्थ्यात्सामिधेनीषु युज्यते ॥

---

१ तदिति—नैमित्तिकं साप्तदश्यमित्यर्थः।

नैकत्रैकेन संख्याताः संख्यायन्ते परेण ताः ।
नित्यस्य बाधशक्तिर्हि नार्थापत्त्याऽवकल्पते ॥
पौर्वापर्ये यथा पूर्वनिविष्टस्यैव बाधनम् ।
काम्यनैमित्तिकाभ्यां हि तथा नित्यस्य बाधनम् ॥
असंजातविरोधं हि नित्यं सर्वं विधीयते ।
नैमित्तिकं तु तद्व्याप्तविषयत्वाद्विरुध्यते ॥
तेनैकविषयत्वेन विरोधस्यैकबाधनम् ।
विरोधायौगपद्यात्तु न विकल्पप्रसञ्जनम् ॥
किं च प्रयोगसामान्ये नित्यं सर्वं विधीयते ।
नैमित्तिकं विशेषे तु तस्मात्तद्बलवत्तरम् ॥
नित्यमङ्गं च दूरस्थप्रधानापूर्वचोदितम् ।
क्रियते तत्प्रमाणं च परं प्रकरणं मतम् ॥
काम्यनैमित्तिकानां तु वाक्योपात्तं प्रयोजनम् ।
अतः शीघ्रं प्रयुक्तत्वान्नित्यात्ते बलवत्तराः ॥
आसन्नपुरुषार्थत्वाद्विप्रकृष्टफलात्तथा ।
बलवच्छीघ्रकारित्वात्काम्यं नैमित्तिकादपि ॥
श्रुत्यैव पुरुषार्थे हि शीघ्रं कर्ता प्रवर्तते ।
नैमित्तिके हि दूरस्थे चिरेणासौ प्रवर्तते ॥
नैमित्तिके श्रुते[1] यच्च काम्यमेव विचारितम्[2] ।
तन्नित्यं प्रति तुल्यत्वादविरोधात्परस्परम् ॥
पूर्वाधिकरणेनैव पूर्वपक्षोऽत्र सूत्रितः ।
नित्यस्यास्ति विशेषो हि काम्यात्प्रकरणे यतः ॥
चमसः खादिरत्वं च क्रत्वर्थं हि विधीयते ।
बैल्वगोदोहनादीनां काम्यत्वात्पुरुषार्थता ॥
बाध्येत फललोभेन नित्यं काम्येन तत्र चेत् ।
पश्यतो मधु दुर्बुद्धेर्विनिपातस्ततो भवेत् ॥

---

१ श्रुत इति—'नैमित्तिकं तु प्रकृतौ' इत्यधिकरणसूत्र इति शेषः । २ विचारितमिति—भाष्यकारैरिति शेषः ।

एवं प्राप्ते ब्रूमः । प्रकृतौ नैमित्तिकं निविशते । निमित्तसंयोगेन विधानात् । खादिरपालाशरौहितका अविशेषेणोक्ताः, चमसश्च । गोदोहनं बैल्वश्च विशेषविहितौ । विशेषविधिना चाविशेषविधिर्बाध्यते । प्रकरणं सामान्यं, निमित्तसंयोगो विशेषः । सामान्येन यत्प्राप्नोति तत्परोक्षं

क्रत्वर्थाङ्गप्रहाणे हि नश्येत्तस्य क्रतोः फलम् ।
गुणाच्च न फलं सिध्येद्विगुणं क्रतुमाश्रितात् ॥
आश्रयस्तादृशो हीष्टो यादृशः प्रकृतः क्रतुः ।
खादिरत्वादिभिर्नित्यैर्व्याप्तश्चासौ प्रतीयते ॥
ततश्चानवरुद्धत्वात्काम्यस्य विकृतिर्गतिः ।
अस्ति स्वार्थे विशेषो हि क्रतोः प्रकरणं प्रति ॥
तेन गृह्णाति हि स्वार्थं न तु काम्यं कथंचन ।
इतिकर्तव्यतार्थित्वात्संयुक्तं हि न गृह्यते ॥
तेन प्रकरणप्राप्तं संयुक्ताद्बलवत्तरम् ।
न हि प्रकरणं तस्य विनियोगक्षमं मतम् ॥
क्रत्वर्थश्चाऽऽश्रयोऽप्यस्य स्वार्थरुद्धो न लभ्यते ।
पूर्वाधिकरणन्यायस्तस्मान्नैमित्तिकेष्वपि ॥

इति प्राप्त उच्यते—

नैमित्तिकं तु प्रकृतौ वर्तते नित्यबाधया ।
हेतवोऽत्र त्रयः पूर्वा व्याख्याता एव संमताः ॥
असंयोगादबाधेन संयोगोऽस्य विशिष्यते ।
पुनः कर्तृविशिष्टस्य प्रयोगस्य परिग्रहात् ॥
साक्षाच्च पुरुषार्थत्वादनन्याश्रयगामिनः ।
एवं सिद्धे बलीयस्त्वे निवेशः प्रकृतौ स्थितः ॥
नन्वतुल्यार्थयोर्बाधः क्रत्वर्थपुरुषार्थयोः ।
न युक्तो न विरोधोऽस्ति भिन्नगोचरयोस्तयोः ॥
अतश्च पुरुषार्थत्वात्पृथक् प्रणयनक्रिया ।
प्राप्नोति चमसेनैव क्रत्वपूर्वस्य साधनात् ॥
न साधयति पश्वादीन् क्रत्वर्थश्चमसो यथा ।
गोदोहनं तथाऽन्यार्थं न क्रत्वर्थस्य साधनम् ॥

लक्षणया । यत्तु विशेषेण, तत्प्रत्यक्षं श्रुत्या । श्रुतिश्च लक्षणाया बलीयसी, प्रत्यक्षं च परोक्षात् । तस्मात्प्रकृतावेव स्यात् ॥ १० ॥

न चोभयार्थता तस्य वाक्यभेदप्रसञ्जनात् ।
विधिर्नास्त्येकवाक्यत्वे फलप्रणयने प्रति ॥
अन्या हि वचनव्यक्तिः फलोद्देशेन तद्विधौ ।
अन्या प्रणयनोद्देशे तस्मान्न द्वयसंभवः ॥
आसन्नासंभवे चेष्टा विप्रकृष्टेन संगतिः ।
युगपत्तेन न स्यातां संभवासंभवावुभौ ॥
अतः [1]कमिपदाक्षेपान्नास्य प्रणयने विधिः ।
अविधानादशेषत्वान्न शेषान्तरबाधनम् ॥
अबाधाच्चमसोऽवश्यं कर्तव्यश्च क्रतुं प्रति ।
न चान्यस्यावकाशोऽस्ति क्रत्वर्थेऽन्येन साधिते ॥
तेन प्रणयनाभ्यासः कार्यः काम्यगुणं प्रति ।
यथेन्द्रवायुदेवत्ये ग्रहे मित्राद्यसंभवात् ।
भिन्नं मित्रादिदेवत्यं ग्रहाभ्यासान्तरं विधेः ।
एवं प्रणयनाभ्यासः पुरुषार्थवशाद्भवेत् ॥
द्वयोरेवमवैगुण्यं क्रतोश्च स्यात्फलस्य च ।
न हि स्वसाधनत्यागादन्यसाधनसाधितैः ॥
कर्मभिः साध्यते स्वार्थश्चोदनाभिरलक्षितः ।
उच्यते, यो गुणः काम्यः क्रत्वर्थेन न गृह्यते ॥
क्रत्वर्थं कर्म गृह्णाति स एव स्वार्थसिद्धये ।
निर्व्यापारो गुणः कामं न साधयति कश्चन ॥
करणत्वं न तस्यास्ति निष्क्रियस्य फलं प्रति ।
तेनावश्यं क्रिया काचित् ग्राह्या या सप्रमाणिका ॥
सा च प्रकरणेनास्मै दत्ता प्रणयनात्मिका ।
तस्यां च चमसः पूर्वप्राप्तोऽन्यो विद्यते गुणः ॥
तदबाधादशक्यश्च विधिर्गोदोहनादिनः ।
गोदोहमाद्यबाधित्वा यथाऽसौ विहितस्तथा ॥

---

१ कमिपदेति—' गोदोहनेन पशुकामस्य ' इत्येवं कमिपदसमभिव्याहारात्फलपदवैयर्थ्यपरिहारार्थं पशूद्देशेनैव गोदोहनविधेयत्वावगतेर्नास्य पुनः प्रणयनोद्देशेन विधिः संभवतीत्याशयः ।

तद्बाधेन नैवेह तस्य कश्चिद्विधिः श्रुतः ।
काम्येन गृह्यमाणा च क्रिया प्रणयनात्मिका ॥
विप्रकृष्टफलं शक्ता स्वगुणं नोपजीवितुम् ।
क्रियया वा गृहीतस्य गुणस्याकरणे गुणः ॥
करणे तस्य दोषः स्यान्निषिद्धस्येव संगतौ ।

भिन्नप्रयोजनोऽपि हि काम्यो गुणोऽवान्तरकार्यैकत्वाद्विरोधिगुणान्तरज्ञानमिथ्यात्वावधारणसमर्थः । तथा हि—

प्रासङ्गिकीं क्रतोः सिद्धिं काम्यो हि कुरुते गुणः ।
गृह्णन्ति न च सिद्धार्थाः क्रतवः स्वगुणं तदा ॥
सर्वस्यैव हि कार्यार्थः स्वगुणग्रहणादरः ।
अन्यार्थगुणसिद्धे तु कार्येऽस्य स्वगुणेन किम् ॥
हविःसंयवनार्थानामपां प्रणयनं हि यत् ।
तद्गृहीत्वा गुणः काम्यः प्रयुङ्क्ते न क्रियान्तरम् ॥
ततश्चास्य प्रयोगस्य नैवाङ्गं चमसो मतः ।
तदग्रहे कुतोऽर्थेन वैगुण्येन क्रियेत सः ॥
तेन प्रणयनाभ्यासः क्रत्वर्थोऽपि न विद्यते ।
निष्फलत्वादतो बाधः प्रयोगात्कर्मणः सकृत् ॥

तथा प्रणयनमपि निर्वर्त्यमानमेव गोदोहनस्याऽऽश्रयत्वं प्रतिपद्यते नान्यथेति पशुकामप्रयोगेऽन्यार्थेन सता गोदोहनेन निर्वर्तितत्वान्न चमसमुपसंगृह्णाति । कार्यार्थं हि सर्वत्र साधनग्रहणं न स्वरूपमात्रसंभावनार्थम् । तत्र यथैव प्रसङ्गलक्षणेऽन्यार्थैरेवाङ्गैरुपक्रियमाणाः पशुपुरोडाशादयो न स्वाङ्गान्युपसंगृह्णन्ति । न तद्धान्या किंचिद्वैगुण्यं भवति । तथाऽत्र चमसहान्या नेति द्रष्टव्यम् । उत्पत्तिप्राप्तमपि विध्यनुपसंगृहीतं नैवाङ्गं भवति । न चानङ्गमगृह्णतो दोषः । सुतरां वा न तद्ग्रहणे वैगुण्यप्रसङ्गः । न च सिद्धस्य प्रधानस्य प्रणयनस्य गुणानुरोधेनाऽऽवृत्तिः । न चैकान्तेन चमसः प्रणयनस्या-

१ प्रसङ्गेति—अन्यत उपकारलाभप्रयुक्ताङ्गाननुष्ठानं प्रसङ्गः । पशुयागार्थमनुष्ठीयमानैः प्रयाजादिभिरङ्गैस्तन्मध्यपातिपशुपुरोडाशादेरुपकारलाभान्न पुनस्तदर्थमनुष्ठानमिति यावत् । २ आदिपदेन ' अग्नीषोमीयस्य पुरोडाशमनु देवसुवां हवींषि निर्वपति ' इति श्रुतिचोदितानां पशुतन्त्रमध्यपातिनामनुनिर्वाप्याणां संग्रहः ।

[४] इष्ट्यर्थमग्न्याधेयं प्रकरणात् ॥ ११ ॥ पू०

सन्ति पवमानेष्टयः, अग्नये पवमानायाष्टाकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचये, इति । तासां प्रकरणे समाम्नातं, ब्राह्मणो वसन्तेऽग्निमादधीत, इति । तत्र संदेहः । किमग्न्याधेयं पवमानेष्ट्यर्थमुत नेति । किं प्राप्तम् । इष्ट्यर्थमिति । कुतः । प्रकरणात् । तासां प्रकरणे श्रूयते । अतस्तदर्थम् ॥ ११ ॥

क्रमम् । न चात्र चमसेन कृते गोदोहनेन पुनः करणमाशङ्क्यते । किं तर्हि । गोदोहनेन कृते चमससंपादनार्था पृथक्करणशङ्का । कथं पुनर्गोदोहनप्राप्तिर्बलीयसी न चमसप्राप्तिरिति । तदुच्यते—

विशेषविहितं ह्येतत्प्राप्ते चानवकाशकम् ।
पुरुषार्थसमीपे च चमसं तेन बाधते ॥

प्रयोगमात्रे हि चमसो, गोदोहनं विशेषे । पूर्वप्राप्तश्चासौ तद्बाधेन लब्धात्मा । नैवं गोदोहनम् । सावकाशश्चासौ नेतरत्, दूरे चासौ पुरुषार्थस्य । गोदोहनं तु संनिकृष्टार्थं, पुरुषार्था च सर्वशास्त्रप्रवृत्तिः । यश्च तादर्थ्यातादर्थ्यकृतो विशेषो नासौ तन्त्रमिति वक्ष्यति 'अर्थस्योविकृतत्वात्' इति । मन्दो ह्येष विशेषः, क्रत्वर्थेनैव क्रत्वर्थो विशेषादिविहितेन बाधितव्यो नान्यार्थेनेति । तेनोभयोः संनिधिवशात्परस्परशक्तिविलोपान्नियमः । प्रणयनस्याप्यन्यत्र प्रयोगे सिद्धात्मकस्य स्वसाधनोपसंहारशक्तिलोपः । गोदोहनस्यापि प्रणयनान्तरकल्पनाशक्तिविघातः । पशुकामप्रयोगव्यतिरिक्तेष्वेव चमसस्य शास्त्रीयत्वम् । तस्मात्तद्विकारो गोदोहनम् । यथा तु विकृतौ चमस एव भविष्यति तथाऽष्टमे वक्ष्यति 'निर्वृत्तिर्वा कर्मभेदात्' इति । तेन प्रकृतावेवैतद्विकारकमिति॥१०॥

(इति—नैमित्तिकसाद्गुण्यादेः प्रकृत्यर्थताधिकरणम् ॥ ३ ॥)

अनारभ्यवादप्रस्तावेनाग्न्याधेयस्य प्रथमं तावदनारभ्यवादत्वमेव प्रतिपाद्यते । प्रकरणेन तावत्पवमानेष्ट्यर्थत्वं प्राप्नोति । श्रुत्या तु शुद्धाग्न्यर्थत्वम् । अतः 'प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत्' इतीष्ट्यर्थाग्निसंस्कारत्वाच्छ्रुतिवाक्यप्रकरणैरविरुद्धैरिष्ट्यर्थाग्न्यर्थत्वमवधार्यते । शुद्धाग्न्यर्थत्वे च निष्प्रयोजनत्वात्तद्द्वारेणैवाग्न्याधानग्रहणसामर्थ्यम् । तस्मादिष्ट्यर्थं सामान्याभिधानम् । अपि च प्रकरणादेव पवमानेष्टिविषयं द्रष्टव्यम ॥ ११ ॥

---

१ (अ० १२ पा० १ अ० १ सू० ४)। २ (अ० ८ पा० १ अ० १४ सू० २४)। ३ (अ० ३ पा० ४ अ० ५ सू० १५)।

न वा तासां तदर्थत्वात् ॥ १२ ॥ सि०

पवमानेष्टयो ह्यग्न्यर्थाः । यद्यग्निरिष्ट्यर्थः स्यात्ततस्तदर्थमग्न्याधेयमिष्टीनामुपकुर्यात् । निष्फलास्त्विष्टयः । तदर्थमग्न्याधेयमपि निष्फलं स्यात् । कथं पुनरग्न्यर्थता पवमानेष्टीनाम् । निष्प्रयोजनत्वादेव, प्रयोजनवत्त्वाच्चाग्नीनाम् । भावयितव्या अपीष्टयो भूतानामग्नीनामर्थेन क्रियेरन् । तस्मादग्न्याधेयं न पवमानेष्ट्यर्थम् ॥ १२ ॥

लिङ्गदर्शनाच्च ॥ १३ ॥

लिङ्गं च दर्शयति, यथाऽग्न्यर्थाः पवमानेष्टय इति । किं लिङ्गम् । जर्यति वा एष आहितः पशुर्यदग्निः, तदेतान्येवाग्न्याधेयस्य हवींषि संवत्सरे निर्वपेत् । तेन वा एष न जीर्यति । तेनैनं पुनर्नवं करोति तत्र सूक्ष्मामिति[1] ॥ १३ ॥

[५] तत्प्रकृत्यर्थं यथाऽन्येऽनारभ्यवादाः ॥ १४ ॥ पू०

तदेतदाधानं किं प्रकृत्यर्थमुत सर्वकर्मार्थमिति संदेहः । किं प्राप्तम् । उच्यते । तत्, प्रकृत्यर्थम् । कथम् । यथाऽन्येऽनारभ्यवादाः प्रकृत्यर्थास्तेनैव हेतुना ॥ १४ ॥

सर्वार्थं वाऽऽधानस्य स्वकालत्वात् ॥ १५ ॥ सि०

सर्वकर्मार्थं वाऽऽधानम् । कोऽर्थः । सर्वकर्मार्थं यदग्निद्रव्यं, तदर्थमाधानं न प्रकृत्यर्थम् । न प्रकृतीः प्रकृत्य श्रूयते । न च श्रुत्याद-

यद्यारादुपकारकमाधानं भवेत्ततः प्रकरणादिष्ट्यर्थमिति गम्येत । वाक्यसंयोगात्तु द्वितीयानिर्दिष्टाग्निसंस्कारार्थमेतत् । एवं च सति यद्यग्नयः पवमानेष्ट्यर्था भवेयुस्ततस्तद्द्वारेणाऽऽधानमपि तदर्थं भवेत् । तास्तु निष्फलत्वादग्न्यर्था इत्युक्तम् । अतश्च 'गुणानां च परार्थत्वात्'[2] इत्यनेनैव परस्परानङ्गत्वम् । न हि द्वितीयाश्रुतिः प्रकरणेन बाध्यते ॥ १२ ॥

'तेनैनं पुनर्नवं करोति' इति चाग्निसंस्कारार्थतां दर्शयति ॥ १३ ॥

(इति—आधानस्य पवमानेष्ट्यनङ्गताधिकरणम् ॥ ४ ॥)

सिद्धेऽनारभ्यवादत्वे खादिरत्वादिवदेव प्रकृत्यर्थत्वमग्निद्वारेण प्रकृत्यनुप्रवेशात् ॥ १४ ॥

सूत्रात्तावदियं बुद्धिर्भवति, यदि प्रकृतिकाल आधानं क्रियेत ततः प्रकृत्यर्थं भवेत् । स्वकाले तु वसन्तादौ क्रियमाणमगृह्यमाणविशेषत्वात्सर्वार्थं विज्ञायते । तथा चानु-

---

१ सूर्क्ष्यमिति पा० । २ (अ० ३ पा० १ अ० १२ सू० २२) ।

योऽस्य सन्ति, येऽङ्गभावमुपपादयन्ति । अन्येष्वनारभ्यवादेष्वन्यतो निर्ज्ञातेऽङ्गभावे ततो विचारः, किं प्रकृतेरङ्गभूतानि विकृतेरिति । तस्मात्तेषु युक्तम् । इह त्वङ्गभावे न कारणमस्ति । तस्मादग्निप्रयुक्तमाधानं न कर्मप्रयुक्तम् । सर्वकर्मार्थास्त्वग्नय इति सर्वार्थमित्युच्यते । अपि चास्य स्वतः कालो विधीयते । स न विधातव्यः । यदा ज्योतिष्टोमस्य प्रयोगस्तदेदं कर्तव्यम् । तदा च वसन्तः । एवं यदा

ष्ठानसाधारण्यमस्यैकादशे वक्ष्यति ' द्रव्यस्या[1]कर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात् ' इति । प्रकृत्यर्थत्वे च दर्शपूर्णमासज्योतिष्टोमार्थमेतद्भवेत् । तत्र च प्रधानवशवर्तित्वाद्वसन्ते पौर्णमास्यमावास्ययोश्च क्रियेत । तथा च सति वसन्ते पौर्णमास्याममावास्यायामादधीतेत्येतानि वचनान्यनर्थकानि भवेयुः । तस्मात्सर्वार्थत्वमिति । न त्वेतद्युक्तम् । न ह्याधानस्य प्रकृत्या विकृत्या वा संबन्धे किंचित्प्रमाणमस्ति । प्रकरणे सति यत्पवमानेष्ट्यर्थं न जातं तद्विनैव श्रुत्यादिषट्केनान्यकर्मार्थं भविष्यतीति कुत एतत् । नन्वेवं सति पूर्वाधिकरणेनैव गतमेतत् । सत्यं गच्छेत्, यदि पवमानेष्टिवद्दर्शपूर्णमासादीन्यपि निष्फलानि भवेयुः । तेषां तु फलवत्त्वात् ' गुणानां च[2] परार्थत्वात् ' इत्येष न्यायो नास्तीति शक्यमग्निद्वारेण कर्माङ्गत्वं कल्पयितुम् । निष्फलस्याऽऽधानस्यावश्यकल्पनीये प्रयोजनेऽग्निद्वारेण खादिरत्वादिवत्कर्मार्थत्वमापद्यते । शक्नुवन्ति हि प्रयोगमध्यस्था वह्नयः कर्माण्युपस्थापयितुम् । यथैव प्रोक्षणादीनां व्रीह्यादिस्वरूपमतिक्रम्य, खादिरत्वादीनां च स्वत्रादिस्वरूपं, कर्मापूर्वप्रयुक्तत्वं कल्पितं तथाऽऽधानस्याप्यग्निस्वरूपातिक्रमेण कल्पयितव्यम् । यदि चाग्निस्वरूपमात्रप्रयुक्तमेवाऽऽधानं भवेत्ततः कर्माण्यनाहितेनाप्यग्निना सिध्येयुः । तैश्च[3] पुरुषस्य सगुणैः कार्यं नाग्निभिः । तेनावश्यंभाविनि कर्मसंबन्धे प्रकृत्यर्थत्वमाद्विरुक्तत्वादुपन्यस्तम् । यत्तु स्वकालत्वं तदुपदेशातिदेशप्राप्तस्य यूपच्छेदनवत्प्रयोगसाधारण्यार्थमिति न सर्वार्थत्वं गमयति । यदपि वसन्तादिग्रहणं तदप्यप्राप्तविषयमर्थवद्भविष्यति । न हि दर्शपूर्णमासार्थस्याऽऽधानस्य वसन्तकालत्वं प्राप्तं, प्रत्यर्धमासं प्रयोगप्रसक्तेः । नाप्यग्निहोत्रेतरदार्विहोमार्थस्य पौर्णमास्यमावास्याकालप्राप्तिः । न च प्रयोगसाधारण्यं स्वकालवचनादृते सिध्यतीति नानर्थकत्वम् । अत एवं व्याचष्टे । न कस्यचित्कर्मणोऽङ्गमाधानं, किं तर्हि, द्वितीयासंयोगादग्न्यर्थमेव । ते तु ' आग्नेयश्च स्वकालत्वात् ' इत्यनेन सर्वार्था भविष्यन्तीति तद्द्वारेण सर्वार्थत्वमि-

---

१ (अ० ११ पा० ३ अ० २ सू० २) । २ (अ० ३ पा० १ अ० १२ सू० २२) । ३ (अ० ३ पा० ७ सू० ३९) ।

दर्शपूर्णमासयोः प्रयोगस्तदा कर्तव्यम् । तदा पौर्णमास्यमावास्या वा । अप्रकृत्यर्थं[1] तु न प्रकृतिप्रयोगे क्रियेत । तत्र कालवचनं युक्तम् । तस्मान्न प्रकृत्यर्थम् ॥ १५ ॥

[६] तासामग्निः प्रकृतितः प्रयाजवत्स्यात्[2] ॥ १६ ॥ पू०

सन्ति पवमानेष्टयः, अग्नये पवमानाय, इत्येवमाद्याः । तत्र संदेहः । किं पवमानेष्टिसंस्कृतेऽग्नौ पवमानेष्टयः कर्तव्या उत नेति । किं प्राप्तम् ।

त्युच्यते । स्वकालत्वादित्यपि स्वातन्त्र्याम्नानादित्यर्थः । यत्त्वितरानारभ्यवादवदिति । तत्राभिधीयते—

सिद्धेऽङ्गत्वे ततस्तेषां किमर्थत्वं विचारितम् ।
न तु कर्माङ्गभावे हि प्रमाणं किंचिदस्ति ते ॥

खादिरत्वादीनि स्रुवादिभिः संयुक्तान्यपि तत्स्वरूपप्रयुक्तत्वं न प्रतिपद्यन्ते । स्रुवादिशब्दानामाकृतिवचनत्वात् । विनाऽपि खादिरत्वादिभिरुपपत्तेश्च । अखादिरोऽपि हि तदाकारयुक्तः स्रुवशब्दवाच्यो भवत्येव । तत्र प्राक्कर्मार्थत्वान्न जातिनियमस्य प्रयोजनमस्तीति युक्तं स्वरूपातिलङ्घनम् । इह त्वाहवनीयादिशब्दानां संस्कारनिमित्तत्वान्नाऽऽधानाद्विना प्रवृत्तिरुपलभ्यत इति शब्दप्रवृत्तिनिमित्तत्वेनैवार्थवत्ता विज्ञायते । यत्तु तेन विनाऽपि कर्माण्यविगुणान्येव भवेयुरिति । नैव तदभावेन तत्कृतं वैगुण्यं भवति । किं तर्हि । आहवनीयाद्यसंभवकृतम् । यदि ह्याधानमकुर्वतस्तावन्मात्रमेव न स्यात्ततो नैव वैगुण्यं भवेत् । तदभावे त्वाहवनीयादयोऽपि न भवन्ति । ते चैकान्तेन कर्मणामङ्गम् । अतस्तत्कृता वैगुण्यप्रसक्तिः । यदि चाग्निमात्रेण कर्माणि संबध्येरंस्ततस्तत्स्वरूपस्यान्तरेणाप्याधानं निष्पत्तेरतत्प्रयुक्तता भवेत् । 'यदाहवनीये जुहोति' इत्येवमादिचोदनार्थः पुनर्न कदाचिदाधानमन्तरेण संभाव्यते । तेन कर्माणि कुर्वता, तदप्यवश्यं कर्तव्यम् । तस्मादग्न्यर्थम् । यत्तु 'द्रव्यस्या[3]कर्मकालनिष्पत्तेः' इति सा कृत्वा चिन्तेति तत्रैव वक्ष्यते । एतेन पवमानेष्टीनामप्यग्न्यर्थत्वं व्याख्यातम् । आशङ्काशेषश्चोत्तरेणाधिकरणेन व्यावर्त्यते ॥ १५ ॥

(इति— आधानस्य प्रकृतिविकृत्यर्थताधिकरणम् ॥ ९ ॥)

'त[4]स्यां तु स्यात्प्रयाजवत्' इत्येतदधिकरणन्यायेन पवमानहविःसंस्कृताग्निसाध्यत्वं तासा[5]मस्ति नास्तीति विचारः । तत्र 'इष्टिषु द[6]र्शपूर्णमासयोः प्रवृत्तिः स्यात्' इत्येवं

---

१ प्रकृत्यर्थं तु प्रकृतिप्रयोगे क्रियेत । तत्रास्य कालवचनं न युक्तमिति पा० । २ स्यादिति क्वचिन्नास्ति । ३ (अ० ११ पा० ३ अ० २ सू० २) । ४ (अ० १० पा० १ अ० ४ सू० ६) । ५ तासां—पवमानेष्टीनामित्यर्थः । ६ (अ० ८ पा० १ अ० ४ सू० ११) ।

तासां खलु पवमानेष्टीनां पवमानेष्टिसंस्कृतोऽग्निः प्रकृतितः स्यात् । कुतः । चोदकसामर्थ्यात्, प्रयाजवत् । यथाऽऽसु प्रयाजा भवन्ति चोदकेन, एवं पवमानेष्टिसंस्कृता अग्नयोऽपि भवेयुः ॥ १६ ॥

न वा तासां तदर्थत्वात् ॥ १७ ॥ सि०

न वा, इष्टिसंस्कारोऽग्नीनां पवमानेष्टिषु स्यात् । कस्मात् । तासां तदर्थत्वात् । ताः पवमानेष्टयोऽग्निसंस्कारार्था इत्युक्तम् । यच्च नामाङ्गभूतं तच्चोदकेन गृह्यते । अग्निप्रयुक्तश्च पवमानेष्टिसंस्कारो न दर्शपूर्णमासप्रयुक्तः । तेन न चोदकेनाऽऽकृष्यते । अपि च पवमानेष्टय इष्टि-

पवमानेष्टीनां दर्शपूर्णमासप्रकृतित्वे सिद्धे यथैव प्रयाजादीन्यतिदिश्यन्ते तथैव पवमानेष्टिसंस्कृताग्निवर्तित्वमपि । ननु चाऽऽहवनीयादयः सर्वकर्मणां प्रत्यक्षश्रुता एवाङ्गत्वं प्रतिपद्यन्त इति न वक्तव्यं प्रकृतित इति । नैष दोषः । यत्रैव प्रत्यक्षश्रुत्या जुहोतिस्तत्र प्रकृतिसमकालमाहवनीयसंबन्धोऽवक्लृप्यते । यत्र पुनर्द्रव्यदेवतासंबन्धाद्यजिमात्रे कल्पिते 'चतुरवत्तं जुहोति' इति प्रकृतितो होमः प्राप्नोति तत्र द्वारस्य प्राकृतत्वादाहवनीयेनापि प्रकृतित एव भवितव्यम् । अतः साधूक्तं प्रकृतित इति । ननु याः संस्कारार्थं क्रियन्ते तासामप्यन्याः प्राप्नुवन्ति, तासामप्यन्या इत्यनवस्था प्राप्नोति । नैष दोषः । सर्वानवस्थानां सामर्थ्येन व्यवस्थानात् । यावत्यो ह्यग्निकालं पौर्णमास्यमावास्यादिकं नातिक्रामन्ति तावत्यः करिष्यन्ते ॥ १६ ॥

यन्नाम प्रयाजादि प्रकृतेरङ्गं भवति तदतिदिश्यते । न तु पवमानेष्टयः कर्माङ्गमित्याधानन्यायेन साधितम् । अतो 'रूपं वाऽशेषभूतत्वात्' इत्याहवनीयादिस्वरूपमतिदिश्यते नेष्टयः । आरम्भणीया त्वङ्गमिति कृत्वाऽधिकरणान्तरमारप्स्यते । तदीयश्चैष न्यायोऽत्रापि भविष्यति । सत्यपि चाङ्गत्वे यावन्न विधीयन्ते तावन्नैवेष्टयः प्रकृतौ दृश्यन्ते । यावच्च किं केन कथंभावैस्तद्भावना न पूर्यते तावद्विधिर्न प्रवर्तते । तेन पवमानेष्टिरहितायां प्रकृतौ ताभिरितिकर्तव्यता गृह्यमाणा तद्व्यतिरिक्तवाक्यविहितैव केवला ग्रहीतुं शक्यते । अन्यथा ह्येकस्मिन्वाक्ये विहितवदपेक्षणमविहितवच्च विधानमिति स्वरूपविप्रतिषेधः स्यात् । तस्माद्यादृगाहवनीयः प्राक्पवमानेष्टिभ्यस्तादृगेव तासां प्राप्त इति निष्पन्नस्याऽऽहवनीयस्य प्रयोजनमपेक्षमाणस्योपदेशेनातिदेशेन वाऽङ्गत्वं

१ (अ० ७ पा० ३ अ० ११ सू० २९)। २ अधिकरणान्तरमिति—दशमाध्यायप्रथमपादे इति शेषः।

संस्कारवर्जितां प्रकृतिमपेक्षन्ते । अविहितत्वात्तस्यामवस्थायां पवमानेष्टीनाम् ॥ १७ ॥

[७] तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् ॥ १८ ॥ पू०

ज्योतिष्टोमे पशुरग्नीषोमीयो, यो दीक्षितो यदग्नीषोमीयं पशुमालभते, इति, तथा सवनीयोऽनुबन्ध्यश्च । सन्ति च पशुधर्मा उपाकरणम्, उपानयनम्, अक्षया बन्धो, यूपे नियोजनं, नयनं, संज्ञपनं, विशसनमित्येवमादयः । ते किं सर्वेषामग्नीषोमीयसवनीयानुबन्ध्यानामुत अग्नीषोमीयस्य सवनीयस्य च, उताग्नीषोमीयस्यैवेति । किं प्राप्तम् । अविशेषात्सर्वपशूनाम् । कथमविशेषः । ज्योतिष्टोमप्रकरणे सर्वे पशवः समा-

शक्यं कल्पयितुम् । एतास्तु तन्निष्पत्त्यर्था एवेति न तत्कृतमुपकारमपेक्षन्ते । न चानपेक्षितमुपदेष्टुमतिदेष्टुं वा शक्यते । तस्मादाधानमात्रसंस्कृतेनाग्निना संबद्धव्या इति सिद्धम् ॥ १७ ॥

(इति–पवमानेष्टिषु पवमानेष्ट्यनतिदेशाधिकरणम् ॥ ६ ॥)

इदानीं स्थानस्य प्रकरणेन सह पूर्वश्च विरोधाविरोधौ चिन्त्येते । ज्योतिष्टोमेऽग्निष्टोमसंस्थे त्रयः पशव आम्नाताः, अग्नीषोमीयः सवनीयोऽनुबन्ध्यश्चेति । ते सर्वे कथंभावैर्धर्मानपेक्षन्ते । तथौपवसथ्येऽहनि, अग्नीषोमप्रणयनोत्तरकालमुपाकरणादयः पशुधर्माः पठ्यन्ते । तेषु चतुर्धा संदेहः । किं त्रयाणामपि पशूनामर्थेनाऽऽम्नायन्तेऽथ सवनीयार्थेनैवाऽथ सवनीयाग्नीषोमीयार्थेनाथ केवलाग्नीषोमीयार्थेनैवेति । किं प्राप्तम् । तत्र ' स्थानाच्च पूर्वस्य ' इत्येवमादिसूत्रसंगत्यर्थमसूत्रं तावत्पूर्वपक्षं करोति सर्वार्था इति । यदि त्वयमेव पक्षः सूत्रेण परिगृह्येत तत उत्तरसूत्राण्यसंगतान्येव भवेयुः । यदा पूर्वसूत्रेणैव सर्वार्थत्वं प्रतिज्ञायते तदा किमनेन ' स्थानाच्च पूर्वस्य ' इति । प्रकरणाविभागादेव हि पूर्वस्यापि सिद्धिः । ' श्वस्त्वेकेषाम् ' इत्यपि प्रकरणाभावकथनेनाप्रतिज्ञातकेवलसवनीयार्थता व्यावर्त्यमाना कथं संबध्येत । एवं तदनुसारित्वादुत्तरसूत्राणामप्यसंगतिः । अथवा सौत्र एव पूर्वपक्षे केवलसवनीयार्थत्वमसूत्रितं द्वितीयं पक्षं कृत्वा 'श्वस्त्वेकेषाम् ' इत्यादि संबन्धनीयम् । तत्तु माष्यकारेण नाऽऽश्रितं, सर्वाद्यः पक्षः सुखमसूत्रः क्रियते ।

१ सर्वेषामिति—यद्यपि भाष्यग्रन्थात्त्रिकोटिकः संशयो भाति तथाऽपि वक्ष्यमाणपूर्वपक्षानुगुण्येन ' स्वनीस्यैव ' इत्येवं द्वितीयपूर्वपक्षकोटिरपि, अनुक्तसमुच्चायकचशब्देन सूचितेति चातुष्कोटिकः संशयोऽधिकरणाङ्गं ज्ञेयः । २ अग्नीषोमप्रणयनेति—शालामुखीयस्याग्नेराग्नीध्रीये धिष्ण्ये नयनमभिप्रणयनम् । तथा प्राग्वंशस्थितस्य सोमस्य हविर्धानमण्डपे नयनं सोमप्रणयनमित्यर्थः । ३ तत्त्विति–अथवेत्यादिनोक्तं केवलसवनीयार्थत्वपूर्वपक्षस्योत्सूत्रत्वाश्रयणेन सूत्रसंगत्युपपादनमित्यर्थः ।

म्नाताः । तत्प्रकरणापन्नत्वात्सर्वे पशुधर्मैः संबध्यन्ते । न चैषां तत्र कश्चिद्विशेषः । एवं प्राप्ते ब्रूमः । सवनीयस्यैते धर्मा भवेयुः । तुल्यः सर्वेषां पशुविधिः स्यात्, यदि प्रकरणे विशेषो न भवेत् । भवति तु प्रकरणे विशेषः । सवनीयानां प्रकरणे पशुधर्माः समाम्नाताः । आग्नेयः पशुरग्निष्टोम आलभ्यः । आग्नेयो ह्यग्निष्टोमः । ऐन्द्राग्नः पशुरुक्थ्य आलभ्यः । ऐन्द्राग्नानि ह्युक्थ्यानि । ऐन्द्रो वृष्णिः षोडशिन्यालभ्यः । ऐन्द्रो वै वृष्णिरैन्द्रः षोडशी । सारस्वती मेष्यतिरात्र आलभ्या । वाग्वै सरस्वती, इति प्रकृत्य पशुधर्मा आम्नाताः । तस्मात्सवनीयस्य प्रकरणाद्भवितुमर्हति ॥ १८ ॥

सौत्रपक्षान्तराले तु तत्संगत्यर्थमसूत्रपक्षाश्रयणं सूत्रकारस्य शून्यहृदयतामापादयति । तस्मादाद्य एव मुक्तकः पक्षः । तस्योपपत्तिः, पशुधर्मा हि ज्योतिष्टोमप्रकरणे केनचिदपि पशुविशेषेणासंयुक्ताः श्रूयन्ते । कथम् ।

एतद्देशे ह्यनुष्ठानं वाक्याद्दैक्षस्य यद्यपि ।
तथाऽप्युत्पत्तिदेशोऽस्य प्रक्रिया क्रयसंनिधौ ॥

दीक्षासु हि सोमक्रयसमीपेऽग्नीषोमीयः समाम्नायते । तस्य च यद्यपि वचनसामर्थ्यात्पशुधर्मसमीपेऽनुष्ठानं भविष्यति । तथाऽपि प्रकरणेन नैव व्यापृतं, सर्वकरणानामुत्पत्तिदेशानतिरेकात् । सवनीयानामपि सुत्याकालमुत्पत्तिवाक्यम् । औपवसथ्ये तु गुणार्थैव श्रुतिः । न च तया प्रकरणं भवति । अनुबन्ध्या तु दूरस्थैव । सोमान्ते क्रियमाणत्वात् । तस्मादवान्तरप्रकरणवाक्यसंयोगाभ्यामप्रतिबद्धेन ज्योतिष्टोमप्रकरणेनाग्नीषोमीयस्य स्थानं विप्रकृष्टार्थं बाधित्वा ज्योतिष्टोमार्थास्तावदेत इत्येतत्कल्प्यते । तस्य च सोमद्रव्यकत्वान्न पशुधर्मैः किंचित्प्रयोजनमिति 'आनर्थक्यात्तदङ्गेषु' इत्येवमङ्गेष्वेवावतरन्तोऽङ्गत्वाविशेषात्रिष्वप्यवतरन्ति । सत्यपि तदङ्गत्वे योग्यत्वाभावान्न दीक्षणीयादिष्ववतरणम् । सत्यपि च योग्यत्वे सामान्यसंबन्धाभावान्न तदनङ्गपशूनाम् । तस्मात्त्रयाणां समानं विधानमिति प्राप्तेऽभिधीयते । स्यादेतदेवं, यदि ज्योतिष्टोमद्वारेण प्रकरणाविशेषः स्यात् । अस्ति तु विशेषः सवनीयानामौपवसथ्येऽहन्युत्पत्तेः । 'आग्नेयमजमग्निष्टोम आलभेत' 'ऐन्द्राग्नमुक्थ्ये द्वितीयम्' इत्यादिना हि पशुधर्मसमीपे सवनीया उत्पादिताः । तस्मात्केवलसवनीयार्था एवेति ॥ १८ ॥

---

१ पशुधर्मा इति पा० । २ वचनेति—'स एष द्विदेवत्यः पशुरौपवसथ्येऽहन्यालब्धव्यः' इति वचनसामर्थ्यादित्यर्थः । ३ (अ० ३ पा० १ अ० ९ सू० १८)

स्थानाच्च पूर्वस्य ॥ १९ ॥

यदुक्तं प्रकरणात्सवनीयार्था इति । एतद्गृह्णीमः । क्रमात्त्वग्नीषोमीयस्य । तस्य हि क्रम औपवसथ्येऽहनि समाम्नातम् । तस्माद्द्वयोरपीति ॥ १९ ॥

श्वस्त्वेकेषां तत्र प्राक्श्रुतिर्गुणार्था ॥ २० ॥ सि०

एकेषां शाखिनां श्वः सवनीयानामाम्नानम् । तदपेक्ष्येयमेषां गुणार्था पुनः श्रुतिः । कः पुनर्गुणो, यदर्थैषा श्रुतिः । उच्यते । पशून्संकीर्त्य, यथा वै मत्स्योऽविदितो जनमवधूनुते, एवमेतेऽप्रज्ञायमाना जनमवन्धुन्वत इत्येषामविज्ञाने दोषमभिधाय, एभिः कथं सवनानि

कथं पुनरिदं श्रुतिलिङ्गाधिकरणविपरीतमभिधीयते । न हि तत्रैवमिष्टं प्रकरणाद्विदेवनादयो राजसूयार्थाः स्थानात्त्वाभिषेचनीयार्था इति । तथा श्रुत्यैन्द्री गार्हपत्यार्था लिङ्गेनेन्द्रार्थेति । युक्तं तत्र प्रकरणाम्नानेन बलीयसा प्रमाणेन निराकाङ्क्षीकृते जघन्यप्रमाणानुत्थानात्समुच्चयानाश्रयणम् । न ह्यत्र पुनः कल्पनया विना शेषस्य न किंचित्सिध्यति । नापि शेषिणामिन्द्राग्न्यादीनाम्, उपायान्तरेणापि स्मृतिसिद्धेः । इह पुनः सत्यपि सवनीयसंबन्धाद्धर्माणां नैराकाङ्क्ष्येऽग्नीषोमीयस्य पशुधर्मैर्विना सिद्ध्यभावात्प्राप्त्यन्तरमवश्यं कल्पनीयमुभयोरविप्रतिपत्तेः । न चैतस्य तदा दर्शपूर्णमासप्रकृतित्वं भवेत् । यो हि प्रकृतिभूतः पशूनां स दर्शपूर्णमासविकारो भवति । इतरे तु प्राणिद्रव्यकत्वसामान्यात्तद्विकाराः । तत्र किं सवनीयार्थास्ततः सारूप्यद्वारप्रभवेनातिदेशेनाग्नीषोमीयो गृह्णात्यथोपदेशगन्धेन केनचिदिति, उपदेशान्तर्गतत्वात्क्रमेण विनियोगो युक्तः । षड्विधोपदेशप्रत्यस्तमये ह्यतिदेशः कल्प्यते । तस्माद्यथैवान्यत्रोपदेशातिदेशाभ्यां प्रकृतिविकृत्यर्थत्वं[4] यागगतस्य व्यापारस्य[5] तथैवेह स्थानप्रकरणाभ्यामुभयार्थत्वम् । अनुबन्ध्यायास्तु सर्वोपदेशाभावादतिदेशेनैव प्राप्तिर्भविष्यति । तस्मादनुपालम्भः सूत्रस्य ॥ १९ ॥

यदुक्तं स्थानादग्नीषोमीयार्था इति । एतद्गृह्णीमः । यत्तु प्रकरणात्सवनीयार्था इति, एतन्न मृष्यामहे । कुतः ।

गुणार्थौपवसथ्येऽह्नि सवनीयपुनःश्रुतिः ।
उत्पत्तिः प्रक्रिया चैषामाश्विनग्रहणोत्तरा ॥

---

१ (अ० ३ पा० ३ अ० ७) । २ सवनीयार्थानिति—धर्मानिति शेषः । ३ सत इति पा० ।
४ यागगतस्येति—यागाङ्गभूतस्येत्यर्थः । ५ व्यापारस्येति—इतिकर्तव्यतासमूहस्येत्यर्थः ।

पशुमन्तीति प्रश्नरूपकेण वपाप्रचारो गुणो विधीयते। तदर्थैषा श्रुतिः। वपाप्रचारेणैकवाक्यत्वात्। किमतो यद्येवम्। न सवनीयानां प्रकरणेन पशुधर्माः, क्रमादग्नीषोमीयार्था एवेति। किं पुनस्तच्छ्रु आम्नानम्। आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाऽऽग्नेयं सवनीयं पशुमुपाकरोति, इति॥ २०॥

तेनोत्कृष्टस्य कालविधिरिति चेत्॥ २१॥

नैतदस्ति क्रमादग्नीषोमीयार्था एवेति। प्रकरणात्सवनीयार्थाः।

'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाऽऽग्नेयं सवनीयं पशुमुपाकरोति' इति हि सवनीयानामुत्पत्तिः श्व इति चौपवसथ्येऽहनि स्थितः सुत्यां ब्रवीति। कः पुनर्गुण इति—स्ववाक्ये संयोगाभावात्पृच्छति। तद्दर्शयति। सर्वान्सवनीयाननुक्रम्य निन्दा श्रूयते 'यथा वै मत्स्य' इति। यथा वै किल मत्स्यो जले विचरन्, अनवधारितगतिः प्रेक्षकजनमवधूनुते किमितो गतः किमगत इति, एवमेवैते पशवः क्व क्रियन्तामित्येवमप्रज्ञायमानाः कर्तृजनमवधुन्वते। तेन पशुकीर्तनं तावदेवमर्थं न विधानार्थमिति गम्यते। साऽपि निन्दा परतः प्रश्नशेषत्वेन नीता। तदेभिः पशुभिः सवनीयसमाख्यातैः कथं सवनानि पशुमन्ति कर्तव्यानीति। सोऽपि प्रतिप्रश्नरूपविध्यन्तरशेषत्वं प्रतिपद्यते 'वपया प्रातःसवने चरन्ति' इति। तस्मादेतद्गुणार्थेयं पुनःश्रुतिः। न च सा प्रकरणबुद्धिं करोतीति। किं पुनस्तच्छ्रु आम्नानमिति—आश्विनग्रहणानन्तर्यगुणार्थत्वात्तदपि नोत्पत्तिसमर्थमिति मन्यते। भाष्यकारेण केवलस्याऽऽग्नेयस्य श्व आम्नानं दर्शितं नेतरेषाम्। तत्र केचिदाहुः। प्रदर्शनार्थत्वादस्याऽऽग्नेयग्रहणमविवक्षितत्वात्सर्वार्थमिति मन्यमानेनेति। वाक्यान्तराण्येवंरूपाणि द्रष्टव्यानीत्यपरे। सर्वथा तु केवलाग्नेयप्रदर्शनमेवोपयुज्यते। यद्यपि हैन्द्राग्नादीनामौपवसथ्य एवोत्पत्तिस्तथाऽपि तेषामनित्योत्तरसंस्थार्थत्वान्नैव शक्तिर्नित्यवदाम्नातान्पशुधर्मान् ग्रहीतुमित्यग्नीषोमीयस्थानमेव बलीयः स्यात्। यस्तु नित्यत्वेन ग्रहणसमर्थस्तस्य प्रकरणाभाव उक्त एव। तस्मान्न सवनीयार्था इति॥ २०॥

इदानीं कतरत्सवनीयानामुत्पत्तिवाक्यमित्येतत्परिज्ञानाधीनाऽधिकरणसिद्धिः। तत्र पूर्वपक्षवाद्याह, इति चेत्—सवनीयप्रकरणाभावं मन्यसे। तदयुक्तम्। कुतः।

---

१ अपर इति—आपस्तम्बानुयायिन इत्यर्थः। आपस्तम्बसूत्रे तावदुक्थ्यसंस्थायां सुत्यादिन एव सर्वेषां क्रतुपशूनामाम्नानात्तन्मूलतया वाक्यान्तरकल्पनावश्यंभावादिति यावत्। २ अनित्योत्तरसंस्थेति—काम्या अत एवानित्यास्तिस्र उक्थ्यषोडश्यतिरात्रसंज्ञकाः संस्था इत्यर्थः।

पूर्वेद्युरेवाऽऽम्नानं विधानार्थम् । आश्विनवाक्यं कालगुणविधानार्थम् । कथम् । तेन वपाप्रचारेणोत्कृष्टस्य काल एष विधीयते । प्रातःसवने वपाप्रचारे चोदिते सति पश्वालम्भोऽपि तत्रैव प्राप्नोति । तत्र कालानियमे प्राप्ते, आश्विनं ग्रहं गृहीत्वा, इति कालमात्रं विधीयते । त्रिवृता यूपं परिवीयोपाकरोतीत्यनुवादः । इतरथा परिव्याणस्य कालो विधीयेत, उपाकरणस्य च । तत्रानेकगुणविधानाद्वाक्यं भिद्येत । तस्मात्सवनीयार्थाः पशुधर्मा इति ॥ २१ ॥

सवनीयान्पुरोत्पाद्य वपामुत्कृष्य वाक्यतः ।
तत्राप्यनियमे प्राप्ते तद्विशेषो विधीयते ॥

'वपया प्रातःसवने प्रचरन्ति' इत्यनेनैव वचनेनोत्कृष्टे प्रधाने प्रधानदेशत्वादङ्गानामुपाकरणादिष्वप्युत्कृष्टेषु कालानियमे प्राप्ते सति, आश्विनग्रहणानन्तर्यं विधीयते । तेन तदेव गुणार्थं श्रवणम् । इतरथा हि वाक्यं भिद्येत, परिव्याणोपाकरणयोः कालविधानाद्द्रव्यदेवतायुक्तस्य च यागस्य विधेः । ननु चातिदेशप्राप्तमेव परिव्याणं तस्मिन्नेव काले यागे विधीयमानेऽनूद्येत । सत्यमतिदेशेन प्राप्तं न तु तदिदानीं क्रियते । यूपसाधारण्येन 'तत्कोलास्तु'[1] इत्येवमग्नीषोमीयकालकृतादेवोपकारासिद्धेः । एवं तर्हि साधारण्यादेव प्राप्तं विद्यमानमनूद्येत । न शक्यं तदनुवदितुमप्रत्यभिज्ञानात् । तत्सामान्यतः प्राप्तमनूद्यते यत्तद्रूप्येण प्राप्तं प्रत्यभिज्ञायते । न च पूर्वेद्युः कृतस्याऽऽश्विनग्रहणोत्तरकालं वर्तमानत्वेनानुवादो भवति । न हि तदाऽसौ परिव्ययति । न च पूर्वकृतस्य पर्यग्निकृतादिशब्दवदीदृशेन शब्देनानुवादः । पूर्वोत्तरकालकर्मावधिद्वयपरिच्छिन्नत्वात् । एवं तर्ह्यस्माद्वाक्यात्प्राप्तमनूद्यतां 'स आश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययति' इति । तदपि नास्ति प्रत्यभिज्ञानाभावादेव । यदेतदप्राकृतं सवनीयपरिव्याणम्, एतस्य शुद्धस्य श्रवणाद्दशनायाश्च प्राकृतपरिव्याणनिबन्धनत्वाद्येन केनचिद्वासःप्रभृतिना करणे सति त्रिवृत्वानुवादो न प्राप्नोति । तत्रानेकार्थविधानाद्वाक्यभेदः । तदा चैवं भाष्यग्रन्थः । इतरथा हि परिव्याणस्य कालो विधीयेत—यत्संबन्धित्वेनोपात्तं त्रिवृद्द्रव्यं कालो विधीयेत । उपाकरणस्य चेति—उपाकरणकालो द्रव्यदेवताविशिष्टं च कर्म विधीयेतेत्यर्थः । तस्मादस्य गुणार्थत्वादस्ति पूर्वेद्युः सवनीयानां प्रकरणमिति ॥ २१ ॥

---

1 (अ० ११ पा० ३ अ० ४ सू० ६)।

नैकदेशत्वात् ॥ २२ ॥

नैतदेवम्, अग्नीषोमीयार्था एवैते क्रमात् । आश्विनकालं त्वा-म्नानं विधानार्थम् । गुणार्थे एतस्मिन्, वाक्यं भिद्येत, न विधानार्थे ।

यदा हि पूर्वेद्युः साङ्गानां सवनीयानामाम्नानं तदा तत्रैव सर्वानुष्ठाने प्राप्ते वचनाद्वपाप्रचारादिमात्रमुत्कृष्येत नोपाकरणादीनि । ‘ तदादि वाऽभिसंबन्धात् ’ इति ये वपाहोमोत्तरकालाः पदार्थास्तत्संनिपातिनो वा तन्मात्रस्योत्कर्षो भवेन्न प्राग्भाविनामुपाकरणादीनाम् । यानि चाज्ञातकालान्यङ्गानि तेषां प्रधानकालत्वं वक्ष्यते । पश्वङ्गानि त्ववधारितपूर्वेद्युःकालत्वान्न प्रधानकालं गच्छन्ति । तस्माद्वपाप्रचारेणानुत्कृष्टस्यानेनैव वाक्येनोत्कर्षः कर्तव्यः । ततश्च गुणवाक्ये सति अनेकार्थविधानाद्वाक्यं भिद्येत । उत्पत्तिवाक्ये न दोषः । तस्मादेतदुत्पत्त्यर्थमिति । न त्विह भाष्यकारेण विधेयानेकार्थत्वं दर्शितम् । एवमेव तु **गुणार्थे एतस्मिन्वाक्यं भिद्येतेत्य**भिहितम् । शक्यस्त्विह पूर्वेद्युः प्राप्तोपाकरणोत्कर्षमात्रविधानाद्वाक्यभेदः परिहर्तुम् । तत्र केचिदेवं समर्थयन्ते । यथा किल ‘ आग्नेय्याऽऽग्नीध्रम् ’ इति ज्योतिष्टोमसंबन्धे तद्विशेषे च विधीयमानेऽनेकार्थत्वमुक्तमेवमिह वपाप्रचारेणानुत्कृष्टस्योपाकरणस्योत्कर्षश्च कर्तव्यः, तद्विशेषश्चेत्यनेकार्थत्वमिति । न त्विदमाग्नेयीवाक्यसदृशम् । तत्र हि संबन्धविशेषपरे विधौ सामान्यसंबन्धप्राप्तिमन्यतोऽपेक्षमाणे कासुचिदाग्नेयीषु तत्सद्भावादितरविषयसामान्यसंबन्धं प्रत्यन्यथानुपपत्तिः क्षीयते । अतस्तु वेदेनानभ्युपेतं तद्विधिं कल्पयतो वाक्यभेदो भवति न त्विह तादृक्प्रतिपक्षोऽस्ति । यतः सामान्येनोत्कर्षप्राप्तिं दृष्ट्वा विशेषपरस्यार्थापत्तिकोपः कल्प्येत । तत्रापि चेत्तदर्थापत्तिबाधिनी प्रतिपक्षभूता सामान्यप्राप्तिर्नाभविष्यन्नाऽऽग्नेयीमात्रप्रमाणं निराकरिष्यत । प्राप्तेऽपि कर्मण्येकपदोपात्तानेकार्थविधिः शोणाद्युदाहरणैस्तत्र तत्र प्रतिपादितः । तेन यद्यपि ‘ आश्विनं ग्रहं गृहीत्वा ’ इत्यनेन द्वयमपि प्रातःसवनमाश्विनग्रहोत्तरकालत्वं च विधीयेत तथाऽपि विधायकस्यैकपदानुसारात् ‘ तस्य तैस्योपादिश्येत ’ इत्येतदापत्तिर्नास्ति किमुतात्रैकविधानेऽर्थादेवेतरसिद्धेः । अत एव भाष्यकारेणानेकविधिदूषणेऽभिहितं न चानेकोऽर्थः परस्परासंबन्धे सति शक्यो विधातुमिति । जानाति ह्यसौ यथा संबद्धानामर्थानामेकस्मिन्विहितेऽन्ये विनैवाऽऽयासेन प्राप्नुवन्ति । तेन यद्येकस्मिन्विहितेऽर्थादर्थसहस्रमपरमापद्यते न कश्चिद्विरोधो विधेरायासो वा दृश्यत इत्याश्रीयते । तस्य त्वन्यथाऽप्युपपद्यमानत्वमेवैको निराकरणोपायः । न चेहास्ति स पक्षो यत्रैष विधिः सुत्याप्रातःसवनसंबन्धवक्तृत्वाऽऽश्विनग्रहणानन्तर्यं विदध्यात् । तस्माददोषः । न चैव

१ (अ० ५ पा० १ अ० १२ सू० २४) । २ (अ० ११ पा० ३ अ० १ सू० १) यत्रोति शेषः । ३ (अ० २ पा० २ अ० ३ सू० ६) ।

न हि वपाप्रचारेणोत्कृष्टस्य कालविधिः संभवति । एकदेशो हि

त्वेष दोषः, यस्यानेकद्रव्यदेवताविशिष्टकर्मविधानम् । अपि च ज्योतिष्टोमसुत्याप्रातःस
वनविशेषकालसंयोगोऽपरः कल्पनीयः । सर्वेषु चोत्कर्षापकर्षेषु सामान्यविशेषरूपोऽने
कविधिदोषोऽस्तीति प्राप्तकर्मगुणविध्यसंभवात्कर्मान्तरविधित्वप्रसङ्गः । तद्यथा ' माहेन्द्र
स्य स्तोत्रं प्रत्यभिषिच्यते ' इत्यत्राभिषेचनीयस्य माध्यंदिनसवनमाहेन्द्रस्तोत्रकालविधेर
नेकार्थत्वमेवं ' तिष्ठन्तं पशुं प्रयजन्ति ' इत्यादिष्वपि योजनीयम् । अपि
चैकस्मिन्पदार्थेऽनुष्ठीयमाने विधीयमाने चार्थान्तरं द्वेधाऽऽपद्यते । किंचित्प्रय
त्नान्तरसाध्यं किंचित्तदनुनिष्पाद्यम् । यथा भक्षविधौ ग्रहणादयस्तृप्तिश्च । त
यत्प्रयत्नान्तरसाध्यं, न च तस्मिन्नकृते विहितकरणं शक्यमित्यवधार्यते तत्रार्था
पत्तिलभ्यं विधिशक्त्यन्तरं कल्प्यते । या च यावती च शास्त्रीया साऽवग
तिर्भवति । यत्त्वनुनिष्पादि बह्वपि पुरुषस्य शास्त्रस्य च व्यापारान्तरमन्तरेणैव सिध्यति
न तेन कश्चिदायासो भवति । न चेहाऽऽश्विनग्रहणानन्तर्ये विधीयमानेऽनुष्ठीयमाने व
सुत्याप्रातःसवनादिसंबन्धे भेदेन व्यापारितव्यम् । तेन नात्र कश्चिदुष्कर्षसामान
विधत्ते । श्रुतमात्राश्विनग्रहणार्थमात्रे विहिते यदि तदन्तर्गतत्वात्सुत्याप्रातःसवनाहर्भागविशे
षमुहूर्तनाडिकाक्षणलवनिमेषकालत्वद्रव्यसत्त्वादयः प्रसज्यन्ते किं क्रियताम् । अपि
च शिंशपामानयेत्यत्रापि वृक्षत्वद्रव्यत्वसत्ताद्याक्षेपाद्वाक्यभेदः स्यात् । अत
पूर्वेद्युः प्राप्तस्योपाकरणस्य कालान्तरमात्रमाश्विनग्रहणानन्तर्यं विधीयत इत्यदोषः
अन्ये तु द्वयोः परिव्याणोपाकरणयोरुत्कर्षाद्वाक्यभेदं समर्थयन्ते । तदपि तु सुपरिहरं
केवलपरिव्याणोत्कर्षादेव ' तदादि वाऽभिसंबन्धात् ' इत्येवमुपाकरणोत्कर्षसिद्धेः । तत्रै
तत्स्यात् । प्रकृतिप्राप्तो धर्म उत्कृष्यमाणस्तदाद्युत्कर्षं करोति नापूर्व इति । तदयुक्तम्
' कृतदेशात्तु पूर्वेषाम् ' इत्यत्राप्राकृतानामपि विदेवनादीनामपकर्षवर्णनेन ' तथाऽपूर्वम्
इत्यस्य विशिष्टविषयत्वव्याख्यानात् । अथवा ' स आश्विनं ग्रहम् ' इत्येतद्वाक्यप
सपरिव्याणान्तरानुवादादवाक्यभेद इति । अथोच्येत । अविशेषितसाधनकत्वात्त
त्रिवृत्त्वानुवादो न संभवतीति । तदयुक्तम् । एवं हि सिद्धान्तवाद्यपि पूर्वपक्षवादिना
चोदितः स्वयं परिहारं वक्ष्यति सोऽस्यापि भविष्यतीति । ननु च तस्यापूर्वकर्मविधा
नादनेकार्थविधिरुपपद्यते नास्येति । नैष विशेषः । यत्र ह्येकक्रियाविशेषणमनेकमुपादीय
तत्र तद्द्वारेण तद्विधिः सुलभ इति विशिष्टविधानन्यायः । यत्र पुनः स्वविशेषणाविशि

---

१ प्रयजन्ति, इति क्वचित्पाठः । २ (अ० ५ पा० १ अ० १२ सू० २४) । ३ (अ० ५ पा
१ अ० १० सू० २१) ४ (अ० ५ पा० १ अ० १६ सू० २९) ५ रशनासाधारण्याधिकरण इ
त्यत्र ।

वपाद्रव्यम् । तेन संनिपातिनो वपासंस्कारानुत्कर्षश्चोपाकरणम् ॥२२॥

क्रिया विधीयते, वाक्यान्तरप्राप्तस्य क्रियान्तरस्य विशेषणं, तत्रावश्यावर्तनीयो विधिप्रत्ययः। देवतादिविशिष्टो हि यागो विधीयमानः स्वविशेषणमेवाऽऽक्षेप्तुं समर्थो नाविधीयमानपरिव्याणविशेषणम्। तेनापूर्वकर्मविधिष्वप्येतद्विवेक्तव्यं, कतरत्तद्विशेषणं कतरदन्यविशेषणमिति। तस्मादयमुभयपक्षभाक्त्वान्नैकस्य चोदयितव्यः। तत्रावश्यं सिद्धान्तवादिनोभयोः परिव्याणयोः साधारणी रशनेति परिहारो वक्तव्यः। वक्ष्यति हि 'रशना च लिङ्गदर्शनात्' इति[1]। यद्यदेतस्य यूपस्य परिव्याणं तस्य तस्यैषा वाक्येन विज्ञायते। तथाप्राप्तानुवादान्न वाक्यभेदः। अथवा यत्त्रिवृता यूपं परिवीयोपाकरोतीति पूर्वेद्युः प्राप्तमुपाकरणस्य परिव्याणानन्तर्यमनूद्याऽऽश्विनग्रहणानन्तर्यं विधीयते। वरं च वाक्यभेदाद्व्यवहितकल्पनाश्रयणम्। तस्मादेवं वर्ण्यते। अवश्यं तावत्सवनीयानामेकेनोत्पत्तिरेकेन च गुणो विधातव्यः। तत्र पूर्वेद्युस्तनस्य तावन्न कश्चिदुत्पत्तिवाक्यत्वे हेतुरस्ति। नन्वितरस्यापि नास्ति। यद्यप्येवं तथाऽपि विकल्पसमुच्चयासंभवात्[2] केनचिद्विशेषेणान्यतरस्मिन्नाश्रयितव्ये विशेषोऽभिधीयते। पुरस्तादेतदेव[3] स्थितं यथोपादेयो गुणस्तिरोहितकर्मानुवादेन शक्यो विधातुं नानुपादेयः। स हि कुण्डपायिनामयने होमस्येव बलात्कर्मान्तरत्वमापादयति। तदिह वपाप्रचार उपादेयः सुत्याकालस्थसवनीयानुवादेन शक्यो विधातुं, किं पुनः प्रातःसवनश्रुत्या तद्देशसवनीयप्रत्यभिज्ञाने सति। श्वस्तने पुनराम्नाने निर्ज्ञातप्रयोजनत्वादाश्विनग्रहणेन सहाङ्गाङ्गिसंबन्धाभावात्कालार्थे संयोगे तस्यानुपादेयत्वात्कर्मोद्देशेन विध्यनुपपत्तेरवश्यं कालोद्देशेन कर्म विधेयम्। अथाप्याश्विनं प्रत्यङ्गत्वेन विधिस्तथाऽप्याङ्गिनोऽनुपादेयत्वादेषैव वचनव्यक्तिः। अतश्च गुणविध्यनुपपत्तेरवश्यं प्रकरणान्तरन्यायेनोत्पत्तिविधेरन्येनान्तरेणाप्रतिबन्धादुत्पत्तावत्रधार्यमाणायां कर्मान्तरं स्यात्। तेनास्य तावत्कालापेक्षयोत्पादकत्वं सिद्धम्। अतश्चेतरस्य परिशेषसिद्धं गुणविधित्वम्। न हि तस्य किंचिद्भेदकारणम्। अत एव वपाप्रचारेणोत्कर्षोऽस्ति नास्तीति विचारितम्। सति हि वपाप्रचारेणोत्कर्षे पूर्वस्यैव प्रात.सवने विपरिवृत्तेः कालं प्रत्युपादानं प्रत्यभिज्ञानात्कल्प्येत।

---

१ (अ० ३ पा० ६ अ० १० सू० ३१) २ विकल्पसमुच्चयासंभवादिति—कदाचिदेकस्योत्पत्तिविधित्वं कदाचिदन्यस्येत्येवं विकल्पस्याष्टदोषदुष्टत्वादेकशास्त्रान्तरस्थायाभावाच्चोभयश्चोत्पत्तिरित्येवं समुच्चयस्य चासंभवादित्यर्थः। ३ पुरस्तादिति—प्रकरणान्तराधिकरण इति शेषः।

अर्थेनेति चेत् ॥ २३ ॥

आह । अर्थेन हुत्कृष्टस्य कालो विधीयते । मुष्टिना पिधाय वपोद्धरणमासीत, आ वपाहोमात्, इति श्रूयते । पूर्वेद्युर्वपोद्धरणं मुष्टिना पिधाय न शक्नुयादेतावन्तं कालमासीनेनावस्थातुम् । अवश्यमाहारविहारादयस्तेन कर्तव्या इति ॥ २३ ॥

न श्रुतिविप्रतिषेधात् ॥ २४ ॥

नैतदेवं, श्रुतिविप्रतिषेधे[1] भवेदेवम् । न च श्रुतिविप्रतिषेधः । तृणमुष्टिना पर्णमुष्टिना वा पिधायिष्यते । ननु, आस्ते, इत्युपवेशने भवति । नावश्यमुपवेशन एव, औदासीन्येऽपि दृश्यते । तद्यथा गृहाणि परिगृह्याऽऽस्ते, क्षेत्राणि परिगृह्याऽऽस्ते, इत्यनुपवेशनेऽपि भवति व्यापारनिवृत्तौ । इहापि तृणमुष्टिना पर्णमुष्टिना वा पिधाय, आ वपाहोमादुदासिष्यते । तस्मादाश्विनकालमाम्नानं विधानार्थं न सवनीयानां प्रकरणे पशुधर्माः । तस्मान्न सवनीयार्थाः ॥ २४ ॥

'यथोक्तं संनिधौ त्वविभागात्'[2] इति । काले च कर्मणि विधीयमाने प्रत्ययस्य संनिकृष्टेऽर्थे व्यापारो भविष्यति । वपाप्रचारकालस्य पुनः सवनीयोत्पत्तिक्रियातः क्रियान्तरविशेषणत्वाद्दुष्प्रतिपादो विशिष्टविधिरिति वाक्यभेदः स्यात् । अस्मत्पक्षे पुनर्यथैकवाक्यत्वं भवति तथोक्तम् । एवं च परिव्याणस्यापि प्रकरणलभ्योऽङ्गभाव इहानुवदिष्यते । अन्यथा पुनर्विप्रकृष्टतरेण क्रमेण प्राप्तिमपेक्ष्यानूद्येत । तस्मादयमेवोत्पत्तिविधिः । कथं पुनरस्मिन्पक्षे भाष्यकारस्य वाक्यभेदोपन्यासः । उच्यते ।

कर्मणो भेद एवायं वाक्यदोषेऽभिधीयते ।
संबन्धे त्वेकवाक्यत्वमर्थान्यत्वेऽपि गम्यते ॥

वाक्यं भिद्येतेति । 'न तेनैकवाक्यतामियात्' यथा '[3]कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात्' इत्यत्रासत्यपि लक्षणतो वाक्यभेदे परस्परासंबन्धाभिप्रायेणोक्तं '[4]साकाङ्क्षं त्वेकवाक्यम्' इत्यत्र च संबन्धमात्राभिप्रायं तथेहोत्पत्त्यर्थत्वे सति तदेकवाक्यता याति न गुणार्थ इत्युच्यते[5] ॥ २२ ॥ २३ ॥ २४ ॥

---

१ श्रुतिविप्रतिषेधात् । भवेदेवं यदि । इति पा० । २ (अ० २ पा० ३ अ० १३ सू० २६), ३ (अ० ३ पा० १ अ० १० सू० १९) । ४ (अ० ३ पा० १ अ० १० सू० २०) ५ 'अर्थेनेति चेत्' 'न श्रुतिविप्रतिषेधात्' इति सूत्रद्वयस्थं भाष्यं सुस्पष्टमिति न व्याख्यातं वार्तिककृद्भिः ।

स्थानात्तु पूर्वस्य संस्कारस्य तदर्थत्वात् ॥ २५ ॥

नास्ति सवनीयानां प्रकरणमित्येवं सति पूर्वेणैव हेतुना स्थानेन पूर्वस्याग्नीषोमीयस्य भवितुमर्हति । संस्कारोऽयं पशुयागप्रयुक्तो न ज्योतिष्टोमप्रयुक्तः । ज्योतिष्टोमप्रयुक्तत्वे न विशेषः पशूनां स्यात् । पशुयागा अपि हि धर्मान्प्रयोक्तुमपूर्वत्वात्समर्थाः प्रकरणवन्तश्च । तस्मात्क्रमादग्नीषोमीयधर्मा इति ॥ २५ ॥

लिङ्गदर्शनाच्च ॥ २६ ॥

इतश्च पश्यामोऽग्नीषोमीयार्थाः पशुधर्मा इति । कुतः । लिङ्गदर्शनात् । लिङ्गमस्मिन्नर्थे भवति । वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यंदिने सवने, इति पशुपुरोडाशं दर्शयति । इतरथा समानविधानेषु सर्वेषु पशुष्वग्नीषोमयोर्देवतयोः संस्कारार्थः सन्पुरोडाशः सामर्थ्यादग्नीषोमीयस्य भवेन्न सवनीयस्य । तयोर्देवतयोरभावात् । दर्शयति च । तस्मादग्नीषोमीयार्था इति ॥ २६ ॥

सर्वं सवनीयप्रकरणं निराकृत्य पूर्वोक्तेनैव हेतुना सिद्धान्तं निगमयति । यद्वाऽवान्तरप्रकरणेनाबाध्यमानं स्थानबाधेनैव महाप्रकरणं सर्वार्थत्वप्रतिपादनयाऽवस्थितं तन्निवृत्त्यर्थस्तुशब्दः । यद्यपि प्रकरणं स्थानाद्बलवत्तथाऽप्युपांशुयाजानुमन्त्रणन्यायेन लिङ्गानुगृहीतक्रम एवात्र बलीयान्विज्ञायते । योग्यतया हि पशुधर्माः पशुयागमपेक्षन्ते न सोमयागम् । न चानपेक्षिताः प्रकरणेन ग्रहीतुं शक्यन्ते । तदङ्गावतरणेन चात्र विप्रकृष्टतरः श्रुतोऽर्थः । न च षष्ठीप्रतिपाद्यात्संबन्धाद्विनाऽऽनर्थक्यतदङ्गन्यायोऽस्तीत्युक्तम् । ननु चाविहितधर्मान्तरः साकाङ्क्ष एवाग्नीषोमीयः प्रदेशान्तरादिहाऽऽनीयमानः संनिहितान्धर्मान्प्रकरणेनैव गृह्णातीति न वक्तव्यं स्थानाच्चेति । नैष दोषः, यत्र हि प्राकृतैरङ्गैः पूर्यमाणायां विकृतौ तन्मध्येऽप्यपूर्वाणि कानिचित्प्रक्षिप्यन्ते तत्र विकृतौ प्रकरणग्रहणं भवति । अत्र प्रदेशान्तर उत्पन्नोऽग्नीषोमीयः प्राकृतैस्तावन्निष्प्रतिद्वन्द्वैः क्लृप्तोपकारैश्च निराकाङ्क्षीकृतः । तत इहाऽऽनीतः सन्ननन्यप्रयोजनान्धर्मान्साकाङ्क्षान्पश्यन्ननुमितकथंभावः संबध्यते । स्थानस्य चैतदेव लक्षणं यदुत धर्माणां साकाङ्क्षत्वेन प्रधानस्योत्पाद्य कथंभावं, संबन्धः । तस्मात्सूक्तं स्थानाच्चेति ॥ २५ ॥

सर्वेषां द्वयोर्वा समानविधानत्वे सवनीये पशुपुरोडाशदर्शनं नोपपद्यते । पुरोडाशयागस्य हि देवतासंस्कारार्थत्वं वक्ष्यति । स च लिङ्गादग्नीषोमावेव संस्कर्तुं शक्नोति नाग्निम् । न च समानविधानत्वेनोहः सिद्धान्तवत्संभवति । तस्मात्पुरोडाशदर्शनादातिदेशिकाः सवनीयस्य धर्मा इति ॥ २६ ॥

---

१ आनर्थक्यतदङ्गन्याय इति (अ० ३ पा० १ अ० ९) अत्रत्यन्यायो द्रष्टव्यः । २ (अ० १० पा० १ अ० ९ सू० २०) इत्यत्रेति शेषः ।

अचोदना गुणार्थेन ॥ २७ ॥

इदं पदोत्तरं सूत्रम् । आह । ननु छिद्रापिधानार्थः पशुपुरोडाशः । नेति ब्रूमः। अचोदना गुणार्थेन । तस्य छिद्रापिधानार्थेन न चोदना । अर्थवादः स इत्युक्तम् । तस्माद्देवतासंस्कारार्थः । तस्याग्नीषोमीयार्थत्वे, सवनीये पुरोडाशस्य दर्शनमुपपद्यते, न साधारण्ये । तस्मादग्नीषोमीयार्थाः पशुधर्मा इति ॥ २७ ॥

[८] दोहयोः कालभेदादसंयुक्तं शृतं स्यात् ॥ २८ ॥ पू०

अस्ति सायंदोहः । तथाऽस्ति प्रातर्दोहः । सन्ति तु दोहधर्माः शाखाहरणं, गवां प्रस्थापनं, प्रस्नावनं, गोदोहनमित्येवमादयः । ते किं सायंदोहार्था उत, उभयार्था इति । किं तावत्प्राप्तम् । दोहयोस्तयोरसंयुक्तं धर्मैः शृतं भवेत् । कस्मात् । सायंदोहस्य हि क्रम औपवसथ्येऽहनि शाखाहरणादीन्समामनन्ति । तस्मिन्नेवाहनि सायंदोहः । तस्मात्क्रमात्सायंदोहार्था दोहधर्मा इति ॥ २८ ॥

प्रकरणाविभागाद्वा तत्संयुक्तस्य कालशास्त्रम् ॥ २९ ॥

प्रकरणं हि साधारणम् । यथैव दध्न एवं पयसः । क्रमाच्च प्रकरणं बलवत्तरम् । तस्मादुभयार्था दोहधर्माः । अपि च, न सायं-

---

सत्यं देवतासंस्कारार्थः सन्न प्राप्नोति, न त्वयं केवलस्तदर्थः । किं तर्हि । 'सुषिरो वा एतर्हि पशुः' इत्युपक्रम्य छिद्रापिधानार्थोऽपि । अतश्च विनाऽपि देवतां सवनीयस्य छिद्रं पिधातुं पुरोडाशः करिष्यते । तेन समानविधानत्वेऽप्यदोष इत्युक्ते सूत्रेणोत्तरमाह—न छिद्रापिधानार्थेनास्य चोदना । विधिवन्निगदानां हेतुवन्निगदानां चैवंजातीयानामर्थवादत्वेनोक्तत्वात् । न हि छिद्रापिधानं क्रतुनाऽपेक्षितं, नापि पुरोडाशयागे कृते दृश्यते । तस्मान्नैतत्प्रयोजनमिति यथोक्तमेव लिङ्गदर्शनं सिद्धम् ॥ २७ ॥

(इति—पशुधर्माणामुपाकरणादीनामग्नीषोमीयमात्रार्थताधिकरणम् ॥ ७ ॥)

एवं क्रमस्याविरोधं दर्शयित्वेदानीं विरोधं दर्शयति । शाखाहरणादीनामौपवसथ्ये देशसामान्यादवान्तरप्रकरणाद्वा दध्यर्थत्वं प्राप्नोति ॥ २८ ॥

प्रधानं धर्मदेशे क्रियमाणं क्रमं प्रतिपद्यते । पठ्यमानं चावान्तरप्रकरणम् । दधियागस्त्वमावास्यायां पठ्यते क्रियते च । तस्मात्तुल्यं पयसा । दधित्वसिद्ध्यर्थास्तु केचि-

---

१ तस्मादिति पा० ।

दोहस्य पूर्वेद्युराम्नानम् । क तर्हि । उत्तरेद्युः[1] । कथम् । एवमामनन्ति, ऐन्द्रं दध्यमावास्यायाम्, ऐन्द्रं पयोऽमावास्यायाम्, इति । अमावास्यायां ह्युभयं साङ्गं चोद्यते । स एष सायंदोहोऽर्थात्पूर्वेद्युरनुष्ठीयते । स्वभाव एष दध्नो, यत्पूर्वेद्युरुपक्रान्तमपरेद्युरभिनिर्वर्तते । तस्मात्सायंदोहस्य क्रम आम्नाता इत्येतदेव तावन्नास्ति । अत उभयार्थादोहधर्मा इति ॥ २९ ॥

[९] तद्वत्सवनान्तरे ग्रहाम्नानम् ॥ ३० ॥ सि०

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेत, इति । तत्रैन्द्रवायवाद्या ग्रहाः प्रातःसवने दश आम्नाताः । तत्र धर्मा श्रूयन्ते, उपोप्तेऽन्ये ग्रहाः साद्यन्ते, अनुपोप्ते ध्रुवः । दशापवित्रेण ग्रहं संमार्ष्टि, इति । सन्त्यपरे माध्यंदिने सवने, अपरे तृतीयसवने ग्रहाः । तेषु माध्यंदिनीयेषु तार्तीयसवनीयेषु च संदेहः । किं सर्वेषु ग्रहधर्माः कर्तव्या उत प्रातःसवने ये ग्रहास्तेष्विति । किं प्राप्तम् । प्रातःसवनग्रहेषु भवेयुः । तेषां हि क्रमे समाम्नाता नेतरेषाम्[2] । एवं प्राप्ते ब्रूमः । सवनान्तरे—प्रातःसवनान्माध्यंदिने तृतीयसवने च ग्रहाम्नानं तद्वदेव भवितुमर्हति । सर्वेषां हि तुल्यं प्रकरणम् । यत्रैते धर्माः समाम्नाताः । वाक्येन ग्रहमात्रस्य विधीयन्ते । क्रमाच्च वाक्यप्रकरणे बलीयसी । तस्मात्सर्वार्था ग्रहधर्मा इति ॥ ३० ॥

..स्य धर्माः पूर्वेद्युः क्रियन्ते । न च ते शाखाहरणादीनां ग्राहकाः 'गुणानां च[3] परार्थत्वादसंबन्धः' इति स्थितत्वात् । तस्मादुभयसंयुक्तस्य शाखाहरणादेर्वचनात्पूर्वेद्युः करणं न दध्यर्थत्वादित्यदोषः ॥ २९ ॥

(इति—शाखाहरणादीनामुभयदोहार्थताधिकरणम् ॥ ८ ॥)

ग्रहधर्माणां प्रातःसवनस्य च समानदेशे समाम्नानमनुष्ठानं चेत्यनेनातुल्याशङ्कायां तुल्यत्वमापाद्यते । प्रकरणं तावत्सवनत्रयोपेतस्य ज्योतिष्टोमस्य समानम् । न च प्रातःसवनस्य निष्फलस्यावान्तरप्रकरणम् । न च प्रकणविरोधि स्थानं विनियोजकं भवति । तस्मात्सवनान्तरग्रहाणामपि धर्माः स्युरिति । एतेनाऽऽग्नेयाग्नीषोमीयादिपुरोडाशधर्मसाधारण्यमुक्तम् ॥ ३० ॥

(इति—ग्रहधर्माणां सवनत्रयसंबन्धिग्रहार्थताधिकरणम् ॥ ९ ॥)

---

१ उत्तरेद्युरेवेति पा० । २ तेषां क्रमे समाम्नानात् । तरेषामिति पा० । ३ (अ० ३ पा० १ अ० १२ सू० २२) ।

[१०] रशना च लिङ्गदर्शनात् ॥ ३१ ॥ सि०

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते, इति । तत्र रशना श्रूयते, रशनाधर्माश्च। त्रिवृद्भवति दर्भमयी भवति प्रपिष्टानां कर्तव्या चेति। तत्र संदेहः। किमेते धर्मा अग्नीषोमीयरशनायाः सवनीयरशनायाश्च साधारणा उताग्नीषोमीयरशनाया एवेति। किं प्राप्तम्। प्रकरणादग्नीषोमीयरशनाया इति । एवं प्राप्ते ब्रूमः । उभयोः साधारणा इति। कुतः। लिङ्गदर्शनात्। लिङ्गं भवति। एवमाह, आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाऽऽग्नेयं सवनीयं पशुमुपाकरोति, इति सवनीयपरिव्याणे रशनां दर्शयति। सा यदि साधारणी, तत एतद्दर्शनमवकल्पते। यद्यग्नीषोमीयार्थास्ततोऽप्राकृतात्सवनीयपरिव्याणान्निवर्तेत। सवनीये च परिव्याणान्तरमप्राकृतं यत्र त्रिवृत्त्वं दृश्यते । कथम् । स वै आश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययति, इति। तत्र यदि न साधारणी रशना, वाससा परिव्याणं प्राप्नोति । रशनां तु दर्शयति । तस्मात्सा-

---

अग्नीषोमीये यूपपरिव्याणमाम्नाय पुनः सवनीये 'स आश्विनं ग्रहं गृहीत्वा' इत्याम्नातं, तच्च निर्गुणपुनःश्रवणात्कर्मान्तरम्। उभयोश्च केनचिद्द्रव्येण भवितव्यम्। यच्च परिव्याणद्रव्यं सा रशना लोके वेदे च प्रसिद्धा । तेनोभयत्र तादर्थ्यादेव रशना प्राप्ता । सा च किंमयी किंधर्मा चेत्यपेक्षितेऽग्नीषोमीयस्य स्थानानुमिते प्रकरणे त्रिवृद्दर्भमयीप्रपिष्टानां कर्तव्येत्याम्नानाद्विशेषः प्रतीयते न सवनीयपरिव्याणस्य। तस्मादितरपशुधर्मवदेव रशनेतिकर्तव्यताऽग्नीषोमीयार्थैवेति । तथा प्राप्ते लिङ्गदर्शनात्साधारणीत्याह । न हि सवनीयोत्पत्तिवाक्ये त्रिवृत्त्वानुवादो रशनाधर्मसाधारण्याद्विनोपपद्यते । का प्राप्तिरिति चेत्तामाह—वाक्यसंयोगाद्रशनामात्रस्य, स्थानादग्नीषोमीयस्या। वाक्यं च तस्माद्बलवत्तरमिति। ननु 'न तद्वाक्यं हि तदर्थत्वात्' इत्युत्तरं वक्ष्यति। तेनाग्नीषोमीयापूर्वप्रयुक्तत्वाद्व्यवस्था स्यादिति । नैतदेवम् । न ह्येषा साक्षात्पशुसंबन्धिनी । किं तर्हि । 'यूपाङ्गं वा तत्संस्कारात्' इति वक्ष्यति। तेनेदृशमेकवाक्यत्वमेतत् । यूपपरिव्याणसाधारणसाधनस्यैते धर्मा इति । तथा चाग्नीषोमीयस्थमेतद्यूपपरिव्याणमेव च यूपैकत्वात्स-

---

१ अग्नीषोमीय इति—पशाविति शेषः। २ (अ० ३ पा० ७ अ० १ सू० ४)। ३ (अ० ४ पा० ४ अ० ९ सू० २३)।

धारणी रशना, तत्साधारण्याच्च तद्धर्मा अपि साधारणाः । तदेतल्लिङ्गं द्रशनासाधारण्यम् । कोऽत्र खलु न्याय इति । उच्यते । प्रकरणादग्नीषोमीयस्य, वाक्याद्यूपमात्रस्येति ॥ ३१ ॥

[११] आराच्छिष्टमसंयुक्तमितरैः संनिधानात् ॥३२॥ पू०

दूराच्छिष्यते ज्योतिष्टोमस्य, यथोपसदानुवाक्याकाण्डेंऽश्वदाभ्यौ । तत्र संदेहः । किं ज्योतिष्टोमसमाम्नाता ग्रहधर्माः कर्तव्या उत नेति । किं प्राप्तम् । न कर्तव्याः । असंनिधानात् । यथा, पयसा मैत्रावरुणं श्रीणाति, इति वचनान्मैत्रावरुणस्यैव श्रयणं न सर्वेषाम् । एवमिदमपि धर्मजातं प्रकरणस्थानामेव, न सर्वेषामिति ॥ ३२ ॥

संयुक्तं वा तदर्थत्वाच्छेषस्य तन्निमित्तत्वात् ॥ ३३ ॥ सि०

संयुक्तं वा धर्मैरेवंजातीयकं स्यादप्रकरणस्थमपि । कुतः । यतः प्रकरणाद्वाक्यं बलीयः । नन्वन्यत्र क्रियमाणा ज्योतिष्टोमस्य नोपकुर्युः । उच्यते । उपकरिष्यन्ति । अंश्वदाभ्ययोस्तदर्थत्वाज्ज्योतिष्टोमार्थत्वात्तच्छेषोऽयं ग्रहधर्मः । ग्रहनिमित्तो ज्योतिष्टोमस्योपकारकः । यावान् ग्रहो ज्योतिष्टोमस्योपकरोति तस्य सर्वस्य भवितुमर्हति । तस्मादंश्वदाभ्ययोरपि ग्रहधर्माः कर्तव्या इति ॥ ३३ ॥

मनीयस्थं यूपपरिव्याणम् । द्वयमपि चापूर्वसाधनमिह प्रतीयते, न तु दर्शपूर्णमासबर्हिरेव पिण्डपितृयज्ञे भविष्यति । तस्माद्बर्हिर्धर्मवैषम्यात्साधारण्य रशनाधर्माः ॥ ३१ ॥

(इति–रशनाधर्मसाधारण्याधिकरणम् ॥ १० ॥)

प्रसङ्गाद्वाक्यप्रकरणविरोधाविरोधौ विचार्येते । तत्र स्थानं बाधित्वा प्राकरणिकग्रहार्था ग्रहधर्मा इति प्रतीतेरनारभ्याधीतार्थत्वमशक्यं प्रत्येतुं, तेनासंयुक्तमित्याह ॥ ३२ ॥

प्रकरणस्याविशेषकत्वाज्ज्योतिष्टोमापूर्वसाधनस्यैवेत इत्येवं सुराग्रहादिभ्यो निवर्तमाना: प्रकरणे व्यवतिष्ठन्ते । येषां त्वप्रकरणाधीतानामपि तदस्ति ते पूर्वेणैव न्यायेन वाक्यसंयोगाद्धर्मवन्तो भवितुमर्हन्ति । अंश्वदाभ्यादीनामपि धर्मवत्ता ॥ ३३ ॥

---

१ अंश्वदाभ्याविति–' अंशुं गृह्णाति ' ' अदाभ्यं गृह्णाति ' इति वाक्यचोदितावंश्वदाभ्यसंज्ञकौ ग्रहाविति शेषः । २ सुराग्रहादिभ्य इति–सौत्रामणीनामकपशुयागे समाम्नाता ये सुराग्रहाः सोमग्रहाश्च तेभ्य इत्यर्थः ।

निर्देशाद्व्यवतिष्ठेत ॥ ३४ ॥

यदुक्तं यथा, मैत्रावरुणं पयसा श्रीणाति, इति । तद्युक्तम् । श्रयणे वचनात्प्रकरणं बाधित्वा व्यवस्थानम् । इह तु विपरीतम् । तत्र सर्वेषु ग्रहेषु प्रकरणं, विशिष्टेषु वाक्यम् । इह तु सर्वेषु ग्रहेषु वाक्यं, विशिष्टेषु प्रकरणम् । तस्मादप्रकरणस्थस्यापि धर्मा इति ॥ ३४ ॥

[१२] अग्न्यङ्गमप्रकरणे तद्वत् ॥ ३५ ॥ सि०

अनारभ्याग्निमुच्यते । चित्रिणीरुपदधाति, वज्रिणीरुपदधाति, भूतेष्टका उपदधाति, इति । सन्ति तु प्रकरणे, इष्टकाधर्माः । अखण्डामकृष्णलामिष्टकां कुर्यादिति । तथा, भस्मनेष्टकाः संयुज्यादिति । तत्र संदेहः । किमप्रकरणे समाम्नातानामिमे धर्माः कर्तव्या उत नेति । किं प्राप्तम् । न कर्तव्याः । कुतः । असंनिधानादिति प्राप्ते । उच्यते । अग्न्यङ्गमेवंजातीयकं तद्वदेव स्यात्, यद्वद्ग्रहाः । प्रकरणाद्धि वाक्यं बलवत् । अमूषां चेष्टकानामग्न्यर्थत्वात् ॥ ३५ ॥

[१३] नैमित्तिकमतुल्यत्वादसमानविधानं स्यात् ॥ ३६ ॥ सि०

ज्योतिष्टोमे श्रूयते— स यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं विभक्षयिषेत्, न्यग्रोधस्तिभीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोमम्, इति । ज्योतिष्टोमे सन्ति सोमधर्माः, मानम्, उपावहरणं, क्रयोऽभिषव इत्येवमादयः । तत्र संदेहः । किं समानविधाना इमे धर्माः सोमस्य फलचमसस्य चोत सोमधर्माः, फलचमसस्य तु तद्विकारत्वादिति । गुणकामानां प्रवृत्तिरप्रवृत्तिर्वा प्रयोजनमधिकरणचिन्तायाः ।

किं प्राप्तम् । समानविधानाः प्रकरणाविभागादिति प्राप्ते ।

मैत्रावरुणादिश्रयणादीना 'प्राकरणिकसर्वार्थत्वबाधेन वाक्याद्व्यवस्था । अत्र तु प्राकरणिकव्यवस्थाबाधेन वाक्यात्सर्वार्थत्वमित्यदृष्टान्तः ॥ ३४ ॥ ३५ ॥

(इति —ग्रहधर्माणामनारभ्याधीतानांमदाभ्यग्रहार्थताधिकरणम् ॥११॥१२॥)

अधिकरणद्वयेन कार्यप्रयुक्तत्वाद्धर्माणा साधारण्यमुक्तम् । फलचमसोऽपि चेष्टविकारत्वात्सोमकार्ये वर्तते । तस्मात्तस्यापि सोमधर्मविधिः साधारणो यथा 'व्रीहीन्प्रोक्षति

---

१ समाना इमे धर्मा इति पा० । २ ' अग्न्यङ्गमप्रकरणे तद्वत् ' इतीष्टकाधर्माणामनारभ्योत्पन्नविनियुक्तचित्रिण्यादीष्टकार्थताधिकरणं भाष्यनिगदव्याख्यातमित्युपेक्षितं वार्तिककृद्भिः ।

उच्यते । नैमित्तिकमेवंजातीयकमसमानविधानं स्यात् । कुतः । अतुल्यत्वात् । अतुल्यः सोमेन फलचमसः । सोमो नित्यवदाम्नातः । फलचमसो नैमित्तिकः । किमतो यद्येवं, धर्मा अपि नित्यवदाम्नाता न शक्या अनित्यवत्कर्तुम् । यदि साधारणाः, तत्रानारभ्योऽर्थो विधीयेत । अपि च नैमित्तिकः फलचमसः । स सोमधर्मान्गृह्णाति । तत्र धर्माः साधारणाः सन्तो द्विरुक्ता इत्युच्येरन् । तस्मादसमानविधानाः ॥ ३६ ॥

इत्येवमादिर्यवानामिति प्राप्तेऽभिधीयते । युक्तं यद्व्रीहिधर्माः यवेषु क्रियन्ते । द्वयोरपि वैकल्पिकत्वेनानित्ययोस्तुल्यरूपत्वात् । सोमधर्माः पुनर्नित्यवज्ज्योतिष्टोमापूर्वेण गृहीताः । ते नित्यमेव द्वारमाश्रयितुमर्हन्ति । सोमश्च नित्यो न फलचमसः । ब्राह्मणपक्षे विधानाभावात् । यदि सर्वसोमोपमर्देन फलचमसो भवेत्ततो राजन्यवैश्यपक्षयोरभावात्सोमोऽप्यनित्य इति तुल्यता स्यात् । स तु यजमानचमसमात्रान्निराकृतोऽपि ग्रहचमसान्तरेषु संभवान्नित्यः । तेन धर्मास्तं न व्यभिचरन्ति । तत्प्रयुक्ताः फलचमसस्येदानीं कथं भविष्यन्तीति । कार्यापत्त्येति ब्रूमः । आह । किं कार्यापत्तिरुपदेशातिदेशाभ्यामन्या, एतयोरेवान्तर्गता वा । अतिरिक्तेति केचिन्मन्यन्ते । न तु तथा सति प्रमाणत्वाध्यवसानम् । अतोऽतिदेशान्तर्गतिरेव वक्तव्या । कथं पुनः प्रकृतावेवातिदेशः कल्प्यत इति चेत् । सत्यं नावकल्पते यत्र कर्मधर्मातिदेशो भवति । न ह्येकस्य कर्मणः स्वत एव प्रकृतिविकारभाव उपपद्यते । द्रव्यधर्मातिदेशस्त्वयम् । समानेऽपि च कर्मणि द्रव्यभेदः प्रत्यक्षः । यथा च कर्म साकाङ्क्षं कर्मान्तराद्धर्मान्गृह्णाति तथा द्रव्यमपि । तस्मात्फलचमसेनेज्यां भावयेत्कथमनन्तरं विपरिवृत्तेर्द्रव्यसारूप्यात्सोमवदित्यवगतेरतिदेशसिद्धिः । किं भवति प्रयोजनं यदोभयोरपि पक्षयोः सोमधर्माः क्रियन्ते । सत्यप्युभयत्र करणे यथैवान्यत्रौपदेशिकातिदेशिकयोः गुणकामप्रवृत्त्यप्रवृत्ती प्रयोजनं भवतस्तथेहापि द्रष्टव्यम् । निवृत्तिवद्द्रव्यभेदादित्यपि हि शक्यं वक्तुम् । ये हि सोमस्याभिषवमानादिष्वाश्रिताः फलसाधमत्वेनावगतास्ते कथं फलचमसस्थाः साधयिष्यन्ति[1] । क्रतुसाधनत्वेन फलचमसः प्रवर्तमानो य एव तदङ्गपातिनः क्रत्वर्थेन क्रियन्ते तानेव शक्नोति ग्रहीतुं न फलार्थान् । अतः सिद्धा तन्निवृत्तिः । अनेनैवोहोऽपि[2]

---

१ साधयिष्यन्तीति—गुणजन्यं फलमिति शेषः । २ ऊहोऽपीति—' इन्द्राय त्वा वसुमते सोमं गृह्णामि ' इत्यादि सोमपदघटितमन्त्रे सोमपदस्थाने फलचमसपदप्रक्षेपः कर्तव्यो भवति यथतमानविधानमिति सिद्धान्तः । यदि सामानविध्यमिति पूर्वः पक्षस्तदा ' व्रीहीणां मेध ' इत्यस्येव यवप्रयोगे सोमपदघटितमन्त्रस्य लोपो भवतीत्यर्थः ।

[१४] प्रतिनिधिश्च तद्वत् ॥ ३७ ॥ पू०

अस्ति प्रतिनिधिः श्रुते द्रव्येऽपचरति । यथा व्रीहिष्वपचरत्सु नीवाराः । तत्र संदेहः । किं नीवाराः समानविधाना उत नेति । किं प्राप्तम् । प्रतिनिधिश्च तद्वत् । यथा नैमित्तिकं नित्येनासमानविधानमेवं प्रतिनिधिः । अतुल्यत्वात् । काऽतुल्यता । व्रीहीणां विहिता न नीवाराणाम् । इयमतुल्यता । व्रीहीणां विहिता नीवाराणामर्थापत्त्या भवन्ति ॥ ३७ ॥

न तद्वत्प्रयोजनैकत्वात्[1] ॥ ३८ ॥ सि०

नैतदस्ति, असमानविधानः प्रतिनिधिरिति । तद्वत्स्यात्, यद्वच्छ्रुतः । न प्रकृतिविकारभावः । कुतः । व्रीहित्वं हि व्रीहिधर्माणां व्रीहिव्यक्तौ निमित्तम् । न च व्रीहित्वस्य स्थाने नीवारत्वं भवतीति श्रूयते । तस्मान्न प्रकृतिविकारभावः । कथं तर्हि नीवारेषु धर्मा भवन्तीति । उच्यते । या व्रीहित्वेन परिच्छिन्ना व्रीहिव्यक्तयः, नीवारेषु ताः सन्ति । तासामर्थेन ते धर्माः क्रियन्ते । तासां च व्यक्तीनामन्यासां च व्रीहिगतानां तुल्य एष विधिः । का तुल्यता । उभयेऽपि व्रीहित्वलक्षिता इति । तस्मात्समानविधाना इति ॥ ३८ ॥

कर्तव्य इत्युक्तं भवति । समानेऽपि हि कर्मप्रकरणे द्रव्यसामानविध्यभावात्कार्यापत्तिपुरःसरं प्राप्नुवतः सोमपदस्याशक्तेर्विक्रिया विज्ञायते ॥ ३६ ॥

(इति–नित्यनैमित्तिकयोरसामानविध्याधिकरणम् ॥ १३ ॥)

प्रतिनिधावप्ययमेव न्यायः प्राप्नोति ॥ ३७ ॥

यदि नीवाराः स्वेनैव महिम्ना कर्मसाधनं भवेयुस्ततः कार्यापत्त्या धर्मैः संबध्येरन् । न तु तेषां साधनत्वे किंचित्प्रमाणमस्ति । ये हि तावद्व्रीहिधर्माः कतिपया दृश्यन्ते तदुपादित्सया पुरुषः प्रवर्तमानो नान्तरीयकत्वान्नीवारत्वमुपादत्ते न कर्माङ्गतया । व्रीहिधर्माः पुनर्व्रीहिशब्देन प्रत्यक्षेणैव चोदिता इति समानविधानाः । न हि नीवारेभ्यो व्रीहिबुद्धिर्व्यावर्तेत इति वक्ष्यति 'समान्यं तच्चिकीर्षा हि'[2] इति । तेनाऽऽह तद्वदेवासौ प्रवर्तेत इति ॥ ३८ ॥

---

१ प्रायो मुद्रितपुस्तकेषु सर्वत्र 'तद्वत्प्रयोजनैकत्वात्' इत्येवं नवर्णरहितः पाठो दृश्यते । २ (अ० ६ पा० ३ अ० ११ सू० २७)।

अशास्त्रलक्षणत्वाच्च ॥ ३९ ॥

इतश्च न प्रतिनिधेः श्रुतेन सह प्रकृतिविकारभावः । कुतः । अर्थलक्षणत्वात् । अर्थाद्धि प्रतिनिधिः क्रियते । न चार्थेनैतदवगन्तुं शक्यते व्रीहित्वस्य स्थाने नीवारत्वं भवतीति । तस्मान्न प्रतिनिधेः श्रुतेन सह प्रकृतिविकारभावो भवतीति ॥ ३९ ॥

[१५] नियमार्था गुणश्रुतिः ॥ ४० ॥ सि०

अथ यः श्रुतः प्रतिनिधिः । तत्र किं सामानविध्यमुत नेति । यथा, यदि सोमं न विन्देत पूतीकानभिषुणुयात् इति । असामानविध्यमिति ब्रूमः । अश्रुताद्ध्येतद्विपरीतम् । एवं प्राप्त उच्यते । नियमार्था गुणश्रुतिः । अत्राप्यर्थलक्षण एव प्रतिनिधिः । सोमेऽविद्यमाने सोमसदृशं द्रव्यं प्राप्तम् । तत्र सुसदृशे द्रव्ये प्राप्त ईषत्सदृशं नियम्यते । अन्यस्मि-

---

अशास्त्रचोदितश्च प्रतिनिधिरर्थात्क्रियते । तस्मादपि निष्प्रमाणकमस्य कार्यापन्नत्वमिति केचित् । न तु प्रतिनिधिरशास्त्रलक्षणः । प्रधानसमाप्तिचोदितत्वात् । यदि वाऽशास्त्रलक्षणः स्यान्नैव क्रियेत । न च तदकरणात्कश्चिद्दोषः स्यात् । अत एवं वर्णयितव्यं सूत्रम् । अशास्त्रलक्षणत्वान्नीवारत्वस्य कार्यापत्तिर्नास्ति । ये तु व्रीहिधर्माः प्रधानचोदनया सकलधर्मासंभवाच्च व्रीहिचोदनया विकला आश्रितास्तेऽर्थान्तरत्वाभावान्न कार्यापन्नाः ॥ ३९ ॥

(इति–मुख्यप्रतिनिध्योः सामानविध्याधिकरणम् ॥ १४ ॥)

यद्यशास्त्रलक्षणत्वान्नीवाराणां कार्यापत्तिर्नास्ति । पूतीकानां तर्हि शास्त्रलक्षणत्वादनित्यत्वाच्च फलचमसवत्कार्यापत्तिप्रसङ्ग इति प्राप्तेऽभिधीयते ।

यागसाधनतां कुर्यात्पूतीकानां यदि श्रुतिः ।
ततः स्यात्कार्यवर्तित्वं न त्वेवं सा प्रवर्तते ॥

सोमनाशे हि प्रतिनिध्यपेक्षायां सत्यां पूतीका विधीयन्ते न यागसाधनापेक्षायाम् । अतोऽयं प्रतिनिधिनियम एव भवति, यत्सकलसोमधर्मासंभवे विकलान्सोमधर्मानुत्पादयेत्पूतीकगतानिति । वक्ष्यति हि ' नियमार्थः क्वचिद्विधिः ' ' तन्नित्यं तच्चिकीर्षा हि ' इति च । अतश्च नैवात्र पूतीकत्वं कर्माङ्गं, किं तर्हि, सोमधर्मोपलक्षणार्थम् । तेन श्रुतिलक्षणस्यापि पूर्वेणाविशिष्टत्वमिति । तेनेहापि तदेव चिन्तायाः प्रयोजनम् । अतश्च

---

१ (अ० ६ पा० ३ अ० ४ सू० १६) । २ (अ० ६ पा० ३ अ० ४ सू० १७) ।

न्प्रतिनिधातव्येऽन्यत्प्रतिनिधीयते श्रुतस्य स्थाने । न यागद्रव्यत्वेन ॥ ४० ॥

[१६] संस्थास्तु समानविधानाः प्रकरणाविशेषात् ॥ ४१ ॥ पू०

अस्ति ज्योतिष्टोमः । तत्र संस्थाः समाम्नाताः । अग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्र इति । तत्र दीक्षणीयादयो धर्माः । तेषु संदेहः । किं सर्वसंस्थं ज्योतिष्टोमं प्रकृत्य दीक्षणीयादयो धर्मा उक्ता उताग्निष्टोमसंस्थमभिप्रेत्येति । किं प्राप्तम् । सर्वसंस्थासु

तदाश्रयस्य तद्बुद्ध्यनपायाद्गुणकामैः प्रवर्तितव्यम् । अन्ये त्वाहुः । सकलव्यक्त्याश्रयिणो हि गुणकामा वैकल्यादिह न प्रवर्तन्ते । नित्यस्य हि कर्मणोऽवश्यं प्रक्रमात्प्रक्रान्तस्य च सर्वस्यावश्यसमापनीयत्वात्[1] किंचिद्धर्मवैकल्येऽप्यवैगुण्याभ्यनुज्ञा युज्यते । यथा तु काम्यानां प्रतिनिधिभिः प्रक्रमो नास्ति तथा गुणकामैर्न प्रवर्तितव्यम् । यदि तु प्रक्रान्ते कस्मिंश्चिद्गुणकामकल्पे द्रव्यनाशे सति प्रतिनिधीयते ततस्तस्यावश्यसमापनीयत्वाद्विकारेण प्रतिनिधिना वा तुल्यं समापनमित्यूहानूहावेव प्रयोजनम् ॥ ४० ॥

(इति—मुख्यमन्दसदृशप्रतिनिध्योः सामान्यविध्याधिकरणम् ॥ १९ ॥)

अनेकग्रहचमसयागाभ्यासात्मकश्चतुःसंस्थो ज्योतिष्टोमोऽवधारितः । सर्वसंस्थासु तु ज्योतिष्टोमरूपमनुस्यूतम् । यथैव देवदत्तस्य स्थानोपवेशनगमनशयनाद्यवस्थाभेदेऽपि देवदत्तत्वं नापैति तथा ज्योतिष्टोमात्मनः संस्थान्तरोपजनापाये तत्त्वं नापैति । संस्थानां च विरोधादन्योन्यं समावेशो नास्ति । ज्योतिष्टोमरूपं तु सर्वत्राविरुद्धमनुवर्तते । स च ज्योतिष्टोमः फलाय चोदितः ' ज्योतिष्टोमेन स्वर्गकामो यजेत ' इति । तथोक्थ्यादिसंस्थानामपि ' पशुकाम उक्थ्यं गृह्णीयात् ' इत्यादि फले विधानम् । तमेवंविधं ज्योतिष्टोमं प्रकृत्य दीक्षणीयादयो धर्माः समाम्नाताः । ते संदिह्यन्ते, किं सर्वसंस्थज्योतिष्टोमोद्देशेनाऽऽम्नाता उत केवलाग्निष्टोमसंस्थोद्देशेनेति । न त्वयमुपन्यासो युक्तः । न हि धर्मसंबन्धवेलायामुद्दिश्यमानस्य ज्योतिष्टोमस्य काचित्संस्था विशेषणत्वेन श्रूयते । यद्यपि कथंचिच्छ्रूयेत तथाऽप्युद्दिश्यमानविशेषणत्वान्न विवक्ष्येत । न चोक्थ्यादिग्रहणांशेन ज्योतिष्टोमस्य ग्राहकत्वं, फलसाधनभावाद्धि तत्रोक्थ्यादय एवेतिकर्तव्यतावन्तो भवन्ति । ज्योतिष्टोमस्तत्राऽऽश्रयत्वेनोपसर्जनभावान्न धर्मग्रहणयोग्यो विज्ञायते ।

---

[1] समापनीयत्वादिति—(अ० ६ पा० २ अ० ३) अत्रत्यन्यायेनेति शेषः ।

समानं विधानम् । कुतः । प्रकरणाविशेषात् । नास्ति प्रकरणे विशेषो येन ज्ञायेताग्निष्टोमसंस्थं प्रकृत्येति । तस्मात्समानविधानाः संस्था इति ॥ ४१ ॥

व्यपदेशश्च तुल्यवत् ॥ ४२ ॥

तुल्य इव प्रकरणे व्यपदेशो भवति । यद्यग्निष्टोमो जुहोति, यद्युक्थ्यः, परिधिमनक्ति, यद्यतिरात्र एतदेव यजुर्जपन्हविर्धानं प्रतिपद्येत, इति सर्वावस्थस्य विशेषवचनादवगम्यते । यदपि सामान्यं तदपि सर्वावस्थस्यैवेति । यदि हि(न)समानं विधानमग्निष्टोमसंस्थस्यैव

ज्योतिष्टोमेन स्वर्गकामः ' इति चैतद्वाक्यगतस्य ज्योतिष्टोमस्य धर्मसंबन्धः सर्व-
ंस्थास्वविशिष्ट इत्यग्निष्टोमसंस्थमेवेत्ययुक्तम् । अत एवं वक्तव्यम् । किं ज्योतिष्टोम-
यैवैतद्धर्माम्नानमुतोक्थ्यादीनामपि संस्थानामिति । तच्चैवं समर्थनीयमेतदेव ग्रन्थेनोक्त-
मिति । यद्यपि संस्थाभिर्धर्मा गृह्यन्ते तथाऽपि तासां स्वयमक्रियात्मकत्वाज्ज्योतिष्टोम
ाऽऽश्रयत्वाद्द्वारं भवतीति किं सर्वसंस्थं प्रकृत्येत्याह । किं द्वारभूतं फलवन्तं च
कृत्योत फलवन्तमेवेत्यर्थः । यदा च केवलज्योतिष्टोमार्थत्वं तदा तदसाधारणत्वात्प-
िशेषाद्वाऽग्निष्टोमसंस्थस्यैव जायन इति तत्संस्थस्य व्यपदेश. । उक्थ्यादिषु हि
द्यपि ज्योतिष्टोमस्यापि ग्राहकत्वमस्ति तथाऽपि तन्न व्यज्यते किमुक्थ्यादिगृहीता धर्मा
तस्य द्वारत्वाद्भवन्त्युताऽऽत्मीयफलसाधनत्वादिति । अग्निष्टोमसंस्था चास्य निजम-
म् । अतस्तत्संस्थो गृह्णन्नयं गृह्णातीति शक्यते वक्तुम् । तस्मात्सम्यगुपन्यस्तम् ।
र्मसाधारण्यं चोपदेशातिदेशाभ्यां पक्षद्वयेऽप्यभ्युपगम्यत एवेति विधानग्रहणम् ।
 प्राप्तम् । ज्योतिष्टोमेन सह समानं संस्थानां धर्मविधानम् । कुतः । प्रकरणा-
िशेषात् । ज्योतिष्टोमो हि फलवत्त्वादुपजातकथंभावस्तदनुवृत्तिसंनिधौ समाम्नाता-
धर्मान् गृह्णाति न ज्योतिष्टोमत्वेन । तच्चोक्थ्यादीनामेतेष्वेव धर्मेषु सर्वमविशिष्टम् ।
पदेशासंभवे चातिदेशो भवति । तस्मादुपदेश एव साधारण इति ॥ ४१ ॥

आज्यशेषस्य प्रतिपत्तिं विदधत्तुल्यवत्संस्थाक्रतुप्रकरणसंबन्धित्वेन कीर्तयति । यद्य-
ग्निष्टोमो जुहोति यद्युक्थ्यस्तेनैव शेषेण परिधिमनक्ति । यद्यतिरात्रः, एतदेव होमयजुः,
मन्ने पृत्सु मर्त्यमिति जपन्हविर्धानं प्रतिपद्येतेति । अतो विज्ञायते सर्वोऽङ्गविधिः
ाधारण इति । सामान्यतो दृष्टमिवायुक्तमुक्तम् । यदि हि वाक्यवशेन किंचित्प्रकर-
ाम्नातं संस्थाभिः संबध्यते ततः किमसंयुक्तसंबन्धेनापि युक्तं भवितुम् । न
ि ' द्वादशाहीनस्य ' इत्यादिषु शेषधर्माणामप्यहीनार्थत्वमाशङ्कितम् । यथाद्वयं

स्यात्तत्राग्निष्टोमं संकीर्तयेत् । असंकीर्त्यमानेऽपि धर्मसंबन्धो भवतीति, सर्वावस्थस्य कीर्तनात्सर्वावस्थस्य प्रकरणमित्यवगच्छामः । अपि च श्रूयते, आग्नेयमजमग्निष्टोम आलभेत, ऐन्द्राग्नं द्वितीयमुक्थ्ये, ऐन्द्रं वृष्णिं तृतीयं षोडशिनि, इति । द्वितीयस्य तृतीयस्य च दर्शनं सामानविध्ये घटते । उक्थ्ये हि द्वे निमित्ते स्तः, अग्निष्टोमस्तोत्रमुक्थ्यस्तोत्रं चेति । तत्र द्वौ नैमित्तिकौ, आग्नेयः पशुः, ऐन्द्राग्नश्चेति । तेन द्वितीयदर्शनं तत्र युज्यते ।

स्थितत्वाद्वचनानामित्येवं व्याचष्टे । यदि हि सामान्यविहितमग्निष्टोमसंस्थस्यैव स्याद्विनाऽपि तदुपादानेन तदङ्गत्वसिद्धेर्नात्राग्निष्टोमं संकीर्तयेत् । यतस्तु संकीर्तयत्यतो मन्यामहे नूनमविशेषितमग्निष्टोमस्य न लभ्यते । तच्चैवं न लभ्यते यदि संस्थानामपि साधारणं प्रकरणम् । केवलज्योतिष्टोमप्रकरणपक्षे तु पुनःश्रुतिरनर्थिका स्यात् । तथोक्थ्यादीनामपि यदि प्रकरणमस्ति ततोऽन्यतरानिर्धारणार्थं यदिशब्दोपपन्नं ग्रहणं युक्तम् । अप्रकृतत्वे तु ‘ द्वादशाहीनस्य ’ इतिवद्विनैव यदिशब्देन संबन्धः स्यात् । न हि ज्योतिष्टोमप्रकरणे स्थितस्यैवं वादो युज्यते । यदि ज्योतिष्टोमस्तत एतत् । यदि द्वादशाहस्ततोऽमुकमिति । अनेकसंनिहितापेक्षं ह्येतद्वचनं भवति । अतोऽपि समानं प्रकरणम् । इदमपरं लिङ्गम् । ‘ आग्नेयमजमग्निष्टोम आलभेत’ ‘ऐन्द्राग्नमुक्थ्ये द्वितीयम् । ’ ‘ ऐन्द्रं वृष्णिं षोडशिनि तृतीयम् ’ इति । समानविधानत्वे पूर्वपूर्वो ह्युत्तरोत्तरत्र प्रत्यक्षश्रुतत्वात्क्रियत इति द्वितीयतृतीयदर्शनमुपपद्यते । विकारपक्षे तु प्रत्यक्षश्रुतैरैन्द्राग्नादिभिराग्नेये बाधिते सर्वत्रैक एव स्यात् । ननु च प्रत्यक्षश्रुतत्वेऽपि संस्थान्तरे संस्थान्तरासंभवान्निर्निमित्तः पूर्वः पूर्वो न प्राप्नोति । यो ह्यग्निष्टोमस्तोत्रे समाप्यते सोऽग्निष्टोमो न तद्धन्मात्रम्[१] । यश्चोक्थ्यादिषु समाप्यते नासौ पूर्वत्र समाप्तो भवति । तेन द्वितीयदर्शनाद्यप्रसङ्गः पक्षद्वयेऽपि तुल्यः । सत्यं संस्थानिमित्तत्वे तुल्यः । स्तोत्रनिमित्तत्वे तु समुच्चयः । तथा च भाष्यकार आह—द्वे हि तत्र निमित्ते अग्निष्टोमस्तोत्रमुक्थ्यस्तोत्रं चेति सिद्धवदेतद्ब्रवीति । कथं पुनः संस्थास्तोत्रसाधारणाग्निष्टोमादिसमभिव्याहारे तुल्ये स्तोत्रनिमित्तत्वमेवाङ्गी क्रियते न संस्थानिमित्तत्वम् । तासां हि फलवत्त्वेन प्रयोजनवत्त्वादङ्केशेनैव निमित्तत्वमापद्यते । तत्र केचिदाहुः । सत्यपि शब्दसाधारण्ये शास्त्रस्य महाविषयत्वानुग्रहार्थं स्तोत्रनिमित्तत्वाश्रयणमिति । अथवा स्तोत्रविशेषिताया एव संस्थाया एवंशब्दकत्वात्पूर्वतरप्रतीतविशेषणनिमित्तत्वसंभवे जघन्यविशेष्यानिमित्तत्वकल्पना न युक्ता । यद्वाऽऽकृत्यधि-

---

१ मात्रशब्दः कार्त्स्न्यवाची । तेनोक्थ्यादिसंस्थायामग्निष्टोमस्तोत्रसत्त्वेऽपि नाग्निष्टोमस्तोत्रेण कर्मणोपरम इति नोक्थ्यादीनामग्निष्टोमसंस्थात्वमिति ज्ञेयम् । २ (अ०१ पा० ३ अ०९) ।

करणन्यायेनैव स्तोत्रेषु मुख्यः शब्दः संस्थायां लाक्षणिकः । श्रुत्यसंभवे च लक्षणाऽऽश्रयितव्या । शक्नोति च स्तोत्रमपि सप्तमीनिर्देशान्निमित्तत्वं प्रतिपत्तुम् । निष्फलानामपि च भेदनादीनां वचनसामर्थ्यान्निमित्तत्वमिष्टम् । अथवा 'संदिग्धेषु वाक्यशेषात्' इत्येवं स्तोत्राश्रयणम् । सत्यपि वा संस्थानां मुख्यत्वे व्यवधारणकल्पनया वाक्यशेषेण स्तोत्रपरिग्रहः । एवं हि श्रूयते 'आग्नेयमजमग्निष्टोम आलभेत' 'आग्नेयो ह्यग्निष्टोमः' इति । कतरस्मिन्नग्निष्टोमे, य आग्नेयः । स्तोत्रस्य च स्तुतिभागैर्देवता विद्यते न संस्थायाः । सा हि व्यापारपरित्यागात्मकत्वादभावभूता । न चाभावस्य देवतया कार्यमस्ति । यागाभ्यासेऽपि हि या देवता सा तस्यैवाऽऽग्नेयत्वं करोति न संस्थायाः । न च स एव संस्था । तदुत्तरकालौदासीन्यवचनत्वात्संपूर्वस्य तिष्ठतेः । न चान्यगतया देवतयाऽन्यस्य व्यपदेशो भवति । तथोक्थ्यषोडशिनोरपि दर्शयितव्यम् । अपि च 'ऐन्द्राग्नान्युक्थ्यानि' इति स्फुटमेव स्तोत्रग्रहणम् । न हि संस्था, उक्थ्यानीत्यनेन[2] शब्देनोच्यते । तस्मात्सति स्तोत्रनिमित्तत्वे युक्तः समुच्चय इति । ननु विकारपक्षेऽप्यदृष्टार्थत्वात्पशुयागानामन्योन्यकार्यापत्त्यसंभवादुपपद्यत एव समुच्चयः । तथा हि ।

> नाऽऽनुमानिकमात्रं यत्तत्प्रत्यक्षेण बाध्यते ।
> विरोधे सति बाधो हि विरोधश्चैकगोचरः ॥

यदि हि प्रत्यक्षश्रुतत्वमेव केवलं विरोधनिरपेक्षं बाधकारणं स्यात्ततो न किंचिन्न बाध्यते क्रत्वन्तरगतं दृष्टार्थमदृष्टार्थं वा तुल्यकल्पमतुल्यकल्पं वा । न चैतादिष्टम् । अत उभयोः पक्षयोः समुच्चयदर्शनमुपपन्नम् । तथा च वक्ष्यति '[3]प्रकृतिलिङ्गासंयोगात्' इति । तथा '[4]प्राजापत्येषु चाऽऽम्नानात्' इत्यादावेवंजातीयकानां तत्र तत्राविरोधात्समुच्चयं वक्ष्यति । तत्रैवं समाधिमाहुः । अस्त्येवात्र प्रकृतिलिङ्गसंयोगः सवनीयसमाख्यानिमित्तः । सर्वे ह्येते सवनीयशब्देनोक्ताः । तस्मात्समाख्यानात्तुल्यकार्यत्वे सति, अस्ति विरोध इति प्राप्नोति बाधः । यद्येवं, ततः समानविधानत्वेऽपि सामान्यविशेषलक्षणबाधप्रसङ्गः । पूर्वपूर्वो हि पशुर्महाविषयत्वात्सामान्यविहितो भवति । उत्तर उत्तरोऽल्पावकाशत्वाद्विशेषविहितः । बाध्यते च सामान्यं सावकाशं वा विशेषेण निरवकाशेन वा । केचित्त्वाहुः । सर्वान्त्यस्य केवलस्य निरवकाशत्वादत्यन्तविशेषस्थत्वा-

---

१ (अ० १ पा० ४ अ० १२ सू० २४)। २ उक्थ्यानीत्यनेनेति—उक्थ्यसंस्थाया एकत्वादुक्थ्यबहुवचनविरोधापत्तेरिति शेषः। ३ (अ० १० पा० ४ अ० १ सू० १)। ४ (अ० १० पा० ४ अ० ४ सू० ६)।

द्बाधकत्वं भवेन्न मध्यमयोः । सत्यपि बह्वल्पविषयत्वे प्रमाणगतिस्तुल्या । यथैवाऽऽग्नेयः संस्थाचतुष्टयविषयत्वात्साधारणो भवत्येवमैन्द्राग्नोऽपि संस्थात्रयसाधारणः । यावता च यत्नेनासौ प्राप्नोति तावता च पूर्वोऽपि । मेष्यास्तु संस्थानिमित्तत्वेऽप्यदोषः । न हि तदधिका ज्योतिष्टोमे संस्थाऽस्ति । तस्मादबाध इति । उच्यते । यद्यपि न बाधस्तथाऽपि विकल्पस्तावत्प्राप्नोति । न हि तुल्यार्थाना क्वचित्समुच्चयो दृष्टः । सेयमुभयतःपाशा रज्जुः । यदि तावत्किंचिदपि कार्यान्यत्वं समुच्चयसिद्ध्यर्थमभ्युपगम्यते ततो विकारपक्षेऽपि समुच्चयः । अथ तत्र बाधं समर्थयितुं कार्यैकत्वं कल्प्यते ततः सामा[1]नविध्येऽपि व्रीहियवाविवदसमुच्चय इति । न चैतत्पूर्वपक्षवचनमात्रं सिद्धान्तेऽपि दर्शनमेवागत्या वचनीकृत्य समुच्चयं वक्ष्यति ‘ वचना[2]त्तु समुच्चयः ’ इति । तदवश्यं वक्तव्यो विशेषः । स उच्यते ।

समानविधिपक्षे हि सर्वे सर्वाङ्गभाविनः ।
तान्निमित्तवशप्राप्तान्न समाख्या निवर्तयेत् ॥

सर्वे हि पशवः सर्वत्र प्राप्नुवन्तो यत्पूर्वसंस्थासु परे न भवन्ति तन्निमित्ताभावात् । प्रत्यक्षेण तु निमित्तेन पूर्वः पूर्वः परत्र वाक्यात्प्राप्नोति । तत्र किं समाख्ययैककार्यत्वं कल्पयित्वा बाधविकल्पयोरन्यतर आश्रीयतामुत वाक्यप्राप्तसमुच्चयानुरोधेन कार्यान्यत्वं कल्प्यतामिति वाक्यबलीयस्त्वात्समुच्चयेन भवितव्यम् । यथा प्रयाजानुयाजादीनां सत्यपि समाख्यैकत्वे वाक्यसामर्थ्यात्कार्यान्यत्वं समुच्चयश्च । अतिदेशे पुनः, समाख्यया कार्यैकत्वम्, अतिदेशेन कार्यान्यत्वं (तेनापि समुच्चयः) । तस्मा[3]च्चोपदेशान्तर्गता समाख्यैव बलीयसीति तत्कृतं कार्यैकत्वमाश्रित्य विरोधाद्बाधः परिगृह्येत । विकारे च प्रकृतिलिङ्गसंयोगापेक्षा विद्यत इति कार्यापत्तिर्विज्ञायते । न तु समानविधिपक्षे प्रकृतिलिङ्गसंयोगः कश्चित्, येन कार्यापत्तिरवधार्येत । केचित्त्वाहुः । समानविधित्वे परस्परानपेक्षैर्द्रव्यदेवतासंयोगैः कर्मभेदोऽवसीयते । विकारे पुनरतिदेशप्राप्तयागानुवादेन गुणमात्रं विधीयते । ततश्चैक एव यागः स्यान्न द्वितीयादय इति । स त्वयं गुणविधिरैन्द्राग्ने संभवेन्नेन्द्रसरस्वत्योः । अनेकद्रव्यदेवताविधानेन वाक्यभेदप्रसङ्गादेकान्तेन कर्मान्तरता । तेनैवं समर्थनीयं, कर्मान्तरमेवेदं विधीयमानं किमपूर्वान्तरसाधनत्वं प्रतिपद्यतामुत प्राकृतसवनीयापूर्वमेव साधयत्विति । पूर्वक्लृ[4]प्तापूर्वविनियोगमात्रे संभवति नापूर्वान्तरं कल्पयित्वा तत्साधनत्वाध्यवसानं युक्तम् । तथाऽतिदेशप्राप्तसवनीयापूर्वमपि साधनापेक्षावेलायां प्रत्यक्षश्रुतसवनीयपरित्यागेन न सवनीयान्तरं गृह्णाति । सर्वापेक्षासु प्रकृतासंभवेनाप्रकृतग्रहणाच्चागतोऽपि

१ सामानविध्येऽपीति—सामानविध्यामीति पूर्वपक्षेऽपीत्यर्थः । २ (अ० ३ पा० ६ अ० १६ सू० ४५) । ३ तस्माच्चेति—कल्पितातिदेशापेक्षयेत्यर्थः । ४ पूर्वक्लृप्तेति—प्रकृतिक्लृप्तमित्यर्थः ।

एवं षोडशिन्यतिरात्रे च प्रकृतिविकारभावे तु प्रत्यक्षश्रुतैरैन्द्राग्नादिभिरतिदेशेन प्राप्त आग्नेयो बाध्येत । तत्र द्वितीयादिदर्शनं नोपपद्येत । भवति च । तस्मात्सर्वावस्थस्य ज्योतिष्टोमस्य दीक्षणीयादयो धर्मा इति ॥४२॥

विकारास्तु कामसंयोगे स नित्यस्य समत्वात् ॥४३॥ सि०

नैतदस्ति, समानविधाना इति । किं तर्हि । उक्थ्यादयः संस्थाविकारभूताः स्युः । अग्निष्टोमसंस्थ्यमूरीकृत्य दीक्षणीयाद्यो धर्माः समाम्नाताः । कुतः । उक्थ्यादीनां कामसंयोगेन श्रवणात् । पशुकाम उक्थ्यं गृह्णीयात् । षोडशिना वीर्यकामः स्तुवीत, अतिरात्रेण प्रजाकामं याजयेत्, इति । काम्यो गुणः श्रूयमाणो नित्यमर्थं विकृत्य

व्यापारः प्राकृतेनैवापूर्वेण क्लृप्तसंबन्धो न शक्नोत्यपूर्वान्तरसंबन्धं प्रतिपत्तुम् । कथम॰ क्लृप्तसामर्थ्यं सवनीयान्तरं प्राकृतमपूर्वं साधयतीति चेत् । यथेतरस्मिन्पक्षेऽपूर्वान्तरं यागगतं व्यापारमित्यदोषः । कस्तर्ह्यनयोर्विशेषः । उच्यते । यदा यागगतव्यापारेणापूर्वाण्यपेक्ष्यन्ते न तदा वैकृतसवनीयापूर्वं क्लृप्तं, यत्तस्मिन्नंशे निपतेत् । यदा पुनरपूर्वेण कर्मापेक्ष्यते तदा सवनीयत्वप्रकृतिलिङ्गसंयुक्तं कर्मान्तरं विद्यमानमवबुध्य प्राकृतं निराकरोति । प्रकृतौ चापूर्वकल्पनावसराद्विधीयमानसवनीयचतुष्टयानुनिष्पाद्यपूर्वचतुष्टयं कल्प्यते । न हि तत्र ज्ञायते कतरत्पूर्वतरं क्लृप्तं यस्य साधनान्तरसंबन्धः स्यात् । कर्मालोचनवेलायां हि कर्मरूपाण्येव दृश्यन्ते । अपूर्वकल्पनाऽपि युगपद्भवतीति न ज्ञायते विशेषः । विकारपक्षे तु ज्ञायते प्राकृतस्य पूर्वतरं क्लृप्तिरित्यवश्यावहेयेऽन्यतरस्मिन्कर्मणि विप्रकृष्टं प्राकृतं हातव्यं भवतीति बाधप्रसङ्गः । ननु च विकारपक्षेऽग्निष्टोमसंस्थाया एव विकारभूताः पराः संस्था भवन्ति न परस्परेणेति केवलस्याऽऽग्नेयस्य प्राप्तस्य परैर्बाधात्सर्वत्र द्वितीयस्य दर्शनं न स्यादित्येतावन्मात्रं वक्तव्यं किमुच्यते तृतीयस्य दर्शनं न प्राप्नोतीति । नैष दोषः । यदि त्वयमैन्द्राग्नादीना परत्र प्राप्तानां बाधाददर्शनं ब्रूयात्ततो निष्प्रमाणकं वदेत् । अयं त्वदर्शनमात्रं वदति । तच्चाऽऽग्नेयस्य बाधान्मध्यमयोश्चाप्राप्तेरुपपन्नमेव । तेनैव चाऽऽग्नेयो बाध्येतेत्याह—न पूर्वः पूर्वः परेणेति । तस्मात्समानविधानाः ॥ ४२ ॥

उक्थादयः समाप्तिविशेषाः फलसाधनत्वेन चोद्यमानाः समाप्तिमन्तमाश्रयमपेक्षमाणाः प्रकृतं ज्योतिष्टोमं समाश्रयन्तस्तस्य निजामग्निष्टोमसंस्थां विकृत्य निविशन्त इति विकारशब्देनोच्यन्ते । ननु चोक्थ्यादीनां समाप्तित्वे सिद्धे समाप्तिमदपेक्षा भवति । न चैषां प्राग् ज्योतिष्टोमसंबन्धात्समाप्तित्वसिद्धिः, आरम्भमध्यापेक्षत्वात्समाप्तिशब्दप्रवृत्तेः । अथ प्रथमं तत्संबन्धस्ततः प्रथमं क्रत्वर्थत्वेऽ॰

वधारिते फलसंबन्धाभावात् 'स नित्यस्य समत्वात्' इत्येवमविकारत्वप्रसङ्गः । किंच ।

ग्रहणादौ च विस्पष्टे चोद्यमाने फलं प्रति ।
संस्थानां फलसंबन्धः कथमध्यवसीयते ॥

तत्र केचिदाहुः । ग्रहणादीनामपि फलसंबन्धेऽधि[1]करणं गच्छत्येव किं ज्योतिष्टोमार्थो धर्मविधिरुत ग्रहणाद्यर्थोऽपीति । संस्थाशब्दः[2] कथमिति चेत् । तेषां ग्रहणादीनामन्ते विधानात्समाप्तिसंबन्धोऽस्तीति तच्छब्दलाभः । 'पशुकाम उक्थ्यं गृह्णीयात्' 'षोडशिना वीर्यकामः स्तुवीत' इति पूर्वसमाप्त्युत्तरकालं चोद्यमानानां समाप्त्यन्तरव्यपदेशभाक्त्वं भवति । अन्ये त्वाहुः । ग्रहणादयोऽप्यत्र फलवत्समाप्त्यङ्गत्वेन प्राप्ता एवं साध्यसाधनसंबन्धविधिपरे वाक्ये निर्वपत्यालभतिवदनूद्यन्त इति । कुतः ।

संक्रान्तविधिसामर्थ्ये प्रत्यये धातुरुच्यते ।
तस्मान्नाम्नः फलं ह्येतद्भवेदिन्द्रियकामवत् ॥

ननु च 'उक्थ्यं गृह्णीयात्' इति सामानाधिकरण्यप्रयोगान्नामापि ग्रहणादीनामेव स्यात् । नैतदेवम् । उक्थ्यस्तोत्रसंबन्धाद्धि समाप्तिरेवोक्थ्यशब्देनोच्यते, तत्संबन्धाद्ग्रहण उपचर्यते । न च मुख्यसंभवे गौणः परिगृह्यते । नित्यं तु यज्ञसामानाधिकरण्येनोक्थ्यादीना प्रयोगो दृश्यते, 'उक्थ्येन यजेतोक्थ्यो यज्ञः' इति । तथा 'षोडशिना यजते षोडशी यज्ञः' । स[3] वै षोडशी नाम यज्ञोऽस्तीति । स चात्यन्ताव्यतिरिक्तसमाप्तिवचनत्वेऽवकल्पते न ग्रहस्तोत्रवचनत्वे । षोडशीति च पुंलिङ्गः समाप्तिवचन एवोपपद्यते । नपुंसकलिङ्गस्य स्तोत्रवचनत्वात् । यस्तु पुंलिङ्गप्रयोगः स्तोत्रे क्वचिद्दृश्यते यथा 'एकविंशः षोडशी' इति, स गौण इति प्रतिपत्तव्यम् । इह वाक्यशेषे पुंलिङ्गः षोडशी प्रतीयत इति संस्थावचनः । 'अतिरात्रेण प्रजाकामम्' इति विस्पष्टमेव संस्थावचनत्वम् । न हि तत्र क्रियान्तरमुपात्तम् । यजिरपि च ण्यर्थोपसर्जनत्वेन श्रुतः क्लेशेन प्रधानीकर्तव्यः । तस्माद्रात्रिमतीत्य या समाप्तिः सा फलेन संबध्यते । यदि च ग्रहणस्तोत्रयोः फलसंबन्धः स्यात्ततस्तयोः क्रियात्वादाश्रयापेक्षा नास्तीति स्वतन्त्रयोरेव प्रयोगः प्राप्नोति । तत्र च प्रकरणाम्नानप्रयोजनमुक्थ्यादिशब्दप्रयोगश्च न ज्ञायेत । तस्मादपि समाप्तयः फलवत्यः । कथं तु प्राक् क्रतुसंबन्धात्समाप्तित्वमिति । केचि[4]त्तावदाहुः । 'सप्त सोमसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडश्यतिरात्रो वाजपेयोऽप्तोर्यामः' इति स्मरणात्सोममात्रसमाप्तिवचनत्वे सिद्धे कर्मान्तराण्यनादृत्य

---

१ अधिकरणं गच्छत्येवेति—अधिकरणविचारः संगच्छत एवेत्यर्थः । २ एवमपि 'संस्थास्तु समानविधानाः' इति सूत्रस्थसंस्थाशब्दानुपपत्तिं शङ्कते—संस्थाशब्द इत्यादिना । ३ नवै, नैवेति न क्वचिदुपलभ्यते । ४ प्रथमं तावद्याज्ञिकमतमाह—केचित्तावदित्यादिना ।

निविशते। कथम्। गुणादेवंजातीयके काम्ये फलनिर्वृत्तिः। पशुकाम उक्थ्यं गृह्णीयान्न ज्योतिष्टोमकाम उक्थ्यग्रहणकामो वा। यथा पशवो

सोमयागमात्रेऽपेक्षिते प्रकरणाज्ज्योतिष्टोमस्याऽऽश्रयत्वसिद्धिरिति। अन्ये तु मन्यन्ते। ज्योतिष्टोमस्य क्वचिदभ्यासविशेषे समाप्त्यनन्तरं विज्ञायते यदुत्पद्यमानमेवोक्थ्यादिव्यपदेशं लभते फलसंबन्धं च तत्र श्रुतिबलीयस्त्वात्प्रकरणलभ्यं क्रत्वर्थत्वं बाध्यते। यस्त्वाश्रयाश्रयिसंबन्धः सोऽनुगुणत्वादाश्रीयते।

अपरं दर्शनम्। उक्थ्यादिशब्दवाच्यं किमपि प्रथममेव फलेन संबध्यते। किं पुनस्तदित्यपेक्षायां वचनान्तरेण ज्योतिष्टोमस्य समाप्त्यनन्तरं विज्ञायते। यद्वाऽभ्यासविशेष एवायं वचनान्तराज्ज्योतिष्टोमस्यान्ते निविशमानः फलाय चोद्यते। तेन वा तस्मिन्वा क्रतुः संतिष्ठत इति संस्थाशब्देनाभिधीयते। केचित्पुनर्मन्यन्ते। संस्था नामान्त्ययागाभ्यासानन्तरं या क्रियोपरतिः साऽभिधीयते। न चाक्रियात्मकत्वात्तस्याः फलसाधनत्वं युक्तमतस्तदुपलक्षितोऽभ्यासश्चोद्यत इति। अन्ये त्वाहुः[1]। वचनस्यातिभाराभावादभावोऽपि चोद्यमानः फलसाधत्वेन नैव विरुध्यत इति। यथा 'अकुर्वन्विहितं कर्म' इत्यत्राकरणस्यासतः प्रत्यवायहेतुत्वम्। अथवाऽस्त्येवात्रौदासीन्यप्रतिपत्तिरूपः संकल्प इत्याविरोधः। इह च यथा गुणात्फलं भवति यथा च काम्यो गुणो नित्यमर्थं विकरोति तदिन्द्रियकामा[2]धिकरणगोदोहना[3]धिकरणाभ्यामुपसंहर्तव्यम्। तद्दर्शयति—**गुणादेवंजातीयके फलनिष्पत्तिः।** एवं हि श्रूयते '**पशुकाम उक्थ्यं गृह्णीयात्**'। **न ज्योतिष्टोमकाम उक्थ्यग्रहणकामो वा,** इत्यनेन क्रत्वर्थत्वं निराकरोति। क्रत्वर्थत्वे हि सति, अन्तरेणापि कामपदोपबन्धं तदुपकारकमेवैतत्कर्तव्यमिति विज्ञायते। यदि चोक्थ्यग्रहणस्वरूपमात्रं चिकीर्ष्येत ततोऽर्थादुक्थ्यग्रहणकामस्यैष विधिर्भवेद्यस्यैवं प्रार्थनमुक्थ्यग्रहणस्वरूपमात्रं कथं निर्वर्ततामिति। तत्तु द्वयमपि पशुकामोपादानादनवक्लृप्तम्। अतः काम्यत्वादस्ति गोदोहनन्यायेन विकारत्वम्। **तत्र कथमिति**—इतिकर्तव्यताकाङ्क्षायां ज्योतिष्टोमगृहीतेतिकर्तव्यताऽतिदिश्यते। कः पुनरिह प्रकारो येनेतिकर्तव्यता गृह्यते। यदि तावत्संनिधानं ततः समानविधानमेवाभ्युपगतं भवति। न ह्यतिदेशस्य संनिधिः कारणं, सारूप्यप्रभवत्वेन वक्ष्यमाणत्वात्[4]।

1. तत्र स्वमतमाह—अन्ये त्वाहुरित्यादिना। 2 (अ० २ पा० २ अ० ११)। 3 (अ० ३ पा० ६ अ० ३)। 4 वक्ष्यमाणत्वादिति—सप्तमाध्याय इति शेषः।

भवन्ति, तथा गृह्णीयादित्यर्थः । कथमिति यथावश्यमितिकर्तव्यताऽपेक्षितव्या, संनिधानान्नित्यस्येतिकर्तव्यतयेति मन्यते । कथं पुनर्येयमितिकर्तव्यता, सा नित्यस्येत्यवधार्यते, न पुनरस्यैव काम्यस्य

अथ कार्यापत्त्या, तत्रापि कारणान्तरत्वं निराकृतम्[1] । न च दीक्षणीयादयः संस्थाधर्माः । यतः कार्यापन्ने संस्थान्तरे भवेयुः । न ज्योतिष्टोमस्योक्थ्यादयः कार्ये वर्तन्ते । यतस्तद्धर्मान्प्रतिपद्यन्ते । एतेनातिदेशपक्षः प्रत्युक्तः । यो हि मन्यतेऽतिदेशेन धर्मा भविष्यन्तीति, तस्याप्यतिदेशकारणं सारूप्यं नास्तीति । यद्यप्यग्निष्टोमस्य संस्थया सामान्यमस्ति । ज्योतिष्टोमस्य तु न किंचिदुक्थ्यादिसारूप्यमित्यप्रकृतित्वम् । अत एव च भाष्यकारोऽपि **संनिधानादित्येतावन्मात्रमुक्त्वा** तूष्णींभूतः । तेन वक्तव्यमेतत् । उच्यते ।

अतिदेशोऽयमित्येतत्पुरस्तादेव साधितम् ।
न च सारूप्यमेवैकमतिदेशस्य कारणम् ॥

यथा ' दध्नेन्द्रियकामस्य ' इत्यत्र व्याख्यातं, विनाऽपि सारूप्येणान्यथा तत्फलाप्राप्तेरतिदेशो भवति । सारूप्यं हि प्रकृत्युपस्थापनद्वारेणोपयुज्यते नादृष्टोपकारनिर्वृत्त्या । तदिहान्तरेणापि सारूप्यमाश्रयत्वप्रतिपत्तिः संनिधानादस्त्येव । भाष्यकारोऽप्येतदेव संनिधानमाह, न दीक्षणीयादिसामीप्यम् । आश्रयत्वेन हि गृहीतो ज्योतिष्टोमः शक्नोति दीक्षणीयाद्यपूर्वजनितं स्वगतं व्यापारं बोधयितुमिति सिद्धोऽतिदेशः । आह । **कथं पुनर्येयमितिकर्तव्यता सा नित्यस्य, न पुनरस्यैव काम्यस्य, साधारणी वेति ।**

तत्र साधारणीत्येष न्याय्यः पक्षोऽस्य संमतः ।
काम्यस्यैवेति सोल्लुण्ठं पूर्वोक्ताक्षमयोदितम् ॥
यदि युक्त्या विनैवेयं नित्यस्येत्यभिधीयते ।
काम्यस्यैवेति किं नैतदयुक्ततरमुच्यते ॥
अथ त्वयुक्तियुक्तत्वान्नैवमभ्युपगम्यते ।
हन्त साधारणीत्येतत्सयुक्तिकमिहोच्यताम् ॥

यदि विनैव प्रमाणेन केवलनित्यार्थत्वं त्वमिच्छसि हन्त मदिच्छयाऽपि केवलकाम्यार्थत्वमेवास्तु । अथ पुनरिदमप्रमाणकमिति नाऽऽश्रीयते ततः प्रमाणवत्साधारण्यमिष्यतामिति । तत्रातिशयोक्तिमसहमानो भाष्यकारः साधारणपक्षे चोपकरिष्यतीति

१ निराकृतमिति—'नैमित्तिकमतुल्यत्वात्' इति सूत्रे, किं कार्यापत्तिरुपदेशातिदेशाभ्यामन्या, एतयोरेवान्तर्गता वा' इत्यादिना ग्रन्थेनास्माभिरिति शेषः ।

साधारणी वेति । उच्यते । यत्र यत्र गुणे कामो भवति तत्र तत्र क्रियायां साध्यमानायां, नान्यथा । सा तत्रेतिकर्तव्यता याऽन्विकमु-

निष्प्रमाणकमपि केवलकाम्यपक्षमेव तावन्न्यायेन निराकरोति—**यत्र यत्र गुणे[1] काम-स्तत्र तत्र क्रियायां साध्यमानायां नान्यथेति** । यदि नाम गुणैः स्वातन्त्र्येणेति-कर्तव्यतां ग्रहीतुं शक्नुयात्तत एवं स्यात् । स च कथं शक्नुयात्, यदि करणैरेवेति-कर्तव्यता संबध्येत । यदि च गुणानां स्वत एव भावनाविशेषणत्वं भवेत् । न तावत्क-रणैरितिकर्तव्यता संबध्यत इत्युक्तम्[2] । सहमनवमाद्ययोश्च वक्ष्यति भावयेत्कथमित्य-पेक्ष्य भवति न करणेन कथमिति । यस्यां तु भावनायां धात्वर्थाः करणं भवन्ति तस्यां ते वस्त्वन्तरनिरपेक्षाः पश्चात्तनमरुणैकहायनीन्यायलभ्यमितिकर्तव्यतासंबन्धं लभन्ते । य-स्यां पुनर्गुणानां करणत्वं तस्यां धात्वर्थविशेषाद्विना करणत्वानुपपत्तेः साध्यभूतो धात्वर्थोऽ-परोऽपेक्षितव्यः । न हि व्यापारसामान्यस्य गुणैरुत्पत्तिः शक्या । न च क्रियाविशेषमसाधयन् गुणः सामान्यसाधनत्वं भजते । तेन यस्यां भावनायामवस्थितो गुण इतिकर्तव्यतां गृह्णाति तस्यां प्रथमतरसंनिविष्टो धात्वर्थो दृश्यते । ततश्च तेन तावत्सह प्रथमतरमरुणैकहायनीव-न्नियमः । यदि हीतिकर्तव्यताग्रहणयोग्यः स न भवेत्ततो न गृह्णीयात् । स तु फल-वत्त्वादितिकर्तव्यताद्वारभूतभावनाविशेषणत्वाच्च न कथंचिन्न गृह्णाति । तत्र चतुष्टय-मप्यत्र प्रथमतरं ग्रहणं प्रयुङ्क्ते । भावना तावन्न धात्वर्थविशेषाद्विनेतिकर्तव्यतां शक्नोति ग्रहीतुम् । गुणोऽपि च न धात्वर्थमनुपनीय स्वतन्त्रः शक्नोति तन्निरपेक्षभावनारहित-त्वान्निर्विशेषस्य च करोत्यर्थमात्रस्याननुष्ठेयत्वादव्यापारत्वाच्च ग्रहीतुमित्या[3]श्रयति[4] । तथा, इतिकर्तव्यता गुणाभिमुखं गच्छन्ती न धात्वर्थमुल्लङ्घ्य शक्नोति गन्तुमिति तन्मुखे तावत्पतति । धात्वर्थोऽपि स्वयमितिकर्तव्यताकाङ्क्षः सन् गुणार्थमपि प्रस्थितामेतां ग्रहणसमर्थः सन्किमिति परित्यजेत् । अतोऽत्र फलाय चोदितानामुक्थ्यादीनां ज्योति-ष्टोमाश्रयत्वेनावगतानामितिकर्तव्यतामाकाङ्क्षतां प्रकरणेन दीक्षणीयादय उपनीयमाना मार्गान्तराभावादवश्यं तावज्ज्योतिष्टोममुखे पतन्ति । न ह्युक्थ्यादयः समाप्तिरूपास्तत्प-रिहारेण ग्रहीतुं समर्थाः । स्वमुखपतितांश्च न कथंचिज्ज्योतिष्टोमस्तानुपेक्षते । तद्दर्श-यति—**नासौ साध्यस्याभवन्ती साधनेन संबध्यते । स हीतिकर्तव्यताविशेष एवं चोद्यते, अनेन फलस्य साधनमुक्थ्यादि साधकं कुर्यादिति** । यथाऽसौ साधको भवति तथा कुर्यादित्यर्थः । ततश्च करोतिसंस्पर्शाद्भावनयैव संबन्धः । एवं च सति नास्ति स प्रकारो येन धात्वर्थं परिहृत्यानयेतिकर्तव्यतयोक्थ्यादयः साधकाः क्रियेरन् । **क्रियायाम-साध्यमानायाम्**—अननुगृह्यमाणायामित्यर्थः । ये तु तेनासाध्यमानायामिति—उक्थ्या-

१ गुण इति—काम्यो गुण इत्यर्थः । २ उक्तमिति—इन्द्रियकामाधिकरण इति शेषः । ३ ग्रहीतुमिति—इतिकर्तव्यतामित्यर्थः । ४ आश्रयति—धात्वर्थमिति शेषः ।

पनिपतति । सा साधनस्य वा साध्यस्य वेति संदिह्यमाना साध्यस्य भवितुमर्हति । नासौ साध्यस्याभवन्ती साधनेन संबध्यते । एवं हि स इतिकर्तव्यताविशेषश्चोद्यते । अनेन साधनं साधकं कुर्यादिति । न चास्ति स प्रकारो, येनासाध्यमानायां क्रियायां तेन साधकः कृतो भवेत् । तस्मात्साधकस्यापीतिकर्तव्यताविशेषमभ्युपगच्छता साध्यस्यापीत्येतदभ्युपगमनीयम्। साध्यश्च ज्योतिष्टोमः साधिकाः संस्थाः । तस्माज्ज्योतिष्टोमस्य तावत्सा, इतिकर्तव्यतेति सिद्धम् । अथ कस्मान्न साधारणी । नित्यवदाम्नानात् । यदैव ज्योतिष्टोमः, तदैव दीक्षा ।

दिनेति सबन्धयन्ति तेषां पूर्वप्रस्तुतेतिकर्तव्यताविशेषपरित्यागादसंबद्धत्वम् । तत्र च क्रियायां साध्यमानायामित्यनेन च पुनरुक्तत्वं स्यात् । तेन साधकस्यापि—गुणस्य, इतिकर्तव्यतामिच्छता साध्यस्यासौ—धात्वर्थस्य, इत्येतदभ्युपगन्तव्यम् । एवं सामान्यलक्षणमुक्त्वा संप्रति प्रस्तुते विशेषे योजयति साध्यश्च ज्योतिष्टोम इति। तस्मान्न तावत्केवलकाम्यार्थत्वम् । अथ कस्मान्न साधारणत्वमिति—बलवत्त्वेन द्वितीयपक्षोपन्यासः । सिद्धान्तवाद्याह । नित्यवदाम्नानादिति । सर्वत्र ह्येकरूप्ये सति तन्त्रसंबन्धो घटते, न च धर्मान्प्रति ज्योतिष्टोमस्य संस्थानां चैकरूप्यमस्ति । धर्मा हि कामनिमित्तसंयोगाभावान्नित्यवदाम्नायन्ते, यदैव ज्योतिष्टोमस्तदैव दीक्षणीयादयः प्रयोक्तव्या इति । सत्यपि च ज्योतिष्टोमे विना पशुकामादिनोक्थ्यादयो न संभवन्ति । न त्वेतासु ज्योतिष्टोमः कदाचिन्नास्ति । सर्वत्र समस्तात्मना प्रत्येकं जातिवत्समवेतत्वात् । अत एते[2] यथाम्नाता ज्योतिष्टोमेन सह संबध्यन्ते, नानित्याभिः संस्थाभिः । ननु सत्यप्यासामनित्यत्वे ज्योतिष्टोमस्यैकस्य नित्यत्वान्नित्यवद्धर्माम्नानं नित्यार्थत्वे न विरोत्स्यते । नित्याम्नानं तावत्तं प्रति कृतार्थं भविष्यति । यदि तु तस्मिन्सत्येवानित्योऽप्यपरः संबन्धः कल्प्यते किं नो बाध्यते । यो ह्यनित्यार्थमेव नित्यवदाम्नायते स विरुध्यते नैवंजातीयक इति । नैतदेवम् । एवं सति तन्त्रं तावत्परित्यक्तम्, अप्रयोजकलक्षणापन्नत्वात् । यदा हि नित्यवदाम्नानं नित्यार्थत्वेन तावद्विना न भवति क्लृप्ते च तादर्थ्ये निराकाङ्क्षीभूते पाठे प्रसङ्गादितरसंबन्ध इति न सामानविध्यम् । इतरथा ह्येवं धर्मविधिः स्यात्, नित्यमेतान् ज्योतिष्टोमे धर्मान्कुर्यात्कदाचिच्च यदा पशुकामादयो भवन्तीति, तच्च

१ दीक्षते दीक्षणीयेति पा० । २एते—दीक्षणीयादयो धर्मा इत्यर्थः ।

यदा तु ज्योतिष्टोमे पशुकामस्तदोक्थ्यसंस्था । सर्वदा ज्योतिष्टोमे धर्माः कर्तव्याः । एकदोक्थ्यसंस्था । तत्र सर्वदा ज्योतिष्टोमस्य धर्माः कर्तव्याः । ते चोक्थ्यादिसंस्थस्यार्थेनेति पूर्वमुत्तरेण विरुध्यते, यदि सर्वदा, नोक्थ्यादीनामर्थेन । अथोक्थ्यादीनामर्थेन, न सर्वदा, उभयं विप्रतिषिद्धम् । तस्मान्न साधारणी । नित्यवदाम्नानं च यद्यनित्यस्य स्यात्, नित्यवदाम्नानं तदनित्यं क्रियेत । तत्र नित्यवदाम्नानं बाध्येत । तस्मान्नित्यसंस्थस्य[1] ज्योतिष्टोमस्य, न काम्यस्योक्थ्यादिसंस्थस्येति ॥ ४३ ॥

अपि वा द्विरुक्तत्वात्प्रकृतेर्भविष्यन्तीति ॥ ४४ ॥

नन्वग्निष्टोमसंस्थाऽपि काम्या श्रूयते । द्वे हि तत्राऽऽम्नाने । एकं नित्यवदेकं काम्यम् । तत्र द्वयोर्वाक्ययोः सामर्थ्यान्नित्य एव स कामो भविष्यति । नित्यताविघातो नास्तीत्यग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य दीक्षणीयादयो धर्मा भविष्यन्तीति ॥ ४४ ॥

विप्रतिषिद्धमेकस्य विधानस्य । ननु द्वावेतौ प्रकरणाम्नानानुमितौ विधी । तयोरेको नित्यवद्विधास्यति, अपरश्चानित्यवदिति । सत्यं प्रयोगवचनयोर्भेदादविप्रतिषेधः । प्रयोज्यवचनानि तु नित्यानित्यप्रयोगवचनानुविधानाद्विप्रतिषिध्यन्ते । तेनैषां नित्यत्वाविघातमिच्छताऽवश्यं ग्राहकमपि तद्रूपमेवाभ्युपगन्तव्यम् । अतश्चाव्यभिचाराज्ज्योतिष्टोमार्थत्वमेव युक्तमिति । नन्वग्निष्टोमसंस्थाऽपि काम्येति—यदा सर्वसंस्थानामनित्यत्वं, न च तद्व्यतिरिक्तं नित्यं किंचिज्ज्योतिष्टोमरूपमस्ति तदा ज्योतिष्टोमेन नित्यवद्ग्रहणात्तद्द्वारभूतेन तुल्यकल्पमेव सर्वासां धर्मोपनयनमिति क्व नित्यः प्रयोग इत्यनवधारणात्केवलानित्यार्थं बलाद्वैकल्पिकन्यायेन भविष्यतीत्यत आह—स नित्यस्य समत्वादिति । समौ हि क्रत्वर्थपुरुषार्थौ विधी । तौ हि द्वावालोच्य 'एकस्य तूभयत्वे संयोगपृथक्त्वम्'[2] इत्येवमग्निष्टोमान्तस्य नित्यस्यैव कामसंयोग इति । इतरस्य तु केवलकामसंयोगादनित्यत्वमिति विशेषः । तेन यद्यपि प्रयोगेणेयमनित्या तथाऽपि ज्योतिष्टोमस्य नित्यत्वादेतस्याश्च तं प्रति प्राप्तिरूपेण नित्यत्वात्तद्गृहीतधर्मपरमागलाभाच्चाग्निष्टोमस्येत्येवं धर्माणां व्यपदेशः । अथ वोक्थ्यादिष्वपि प्राप्तिद्वये सति ज्योतिष्टोमांशेन या प्राप्तिः सोपदेशेन, योक्थ्यांशेन साऽतिदेशात्मिकेति विवेकः ॥ ४३ ॥ ४४ ॥

---

१ नित्यसंस्थस्येति—अग्निष्टोमसंस्थस्य ज्योतिष्टोमस्येत्यर्थः । २ (अ० ४पा० ३ अ० ३ सू० ५)

वचनात्तु समुच्चयः ॥ ४५ ॥

अथ यदुक्तं, द्वितीयतृतीयदर्शनं समानविधित्वेऽवकल्पते नान्यथेति। वचनं तद्भविष्यति, न दर्शनम्। ऐन्द्राग्न उक्थ्ये द्वितीयो विधीयते। तथैन्द्रः षोडशिनि तृतीयः ॥ ४५ ॥

प्रतिषेधाच्च पूर्वलिङ्गानाम् ॥ ४६ ॥

इतश्च पश्यामः प्रकृतिविकारभाव इति। कुतः। प्रतिषेधात्पूर्वलिङ्गानाम्। यद्यग्निष्टोमो जुहोति, यद्युक्थ्यः, परिधिमनक्ति, न जुहोतीति होमाभावदर्शनं न स्यात्। प्राप्ते निमित्ते वचनप्रामाण्यात्सामानविध्ये।

गुणविशेषादेकस्य व्यपदेशः ॥ ४७ ॥

अथ यदुक्तं व्यपदेश इति। एकस्यैवाधिकृतस्य यथोक्तेन न्याये-

विशिष्टविधानस्य नातिभारः ॥ ४९ ॥

क्रतुकरणेषु चोत्तरविधौ यत्पूर्वाभावमनुवदति स विकारपक्षेऽवकल्पते। चोदकप्राप्तस्य चोत्तरेण पूर्वस्य बाधितत्वात्। सामानविध्ये हि प्रत्यक्षनिमित्तसंनिधानात्प्राप्ते निमित्ते नैमित्तिकमवश्यं कर्तव्यमिति समुच्चयः स्यात्। तत्र प्रतिषेधः पृथग्विधेरुपगम्यमानो वाक्यं भिन्द्यात्। न ह्यत्र द्वितीयतृतीयादिवद्विशिष्टविधिरवकल्पते। विधिप्रतिषेधयोर्विप्रतिषेधात्, पर्युदासासंभवाच्च। सर्वश्चेह सवनीयपशुविषयः पूर्वपक्षवाद्युक्तो न्यायः सिद्धान्तत्वेनानुसंधातव्यः। संस्थानिमित्तत्वे हि सामानविध्येऽपि निमित्ताभावादभावदर्शनमुपपद्यतैव। सिद्धान्तेऽपि चादृष्टार्थत्वात्समुच्चयप्रसङ्गे सति क्रतुकरणसमाख्या प्रकृतिलिङ्गमिति योज्यम्। केचित्पुनराहुः। प्रचरणीहोमशेषप्रतिपत्तिवद्धोमस्य परिध्यञ्जनेन प्रतिपादिते सामानविध्येऽप्यभावः सिध्यतीति। तत्र तु वाक्येन स्वतन्त्रे विधीयमाने कथमप्रस्तुतं प्रतिपत्तित्वमवगम्यत इति वक्तव्यम्। सत्यपि च होमेन प्रतिपादने यावता परिध्यञ्जनशब्दार्थो निर्वर्तते किंचिच्च श्रुत्योच्यते तावत्पुनः संभवत्येव। तस्माद्यथोक्तेन न्यायेन दर्शनमेवेदमभावसंकीर्तनम् ॥ ४६ ॥

यत्त्वप्रकृतस्य यदिशब्दोपबन्धो द्वादशाहादिवन्नावकल्पत इति। नोक्थ्यादीनामन्यैरप्रकृतैस्तुल्यता। यद्यपि ह्येषां नित्यानित्यसंयोगविरोधात्प्रकरणमग्राहकमितिकर्तव्यताचास्तथाऽपि संनिहितत्वाद्यदिशब्दव्यपदेशं लभन्ते। प्रस्तुतगुणिद्वारेण वाऽप्रस्तुतानामपि गुणानां प्रस्तुतव्यवहारः संगच्छति। प्रकरणप्राप्तं त्वग्निष्टोमग्रहणं नित्यानुवादः। अथवा स्तोत्रनिमित्तत्वप्रतिपादनपरत्वादर्थवदेवेत्यदोषः। किं भवति प्रयोजनम्। फलचमसवदे-

---

१ सामान्यविधेरिति पा०।

नाथमनधिकृतेन गुणेन व्यपदेशः । अग्निष्टोमग्रहणं चानुवाद इति ॥ ४७ ॥

इति श्रीशबरस्वामिकृतौ मीमांसाभाष्ये तृतीयस्याध्यायस्य षष्ठः पादः ।

अथ तृतीयेऽध्याये सप्तमः पादः ॥

---

[१] प्रकरणविशेषादसंयुक्तं प्रधानस्य ॥ १ ॥ पू०

स्तो दर्शपूर्णमासौ, तत्र बर्हिर्बर्हिर्धर्माश्च, तथा वेदिर्वेदिधर्माश्च । तत्र संदेहः । किं बर्हिरादयो बर्हिरादिधर्माश्च प्रधानस्योताङ्गप्रधानानामिति । किं तावत्प्राप्तम् । प्रकरणविशेषादसंयुक्तं प्रधानस्य । प्रधानस्यैवंजाती·

देवेति केचित् । इदं तु वक्तव्यम् । सत्यमेतत्प्रयोजनं न तु सर्वधर्मेषु । यावन्तो हि सदोमानादिषु गुणकामास्ते सत्यप्यतिदेशे स एवौपदेशिक आश्रयोऽस्तीति न विकृत्यन्तरवद्विहन्यन्ते । विकृत्यन्तरेषु हि ज्योतिष्टोमस्याऽऽश्रयस्याभावाद्गुणकामा यथाश्रुता न भवन्तीति न सिध्यन्ति । संस्थासु तु यद्यप्यङ्गफलं नातिदिश्यते तथाऽपि स्वयमार्थित्वात्पुरुषस्य चिकीर्षमाणस्य गुणोपादित्सायां यथाश्रुताश्रयसंभवे नानुपपत्तिर्गुणकामानाम् । अतो यन्मात्रमुक्थ्यादिसंस्थानिमित्तमुक्थ्यग्रहणस्तोत्रशस्त्राद्यप्राकृतं तत्र यदितरग्रहस्तोत्रशस्त्रधर्मातिदेशेन किंचिद्गुणकामगतं प्राप्नोति तन्न भवतीति प्रयोजनम् । तथेदमपरं, यदि समानविधानं तत 'अव्यक्तासु तु सोमस्य'[1] इत्यनेन न्यायेन ये ज्योतिष्टोमविकारा विज्ञायन्ते तेषु सर्वाः संस्था विकल्पेरन्[2], सिद्धान्ते त्वग्निष्टोमसंस्थैवैका प्रवर्तते । यत्र चोक्थ्यादिविशेषचोदना तत्रैव केवलं तद्धर्मप्राप्तिरिति प्रयोजनं सिद्धम् ॥ ४७ ॥

(इति–गुणकामानामाश्रयेण सह सामानविध्याभावाधिकरणम् ॥ १६ ॥)

इति श्रीमद्भट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
तृतीयाध्यायस्य षष्ठः पादः ।

समानासमानविधानाधिकारेणैवैतदपि प्रस्तूयते वाक्यप्रकरणविरोधाविरोधद्वारेण । दर्शपूर्णमासप्रकरणस्था वेदिः तद्धर्माश्च खननादयस्तथा बर्हिस्तद्धर्माश्च लवनादयः किमर्था इति । यद्यपि 'वेद्यां हवींषि' 'बर्हिषि हवींषि' 'बर्हिर्लुनाति' 'वेदिं खनति' इति चाविशेषितेन वाक्येनाङ्गप्रधानार्थत्वबुद्धिर्भवति । तथाऽपि स्वातन्त्र्ये

---

१ (अ० ८ पा० १ अ० ९ सू० १६)। २ प्रवर्तेरन्न इति शेषः । धर्मप्रदेशका भवन्तीति यावत् ।

यका धर्माः । कस्मात् । प्रकरणविशेषात् । प्रधानानां हि प्रकरणं, नाङ्गानाम् । प्रकरणेन चैषां संबन्धः । तस्मात्प्रधानस्य ॥ १ ॥

सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात् ॥ २ ॥ सि०

सर्वेषां वाऽङ्गप्रधानानामिमे धर्माः । नात्र शेषत्वं प्रकरणाद्भवति ।

सति लौकिकेष्वपि गृहाच्छादनार्थेषु बर्हिःषु धर्मप्रसक्तावानर्थक्यादवश्यमपूर्वसाधनताकारितः संबन्धोऽभ्युपगन्तव्यः । सा चापूर्वसाधनता न वाक्यसामर्थ्येन प्रतीयत इति प्रकरणाल्लब्धव्या । ततश्च प्रधानमात्रस्य तत्प्रकरणमित्यनेन[1] विशेषेण प्रधानस्यैव धर्मा गम्यन्ते । सत्यपि च प्रकरणस्याविशेषकत्वे ग्राहकत्वेनैव विशेषरूपेण विनियोजकत्वाद्विशेपस्थापनहेतुत्वमित्युक्तम्[2] । असंयुक्तमिति च सत्यपि वाक्येन हविर्बर्हिःसंयोगे प्रकरणविरोध्यर्थासंयोगाभिप्रायम् । शक्यौ हि हविर्बर्हिःशब्दौ प्रकरणेन समावेशयितुं नाहीनवदसंबद्धाविति मन्यते । ॥ १ ॥

सर्वेषां वाक्यसंयोगाविशेषादित्युक्तमेव । यत्तु प्रकरणं विशेषेण विनियोजकमिति, तत्राऽऽह—अतत्प्रयुक्तत्वात् । न प्रकरणमिह विशेषकं भवतीत्यर्थः । कथं पुनः स्थितं प्रकरणस्य विनियोजकत्वं निवर्तते, कथं वा तादर्थ्यलक्षणव्यतिरिक्तं च बहुदोषमुपकारलक्षणं[3] शेषत्वं प्रतिज्ञायते । उच्यते । नैव प्रकरणस्यैवंजातीयकेषु विनियोजकत्वं स्थितम् । 'असंयुक्तं प्रकरणात्'[4] इति ह्युक्तम् । यत्तु विरोधो नास्तीति । कथं नास्ति, यदा बर्हिषां प्राधान्यात्प्रत्येकं धर्मसंबन्धे सति अङ्गार्थत्वमपि ज्ञायमानं प्रकरणानुरोधेन व्यावर्त्यते । परस्तु येन कारणेन वाक्यस्यातिप्रसरे बाधिते निर्विरोधं प्रकरणमवगतवानिदानीं तदुपन्यस्यति लौकिकेऽपि प्राप्नोति ततश्चाऽऽनर्थक्यमिति । तस्योत्तरमेतदेव वक्तव्यम् । स्वरसप्रवृत्तं वाक्यं यावत्येव विस्पष्टमानर्थक्यं तावन्मात्रादेव निवर्तताम् । न चाङ्गबर्हिषां लौकिकवदानर्थक्यम् । अतस्तत्र भविष्यति । न

१ तत्प्रकरणमिति—दर्शपूर्णमासप्रकरणमित्यर्थः । २ (अ० ३ पा०४ अ० ५) गृह्यमाणाधिकरणे भाष्यकृद्भिरिति शेषः । ३ बहुदोषमुपकारलक्षणं शेषत्वमिति । अयमाशयः । यद्युपकारकत्वं शेषत्वं तदा कृष्यादीनामपि परम्परया यागाद्युपकारकत्वाद्यागाङ्गतापत्तिः । यदि विहितत्वघटितं तद्विवक्ष्यते तदाऽपि 'गोदोहनेन पशुकामस्य प्रणयेत्' इति वाक्येन पश्वङ्गतया विहितस्य गोदोहनस्य प्रणयनोपकारकत्वात्तदङ्गत्वापत्तिः । अथान्यानुपकारकत्वघटितं तदा गोदोहनस्य प्रणयनान्यपशूपकारकत्वान्नातिप्रसङ्ग इति चेत् । गोदोहनस्य पश्वङ्गत्वमेव न स्यादित्यादिबहुदोषग्रस्तत्वादवश्यं परोद्देशप्रवृत्तकृतिकारकत्वेन विहितत्वरूपमेव शेषत्वं निर्वाच्यमिति । ४ (अ० ३ पा० ३ अ० ४ सू० ११) ।

उपकारलक्षणं हि तत्। यद्यस्योपकरोति, तत्तस्य शेषभूतम्। सर्वेषां चाङ्गप्रधानानामिमे धर्मा उपकुर्वन्ति। कथमवगम्यते। वाक्यात्। वेद्यां हवींष्यासादयति, इति हविर्मात्रं वाक्याद्गम्यते। प्रधानहवींषि प्रकरणात्। वाक्यं च प्रकरणाद्बलीयः। तस्माद्बर्हिषि हवींष्यासादयतीति। आह। यदि प्रकरणं वाक्येन बाध्यते, लोकेऽपि बर्हिषामिमे धर्मा उक्ता भवन्ति। तत्र को दोषः। सर्वत्र धर्माः कर्तव्याः प्राप्नुवन्ति। उच्यते। प्रकरणाद्दर्शपूर्णमासयोरुपकारका एवेति गम्यते। तस्माल्लौकिकेषु न कर्तव्याः। एवं चेदङ्गान्यपि न दर्शपूर्णमासशब्दकानि। तस्मात्तेष्वपि न प्राप्नुवन्ति। उच्यते। यद्यप्यङ्गानि न दर्शपूर्णमासशब्दकानि, दर्शपूर्णमासयोरुपकारकाणि। एषु क्रियमाणा धर्मा दर्शपूर्णमासयोरुपकरिष्यन्ति। तस्मादङ्गप्रधानेषु कर्तव्या इति ॥ २ ॥

आरादपीति चेत् ॥ ३ ॥

पिण्डपितृयज्ञेऽपि बर्हिर्धर्मैर्युज्येत। सोऽपि दाते बर्हिषि वर्तते। तस्य चापि बर्हिषाऽस्ति प्रयोजनम्। तदप्यारान्निःछ्टधर्मवत्स्यात् ॥ ३ ॥

न तद्वाक्यं हि तदर्थत्वात् ॥ ४ ॥

न तस्य बर्हिरेतैर्धर्मैर्धर्मवत्। वाक्यं ह्येकं दर्शपूर्णमासाभ्यां सह

चातिप्रसज्यत इति। अनेनैव चाभिप्रायेण, उपकारलक्षणं हि तदिति तादर्थ्यमेव फलेन व्यपदिष्टम्। यदर्थं हि कल्प्यमानं प्रयोजनवद्विज्ञातुमाकाङ्क्षितोपकारानिष्पत्त्या शक्यते तदर्थं कल्पनीयम्। यत्तु भाष्यकारेणातिप्रसङ्गनिवृत्त्यर्थं प्रकरणादित्युक्तं तदुत्तर[1]परिचोदनानवतारप्रसङ्गादतित्वरितोक्तमित्युपेक्षणीयं तावत् ॥ २ ॥

यदि ह्यानर्थक्याल्लौकिकाद्बर्हिषो धर्मनिवृत्तिस्ततो यत्र तदानर्थक्यं नास्ति कर्मान्तरार्थे बर्हिषि, तत्र प्रवृत्तिः प्राप्नोति। यदि तु कश्चित्तन्निवृत्त्यर्थो हेतुः सोऽङ्गेष्वप्यविशिष्टः। तत्र सौर्यादिष्वितरथाऽप्यतिदेशेन सन्त्येव धर्मा इत्युपदेशातिदेशप्राप्तिरहितत्वात्पिण्डपितृयज्ञ उदाहरणम्। अपूर्वो ह्ययमनङ्गं चेति स्थास्यति। तेनात्यन्तानिष्टप्रसङ्ग इति ॥ ३ ॥

भवेदेतद्यदीदं वाक्यं स्वतन्त्रं स्यात्। बर्हिर्वेदितद्धर्माणां तु यद्वाक्यं तद्दर्शपूर्ण-

---

१ उत्तरपरिचोदनेति–'आरादपीति चेत्' इत्यनेन क्रियमाणपरिचोदनेत्यर्थः। अत इदं भाष्यं 'न तद्वाक्यं हि तदर्थत्वात्' इत्यत्रोत्कृष्य व्याख्येयमित्याशयः। २ (अ० ४ पा० ३ अ० ८ सू० २९) इत्यत्रेति शेषः।

धर्माणाम् । तेन दर्शपूर्णमासयोरुपकारका धर्माः, यद्दर्शपूर्णमासार्थं, तत्र प्राप्नुवन्ति, नान्यत्र । तस्मात्पिण्डपितृयज्ञबर्हिषो न भविष्यन्ति ॥ ४ ॥

मासाभ्यां सहैकम् । तेन वाक्येन सहैकवाक्यतां गतमित्यर्थः । तेन यत्तदेकवाक्यान्तर्गतं बर्हिस्तस्यैवैतद्धर्मप्राप्तिर्न भिन्नवाक्यगतस्य । न च पिण्डपितृयज्ञबार्हिर्दर्शपूर्णमासवाक्यान्तर्गतम् । अतो न संभन्त्स्यत इति । ननु यदि दर्शपूर्णमासाभ्यां सहैकवाक्यत्वमिष्यते ततस्तत्प्रकरणं मुक्त्वा नान्येन लभ्यते । तच्च प्रकरणं प्रधानमात्रस्यैवेत्यङ्गानामसंबन्धः प्राप्नोति । नैष दोषः । सर्वथा लवनलूननादयस्तावन्न साक्षादङ्गेन प्रधानेन वा संबन्धुं शक्नुवन्ति । यत्र वेदिबार्हिषी तत्र गमिष्यन्ति । वेदिबार्हिषोरपि हविरासादनेन संबन्धः । तच्च दर्शपूर्णमासप्रयोगवचनगृहीतमासादनं संबध्यते । एवमङ्गहविरासादनमपि तत्रान्तर्गतं, साङ्गस्य प्रधानस्यैकप्रयोगत्वात् । ननु च यथा प्रयाजादय एकप्रयोगवचनगृहीतत्वेऽपि 'गुणानां[1] च परार्थत्वात्' इत्येवं परस्पराङ्गत्वं न प्रतिपद्यन्ते तथाऽङ्गहविःसंबन्धं बार्हिर्न प्रतिपद्यते । नैतदेवम् । यथैव हि प्रधानहविरासादनमङ्गतया संबध्यते तथाऽङ्गहविरासादनमप्यङ्गाङ्गतया संभन्त्स्यते । यदि च यद्दर्शपूर्णमासार्थं हविस्तद्बार्हिष्यासादयतीत्येवं कल्प्येत ततस्तन्मात्रस्यैव स्यान्न त्वेवम् । अस्याऽऽनर्थक्यभयात्तु स्वरूपेऽतिक्रम्यमाणे किमेवमतिक्रमोऽस्तु यद्दर्शपूर्णमासार्थमुत यद्दर्शपूर्णमासोपकारीति । यदि तादर्थ्यं गृह्यते वाक्यस्यातिदूरं संकोचः क्रियेत । तदुपकारित्वग्रहणे तु बहुतराविषयत्वं भवति । यथा च तद्भवति तदनुग्रहीतव्यम् । अङ्गाङ्गमपि विनाऽपि तादर्थ्येन तदुपकारीति विज्ञायते । तावन्मात्रमेव च तद्द्वारं युक्तं न तादर्थ्यम् । अनुपकारिणि हि स्थितं नोपकरोति नातदर्थे । तथा च 'परार्थे[2] त्वर्थसामान्यम्' इति वक्ष्यति[3], विनाऽपि तादर्थ्येनाभ्युदितेष्ट्यां[4] दधिपयसोस्तदुपकारमात्रदर्शनात्प्रणीताधर्मप्राप्तिर्भवतीति । तस्मादेवं प्रकरणादेकवाक्यत्वं कल्प्यते यस्मिन्नक्रियमाणे दर्शपूर्णमासापूर्वं न सिध्यति तत्र तत्र कर्तव्या इति । अङ्गहविर्भिरपि च विगुणैः प्रधानापूर्वं न निष्पद्यते । तस्मात्प्रधानापूर्वप्रयुक्तानामेवाङ्गेष्वपि क्रिया युक्तेति ॥ ४ ॥

---

१ (अ० ३ पा० १ अ० १२ सू० २२)। २ (अ० ९ पा० २ अ० १४ सू० ४४)। ३ इति वक्ष्यति—इति सूत्रेण पूर्वपक्षयित्वा 'क्रियेरन् वाऽर्थनिवृत्तेः' इति सिद्धान्तसूत्रेण वक्ष्यतीत्यर्थः । ४ अभ्युदितेष्ट्यामिति—'यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात्, स त्रेधा तण्डुलान्विभजेत् । ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत् । ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं, येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम्' इति वाक्येन दर्शपूर्णमासयोरकालोपक्रमनिमित्तदोषपरिहारार्थतया विहितायामभ्युदितेष्टावित्यर्थः ।

लिङ्गदर्शनाच्च ॥ ५ ॥

लिङ्गं भवति । एवमाह । स वै ध्रुवामेवाग्रेऽभिघारयति, ततो हि प्रथमावाज्यभागौ यक्ष्यन् भवति, इत्यभिघारणस्याऽऽज्यभागार्थतां दर्शयति ॥ ५ ॥

[२] फलसंयोगात्तु स्वामियुक्तं प्रधानस्य ॥ ६ ॥ सि०

ज्योतिष्टोमे केशश्मश्रुणोर्वपनं पयोव्रतानि तपश्चाऽऽम्नातानि । तेषु संदेहः । किमङ्गप्रधानार्थानि, उत प्रधानार्थानि । किं तावत्प्राप्तम् । अङ्गप्रधानार्थानीति पूर्वेण न्यायेन प्राप्तम् । एवं प्राप्ते ब्रूमः । स्वामियुक्तमेतत् । तस्मात्प्रधानस्य । कस्मात् । फलसंयोगात् । पुरुषस्य यागेनायं संबन्धः । यागोऽपूर्वस्य दाता । पुरुषः प्रतिग्रहीता । नन्व-

---

यदि चैवंजातीयकमङ्गप्रधानार्थं ततः ' प्रयाजशेषेण हवींष्यभिघारयति ' इत्येतदङ्गप्रधानार्थम् । तत्र च क्रमवाक्येष्वयं क्रमो न्यायप्राप्तः सिद्धवदुच्यमानो हेतुवन्निगदोऽर्थवत्त्वादुपपद्यते ' स वै ध्रुवामेवाग्रेऽभिघारयति ' । कुतः । ' ततो हि प्रथमावाज्यभागौ यक्ष्यन्भवति ' इति । यद्याज्यभागहविरप्यभिघारणीयं तत एवं वक्तव्यम् । अन्यथा हि ध्रुवायामुपांशुयाजार्थेन केवलमभिघारणं स्यात् । तत्र न चाग्रेऽभिघारणं स्यात् । न च ' ततो हि प्रथमावाज्यभागौ ' इति हेतुः समर्थ्येत । तस्मात्सर्वार्थत्वमिति ॥ ५ ॥

(इति— बर्हिरादीनामङ्गप्रधानसाधारण्याधिकरणम् ॥ १ ॥)

' याजमानास्तु तत्प्रधानत्वात्कर्मवत् '[1] इत्यनेनाधिकरणेन येषां याजमानत्वं सिद्धं ते किं यजमानस्य कर्तृत्वांशेनाङ्गप्रधानार्था उत भोक्तृत्वांशेन केवलप्रधानार्था इति । किं प्राप्तं । पूर्वेणाधिकरणेन सर्वार्थत्वम् । सर्वार्थे हि यजमानेऽवस्थिताः शक्नुवन्ति सर्वेषामुपकर्तुम् । न च व्यावृत्तिकारणमस्तीति प्राप्तेऽभिधीयते ।

येनैव हेतुनैतेषां स्वामिगामित्वनिश्चयः ।
तेनैव तु प्रधानार्थप्रतिपत्तिरपि स्फुटा ॥

यदि ह्येते कर्तृत्वांशपातिनो भवेयुस्ततः सर्वार्थत्वं प्रतिपद्येरन् । भोक्तृत्वांशस्थास्त्वेते । स हि तैर्विना नोपपद्यते[2] । कर्तृत्वं तु तदभावेऽपि यथा भवति तथा सर्वलो-

---

१ (अ० ३ पा० ८ अ० २ सू० ४) । २ नोपपद्यत इति—भोक्तृत्वांशस्यादृष्टरूपत्वेनानिर्ज्ञातप्रकारत्वादिति शेषः ।

परोऽप्यस्ति संबन्धः । यागो निर्वर्त्यः, पुरुषोऽभिनिर्वर्तक इति । फलेन तु संबन्धो भविष्यतीत्येवमर्थः पुरुषः श्रूयते । न हि यागं स साधयति । यागः सत्तया संभन्त्स्यत इति । किमिति तर्हि । निर्वर्तयतः फलं भवतीति । संस्काराश्च संस्कुर्वन्तीत्युच्यन्ते । यत्तस्य संस्कर्तव्यस्य प्रयोजनं, तत्र सामर्थ्यं जनयन्तीति । फलं च ग्रहीतुं पुरुषस्य प्रयोजनं, न यागमभिनिर्वर्तयितुम् । तस्माद्ये पुरुषसंस्कारास्ते पुरुषं फलप्रतिग्रहणसमर्थं कुर्वन्ति, न यागनिर्वृत्तिसमर्थम् । आह । यदि यागनिर्वृत्तौ न सामर्थ्यं जनयन्ति, कथं तर्हि यागधर्मास्ते भवन्ति । उच्यते । यागस्य स्वार्थं साधयतः साहाय्ये वर्तन्ते । कश्च तस्य स्वार्थः । यदस्य कर्ता फलेन संबध्यते । तस्मात्स्वामिसंस्काराः प्रधानार्था इति ॥ ६ ॥

[३] चिकीर्षया च संयोगात् ॥ ७ ॥ पू०

ज्योतिष्टोमे श्रूयते, षट्त्रिंशत्प्रक्रमा प्राची, चतुर्विंशतिरग्रेण, त्रिंशज्जघनेन इयति शक्ष्यामहे, इति । तत्र संदेहः । किमेषा वेदिरङ्गप्रधानार्था, उत प्रधानार्थेति । किं तावत्प्राप्तम् । चिकीर्षया च संयोगात्,

---

कप्रत्यक्षम् । ऋत्विजामपि च तत्संभवान्नैव तेभ्यो निवृत्तिः स्यात् । अभीष्टे चार्थे योग्यताधानमाकाङ्क्षति । यत्र च योग्यत्वमनुपजातम् । न तु यजमानस्य कर्तृत्वस्वरूपमभीष्टम् । न च प्रागेभ्यो न निष्पन्नम् । योग्यतां चाऽऽदधानाः क्रियाः संस्कारा इत्युच्यन्ते । तस्माद्द्वोक्तृत्वांशं भजन्ते । यस्य च कर्मणः फलं यजमानेन भुज्यते तद्देशस्थास्तस्यैवोपकर्तुं शक्नुवन्ति नान्यस्य । प्रधानस्य फलं पुरुषैर्भुज्यते नाङ्गानां, क्रत्वर्थत्वात् । तस्मात्प्रधानस्यैवंजातीयकाः । आह । यदि क्रतोर्निर्वर्तकांशे न पतन्ति तत्[१], फलस्यैवाङ्गं प्राप्नुवन्ति । नैष दोषः । एष एव हि प्रधानस्योपकारो यदस्य फलग्रहणाय योग्यः कर्ता क्रियते । ततश्च यथैवान्यान्यदृष्टार्थान्यङ्गानि[२] फलयोग्यतामपि कुर्वन्ति नाङ्गत्वात्प्रच्यवन्ते तथैवैतेऽपि[३] द्रष्टव्याः । प्रयोजनमग्नीषोमीयादिविकारेषु गमनं वपनादीनामगमनं सिद्धान्ते ॥ ६ ॥

(इति—यजमानसंस्काराणां प्रधानमात्रार्थताधिकरणम् ॥ २ ॥)

---

१ तत्—तदेत्यर्थः । २ अन्यान्यदृष्टार्थानीति—आरादुपकारकाण्यङ्गानीत्यर्थः । ३ एतेऽपीति—याजमानाः संस्कारा अपीत्यर्थः ।

प्रधानार्थेति । का चिकीर्षा । इयति शक्ष्यामह इति । यच्चिकीर्षितं, तस्यार्थेनैषा श्रूयते, शक्ष्यामहेऽस्यां कर्तुमिति । प्रधानं च तस्य चिकीर्षितं, नाङ्गानि । प्रधानं हि फलवन्नाङ्गानि । आह । यद्यङ्गानि न चिकीर्षितानि, किमर्थं क्रियन्त इति । उच्यते । अचिकीर्षितान्यप्यङ्गानि[1] क्रियन्ते, यद्यपि तानि न चिकीर्ष्यन्ते, तथाऽपि तैरचिकीर्षितैरन्यच्चिकीर्ष्यते । तस्मात्तानि क्रियन्त इति । यच्चिकीर्षितं तस्य वेदिः । तस्मात्प्रधानार्थेति । स्थितं तावदपर्यवसितम् ॥ ७ ॥

[४] तथाऽभिधानेन ॥ ८ ॥ पू०

स्तो दर्शपूर्णमासौ । तत्र श्रूयते, चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्रा अमावास्याम् ; इति । तत्र संदेहः । किमङ्गप्रधानार्थमभिमर्शनमुत प्रधानार्थमिति । किं तावत्प्राप्तम् । प्रधानार्थमिति । प्रधाननामधेयं च तत्पौर्णमास्यमावास्येति च । तस्मात्प्रधानस्याभिमर्शनमिति ॥ ८ ॥

तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्यात् ॥ ९ ॥ सि०

स्थितादुत्तरम् । यदुक्तं प्रधानं चिकीर्षितं नाङ्गानि । तस्मात्प्रधानस्य वेदिरिति । तन्न । तद्युक्ते फलश्रुतिः । साङ्गात्फलं श्रूयते । तस्मात्साङ्गं चिकीर्षितम् । यद्यप्यङ्गानि न चिकीर्षितानि, तथाऽपि

पूर्वेणैव न्यायेन सौमिकी वेदिः केवलप्रधानार्था विज्ञायते । इयति शक्ष्यामहेऽस्यां कर्तुमिति यच्चिकीर्षितं तदुद्देशेनैवमभिधीयते । फलवच्चिकीर्षितं नाङ्गानि । अचिकीर्षितत्वे सति चिकीर्षितसिद्ध्यर्थत्वेन करणात् । एवमपर्यवसिते चिन्तान्तरं तावत्प्रस्तौति ॥ ७ ॥

संयोगादिति वर्तते । पौर्णमास्यमावास्याशब्दयोः प्रधानमात्रवचनत्वात् ' आनर्थक्यात्तदङ्गेषु '[2] इत्येवमवतरतोः प्रधानहविःष्वेव केवलेषु प्रवृत्तिः । तस्माच्चतुर्होत्रा मन्त्रेण पञ्चहोत्रा च प्रधानहविर्मात्रमभिम्रष्टव्यम् ॥ ८ ॥

वेदेर्देशविशेषात्मकत्वाद्देशकालयोश्च साङ्गप्रधानप्रयोगविषयत्वावधारणात्सर्वार्थत्वम् । योऽपि चिकीर्षासंयोगः सोऽपि फलप्राप्तेः प्रयोगाधीनत्वात्तद्विषय एव ज्ञायते । तस्मात्साङ्गप्रधानार्थेयमित्यवधारणादङ्गार्थाऽपि स्यात् । एवं च[3] सति अग्नीषोमीयादिविकारेषु

---

१ अचिकीर्षितान्यङ्गानि, इति पा० । २ (अ० ३ पा० १ अ० ९ सू० १८) । ३ सिद्धान्ते प्रयोजनमाह—एवं च सतीत्यादिना । पूर्वपक्षे च व्यतिरेकेण प्रयोजनं सुज्ञेयमित्याशयः ।

वेद्यां कर्तव्यानि । अन्यथा न साङ्गं वेद्यां कृतं भवति ॥ ९ ॥

गुणाभिधानात्सर्वार्थमभिधानम् ॥ १० ॥ सि०

यदुक्तं, प्रधाननामत्वात्पौर्णमासीशब्दस्यामावास्याशब्दस्य च, प्रधानहविषामभिमर्शनमिति । नैतदेवम् । अङ्गहविषामप्यभिमर्शनं स्यात् । कुतः । गुणाभिधानात् । गुणोऽभिमर्शनमित्यभिधानं भवति । कतमत्तदभिधानम् । यद्गुणोऽभिमर्शनमिति ब्रूते । पौर्णमासीममावास्यामिति च द्वितीयान्तं पौर्णमास्यर्थमभिमर्शनं कर्तव्यम्, अमावास्यार्थमभिमर्शनं कर्तव्यमिति । अतो यत्र यत्र क्रियमाणं पौर्णमास्याममावास्यायां वोपकरोति, तत्र तत्र कर्तव्यम् । यद्यत्पौर्णमास्याममावास्यायां वाऽभिसंबध्यते, साक्षात्, प्रणाड्या वा, तत्र तत्र क्रियमाणं तयोरुपकरोति । तस्मात्प्रधानहविषामङ्गहविषां च कर्तव्यमिति ॥१०॥

निरूढपश्वादिषु कर्तव्या ॥ ९ ॥

(इति–सौमिकवेदेरङ्गप्रधानार्थताधिकरणम् ॥ ३ ॥)

द्वितीयया यस्माद्गुणभूतमभिमर्शनं विज्ञायते तस्मात्सर्वार्थमित्यसंबद्धम् । स्थित एव गुणत्वे तद्विशेषचिन्तेयं प्रस्तुता । सुतरां च प्रातिपदिकार्थानुसारिणा द्वितीयार्थेन प्रधानहविर्मात्रगुणत्वं प्राप्नोति । । तस्मादनुपपत्तिरेव । यच्च पौर्णमास्यर्थममावास्यार्थमिति चोक्तं तदपि पूर्वपक्षमेव साधयति । तेनैवं वक्तव्यम् । 'पौर्णमासीमभिमृशेत्' इत्यत्र कालकर्मतत्समुदायानामनभिव्यक्तत्वात्पौर्णमासीमिति गौणेन भवितव्यम् । तत्र प्रकृतिप्रत्ययार्थयोर्यद्यपि प्रत्ययार्थस्य प्राधान्यात्प्रातिपदिकं गौणमित्यापद्यते तथाऽन्यत्र तावताऽप्यभिव्यक्तव्यविशेषानवगमात्समस्तस्रुवादिविषयसंशयोपप्लवे सति विशेषोऽन्यत एव लब्धव्य इति साकाङ्क्षत्वादसंदिग्धार्थपरिग्रहार्थं प्रथमप्रतीतत्वेन च प्रातिपदिकार्थं मुख्यमाश्रित्य विभक्तिः सप्तम्यर्थेऽवकल्पते पौर्णमास्यामिति । तदेव चात्राऽऽकाङ्क्षितम् । आसन्नहविरधिकाराविधिनाऽभिव्यक्तव्यविशेषस्यावधारितत्वात् । अतः कालद्वारेण प्रयोगद्वारेण वा व्यवस्थार्थमेवेदं श्रवणमिति हविर्मात्राभिमर्शनम् । यद्यपि पौर्णमास्यादिशब्देन हविर्लक्ष्यते तथाऽपि तदुपकारमात्रलक्षणात्सर्वार्थत्वसिद्धिः ॥ १० ॥

(इति–अभिमर्शनादेरङ्गप्रधानसाधारणहविर्मात्रार्थताधिकरणम् ॥४॥)

[५] दीक्षादक्षिणं तु वचनात्प्रधानस्य ॥ ११ ॥ सि०

ज्योतिष्टोमे दीक्षाः श्रूयन्ते । तिस्रो दीक्षा इति । तथा दक्षिणाः श्रूयन्ते । तस्य द्वादशशतं दक्षिणा, इति । तत्र संदेहः । किं दीक्षादक्षिणमङ्गप्रधानार्थमुत प्रधानार्थमिति । किं प्राप्तम् । पुरुषाणामङ्गप्रधानार्थत्वाद्दीक्षादक्षिणस्याङ्गप्रधानार्थतेति । एवं प्राप्ते ब्रूमः । दीक्षादक्षिणं प्रधानस्य । कुतः । वचनात् । वचनं हि भवति । दीक्षाः सोमस्य, दक्षिणाः सोमस्य, इति । न हि वचनस्यातिभारो नाम कचित् । तस्माद्दीक्षादाक्षिणं वचनात्सोमस्येति ॥ ११ ॥

निवृत्तिदर्शनाच्च ॥ १२ ॥

निवृत्तिं दीक्षाणां दर्शयति । कथम् । अध्वर्यो यत्पशुनाऽयाक्षीरथ काऽस्य दीक्षेति, यत् षड्ढोतारं जुहोति साऽस्य दीक्षेति । अस-

'फलसंयोगात्तु स्वामियुक्तं प्रधानस्य' इत्यनेनैव गतार्थत्वाद्दीक्षाणामनुदाहरणत्वम् । अन्ये तु समर्थयन्ते । सर्वेषु सोमक्रयादिषु दीक्षितशब्देन विनियोगो दृश्यते । दीक्षाश्च दीक्षितत्वसिद्ध्यर्थाः । तच्च दीक्षितत्वमुपादीयमानत्वात्तत्र तत्र गुणत्वेन विवक्षितम् । अतोऽङ्गप्रधानार्थत्वप्रसक्तिः । दक्षिणानामृत्विगानमनार्थत्वादानमनस्य च साहाय्योपादित्सया प्रयोगार्थता । तस्माच्चिकीर्षान्यायेन साङ्गप्रधानप्रयोगविषयत्वमिति सर्वार्थत्वप्रसक्तिः । अपि च प्रत्यक्षमेवैतद्दृश्यते दक्षिणोपात्ता ऋत्विजोऽङ्गान्यपि कुर्वन्ति । इतरथा हि प्रधानमात्रमेव तत्परिक्रीताः कुर्युः । न च तावन्मात्रार्थं यजमानस्यैतैः परिक्रीतैः प्रयोजनम् । अतो यद्यत्परिक्रीताः करिष्यन्तीत्यवधार्यते तस्मै दक्षिणा । एवं च कर्तृतन्त्रत्वाभिधानमेकादशे वक्ष्यते । तस्मात्सर्वार्थत्वमिति प्राप्तेऽभिधीयते । 'दीक्षाः सोमस्य' 'दक्षिणाः सोमस्य' इति वचनात्प्रधानार्थता । यस्तु दीक्षितविनियोगोऽङ्गेषु स पुरोडाशकपालादिवदप्रयोजकलक्षणापत्तेः प्रधानप्रयुक्तस्यैवेति ज्ञायते । दक्षिणाश्च प्रधानार्थाः सत्यः प्रसङ्गादङ्गानामुपकुर्वन्तीति वक्ष्यामः ॥ ११ ॥

निरूढपशौ च षड्ढोतृहोमेन दीक्षानुग्रहं वदन्नप्राधिं दर्शयति । सर्वार्थत्वे च

१ (अ० ३ पा० ७ अ० २ सू० ६)। २ सोमक्रयादिष्विति—'दीक्षितः सोमं क्रीणाति' यो दीक्षितो यदग्नीषोमीयं पशुमालभते' इत्यादिष्वित्यर्थः। ३ (अ० ३ पा० ७ अ० ३) अत्रत्यन्यायेनेत्यर्थः। ४ (अ० ११ पा० २ अ० १ सू० ८)। ५ (अ० १२ पा० १ सू० २१) इत्यत्रेति शेषः ६ षड्ढोतृहोमेनेति—'सूर्यं ते चक्षुषी, वातं प्राणं, द्यां पृष्ठम्, अन्तरिक्षमात्मा, अङ्गैर्यज्ञं, पृथिवीं शरीरैः' इति षड्ढोतृमन्त्रकेण होमेनेत्यर्थः।

स्यामपि दीक्षायां वचनं भवति । तस्मादङ्गानां दीक्षादक्षिण-मिति ॥ १२ ॥

[६] तथा यूपस्य वेदिः ॥ १३ ॥ पू०

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । यो दीक्षितो यदग्नीषोमीयं पशुमालभते, इति । तत्र यूपं प्रकृत्य श्रूयते, वज्रो वै यूपो यदन्तर्वेदि मिनुयात्तन्निर्दहेत्, यद्बहिर्वेदि, अनवरुद्धः स्यादर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदि, अनवरुद्धो भवति, न निर्दहति, इति । तत्र संदेहः । किमन्त-र्वेदि, इति यूपाङ्गभावेन वेदिरुपदिश्यत उतार्धमन्तर्वेदि, अर्धं बहिर्वे-दीति देशलक्षणार्थमुच्यत इति । कथं यूपाङ्गभावेन कथं वा देशलक्ष-णेति । यदि यूपार्धस्य वेद्यन्तरस्य च संबन्धो विवक्षितः, एवं वेदि-संबद्धो यूपः कर्तव्यः, ततो यूपाङ्गभावेन । अथ यस्मिन्देशे मीयमान-स्यार्धं वेद्यभ्यन्तरे, अर्धं च बहिः, स देश उपदिश्यते । ततो देशल-क्षणा । किं प्राप्तम् । तथा यूपस्य वेदिः । यथा दीक्षादक्षिणं प्रधानस्य तथा यूपस्य वेदिः । तथा यूपो मातव्यः, तथा मीयमानस्यार्धं वेद्य-भ्यन्तरे भवति । एवं वेदिश्रुतिरप्यनुग्रहीष्यते[1], इतरथा वेदिशब्दो

स्यादेव दीक्षेति नान्येनानुगृह्येत । ननु चानङ्गत्वेऽप्यनुग्रहवचनमनाकाङ्क्षितत्वाद्व्यर्थ-मेव । नैष दोषः । प्रकृतौ परप्रयुक्तोपजीवनात्तत्कृत उपकार आसीदिति, अप्रयोजक-त्वात्तदभावे सति वैगुण्यमिवाऽऽशङ्क्यते, तत्रानुग्रहवचनमुपपत्स्यते ॥ १२ ॥

(इति—दीक्षादक्षिणयोः प्रधानमात्रार्थताधिकरणम् ॥ ५ ॥)

' अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदि ' इति किमन्तर्वेद्येकदेशो यूपाङ्गत्वेन विधीयते, अथ बहिर्वेदिदेशमिश्रसंधिदेशमात्रं लक्षयतीति । ननु च पुरस्तात्[2]सर्वार्थत्वमवस्थाप्ये-दानीमयुक्तो विचारः । स्थित एतस्मिन्नधिकरणे तद्द्रष्टव्यम्[3] । यदि हि वाक्यसंयोगाद्यू-पार्थता भवेत्कुतस्तदा कैमर्थ्यविचारावसरः । स्थिते पुनर्देशलक्षणार्थत्वे तदर्थत्वातदर्थत्वे युज्येते । किं प्राप्तं, प्रकरणं बाधित्वा यूपस्य वाक्यसंयोगाद्भवितुमर्हति । लक्षणा हीतरथा स्यात् । न चान्तर्वेदिशब्दस्य श्रौतोऽर्थो न समवैति यतो लक्षणां प्रतिपद्येत ।

---

१ वेदिश्रुतिरनुग्रहीष्यत इति पा० । २ पुरस्तादिति—' चिकीर्षया च संयोगात् ' इत्यस्मिन्न-धिकरण इत्यर्थः । ३ तद्द्रष्टव्यमिति–चिकीर्षाधिकरणं द्रष्टव्यमित्यर्थः ।

लक्षयेद्देशम् । श्रुतिलक्षणाविशये श्रुतिर्न्याय्या, न लक्षणा । तस्माद्यूपाङ्गभावेन वेदिर्निर्दिश्यते ॥ १३ ॥

देशमात्रं वाऽशिष्येणैकवाक्यत्वात् ॥ १४ ॥ सि०

देशमात्रं वा वेदिशब्देन लक्ष्यते, न वेदिर्यूपाङ्गम् । कुतः । आशिष्येणैकवाक्यत्वात् । अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदीत्येतेनैकवाक्यता या, सा शासितव्येन[1], यदि देशलक्षणा । अथ यूपाङ्गभावेन वेद्या निर्देशः, ततो न शासितव्यो बहिर्वेदिदेशो भवति । वेद्यां यूपस्याङ्गभावेनोपदिश्यमानायाम्, अर्धं बहिर्वेदीत्येतदुच्चार्यमाणं न कस्मिंश्चिदुपकारे वर्तते । अथ बहिर्वेदिदेशमपि यूपाङ्गभावेनोपदिशेत्,

तस्मात् ' इयति शक्ष्यामहे ' इत्यपि सामान्यशास्त्रं यूपविषयमेवोपसंहृत्य वेदेर्यूपार्थत्वं प्रतिपत्तव्यम् । अथवा पूर्वेणाधिकरणेन स्थिते साङ्गज्योतिष्टोमार्थत्वे किं यूपार्थत्वमप्यस्ति नास्तीति विचार्यते । ननु सर्वार्थत्वादेव सिद्धं यूपार्थत्वमिति न विचारणीयम् । न तेन सिद्धं, यूपस्य पश्वङ्गत्वात् । ज्योतिष्टोमस्य हि साङ्गस्य वेदिर्न पशोः । ननु च पशुरपि स्वाङ्गभूतमङ्गेभ्यो दास्यति । दद्याद्यदि तस्य स्वमहिम्ना वेदिर्भवेत् । प्रधानद्वारेण त्ववतरन्ती तत्स्वरूपमात्र एवावतिष्ठते । प्राप्ते च वेदिकार्येऽतिदेशेन प्राप्नुवन्तीं दार्शपौर्णमासिकीं वेदिं निराकृत्य पश्वादिषु सौमिकी निविशते । सा प्राकृतेष्वेव वेदिकार्येषु विनियोक्तव्या । न चेदं यूपमानं प्राकृतं यतो वेदिं लभेत । तस्मादप्राप्ते यूपस्य लौकिक्यैव देशबुद्ध्याऽन्तर्बहिर्वा माने प्राप्तेऽनेन वचनेनार्धस्या-तर्वेदिर्नियम्यत इति प्राप्तेऽभिधीयते ॥ १३ ॥

उभाभ्यामन्तर्वेदिबहिर्वेदिशब्दाभ्यां मध्यदेशो लक्ष्यते नाङ्गाङ्गिभावो विधीयते ।

कुतः कृतार्थसंयोगे देशकालोपलक्षणम् ।
सर्वेष्विष्टं कृतार्थौ च वेदियूपाविहान्यतः ॥

अङ्गाङ्गिभावे हि यूपो वा वेद्यङ्गं भवेद्वेदिर्वा यूपाङ्गं, न चैकमप्युपपद्यते निराकाङ्क्षत्वाददृष्टकल्पनाद्वाक्यभेदप्रसङ्गाच्च । न तावत्पशुबन्धव्यापृतस्य यूपस्य वेदिं प्रत्यपेक्षाऽस्ति । नापि कर्तृहविस्तदुपकरणधारणव्यापृताया वेदेः सहस्रभागांशसंबन्धिनि यूपेऽपेक्षा । न चान्यतरस्य दृष्टोपकारित्वमवकल्पते । किं चार्धं बहिर्वेदीत्यशिष्यं, विध्यनुवादत्वासंभवात्त्वत्पक्षे । मत्पक्षे तु द्वाभ्यां विना देशविशेषोपलक्षणासंभवादवश्यं शासितव्यमेतत् । कथं, समस्तस्य यूपस्यान्तर्बहिर्वा माने प्राप्ते ' अर्धमन्तर्वेदि ' इति नियम्यते, द्वितीयस्यार्धस्य पुनरप्यनियमप्रसक्तौ ' अर्धं बहिर्वेदि ' इत्यपि विधातव्यम् ।

[1] एकवाक्यता शासितव्येनेति पा० ।

वाक्यं भिद्येत । तस्माद्यूपाङ्गभावेन वेद्या निर्देशे बहिर्वेदिशब्दः सर्वथा न शासितव्यः । यदि तु देशलक्षणा, ततो विशिष्टे देशे लक्ष्यमाणेऽवश्यवक्तव्यो बहिर्वेदिशब्दो भवति । अनुच्यमाने, वेद्यभ्यन्तरे यस्मिन्कस्मिंश्च प्रदेशे यूप इति गम्यते । अथ पुनर्बहिर्वेदिशब्दे श्रूयमाणे, यतरस्मिन्देशे मीयमानस्यार्धमन्तर्वेद्यर्धं बहिर्वेदि, स देशो लक्षयितुमिष्टो भवति । स च बहिर्वेदिशब्देन विना न शक्यते लक्षयितुमित्यवश्यं शासितव्यो भवति । तस्माद्देशलक्षणेति ॥ १४ ॥

[७] सामिधेनीस्तदन्वाहुरिति हविर्धानयोर्वचनात्सामिधेनीनाम् ॥ १५ ॥ पू०

ज्योतिष्टोमे श्रूयते, उत यत्सुन्वन्ति सामिधेनीस्तदन्वाहुः, इति । हविर्धानयोर्यस्मिन् हविर्धाने सुन्वन्ति, तत्, सामिधेनीभिः संबन्धयेदित्यर्थः । तत्र संदेहः । किं सामीधेनीनामङ्गभावेन हविर्धानं चोद्यते, हविर्धानविशिष्टाः सामिधेन्योऽनुवक्तव्या उत हविर्धानेनामूषामनूच्यमानानां देशो लक्ष्यत इति । किं तावत्प्राप्तम् । सामिधेनीनामङ्गत्वेन हविर्धानं चोद्यते । यस्मिन् हविर्धाने सुन्वन्ति, तत्, सामिधे-

---

ततश्चानेकार्थत्वाद्वाक्यभेदो मिनोत्याख्यातानुषङ्गक्लेशश्च प्रसज्यते । पाक्षिकस्य च नित्यवदनुवादोऽनर्थकः कल्पयितव्यः । ननु चार्धस्यान्तर्वेदिसंबन्धे विहिते विध्यभावादर्धान्तरं बहिर्वेदि भविष्यति । भवेदेवं, यदि नित्यमन्तर्वेदि बहिर्वेद्येव वा यूपमानं प्रसक्तं स्यात् । समस्तान्तर्वेदिप्रसङ्गे हि सति अर्धपुनर्वचनसामर्थ्यात्परिसंख्यायेतरस्य बहिर्मानं गम्येत । समस्तस्य वा बहिरेव प्रसङ्गेऽर्धस्याविहितमिति तदवस्थमर्धान्तरमध्यवसीयेत । न त्वेतदुभयमप्यस्ति । अतश्चेदृशमवधारणमर्धमन्तर्वेद्येव न त्वर्धमेवान्तर्वेदीति । तथा सति चार्धान्तरमनियतत्वात्कदाचिदन्तरपि प्राप्नोतीति न बहिर्भावः सिध्यतीति । ननु च यदि समस्तमन्तर्वेदि मिनोति ततोऽर्धमन्तर्वेदीत्येवं विधिनैव कुर्यात् । कथं न करोति, यदर्धं तत्तावन्नियमतोऽन्तर्मिनोत्येतावच्च विहितं नेतरत्प्रतिषिद्धम् । तस्मादुभाभ्यां विशिष्ट एको देशोऽभिधीयत इत्येवमवाक्यभेदः ॥ १४ ॥

(इति—अन्तर्वेदिबहिर्वेदिपदलक्षितदेशविशेषस्य यूपमानाङ्गताधिकरणम् ॥६॥)

' उत यत्सुन्वन्ति सामिधेनीस्तदन्वाहुः ' इति श्रूयते । पूर्ववदेव संदेहविचारनि-

नीभिः संबन्धयेदिति । तेन हविर्धानसंबद्धाः सामिधेन्योऽनुवक्तव्या इति वचनात्सामिधेन्यङ्गभावे सति हविर्धानश्रुतिरनुग्रहीष्यते । इतरथा देशं लक्षयेदिति । तस्मात्सामिधेन्यङ्गं हविर्धानम् ॥ १५ ॥

देशमात्रं वा प्रत्यक्षं ह्यर्थकर्म सोमस्य ॥ १६ ॥ सि०

देशलक्षणार्थं वैतदुच्यते। यस्मिन्सुन्वन्ति, तस्मिन्देशे सामिधेन्योऽनुवक्तव्या इति। प्रत्यक्षं ह्यर्थकर्म सोमस्य तेन क्रियते। दक्षिणे हविर्धाने सोममासादयन्तीति सोमासादनार्थं तावदेतदुपादेयम् । सामिधेन्योऽप्यग्निसमिन्धनार्थमुपादेया इति। इह त्वेतावच्छ्रूयते, यस्य हविर्धानस्य समीपे सुन्वन्ति तत्संबद्धाः (सामिधेन्योऽग्निसमिन्धनार्थमुपादेया) इति। तत्र न ज्ञायते, किं सामिधेन्यः संबद्धा हविर्धानस्योपकुर्वन्ति, किं हविर्धानं सामिधेनीनामिति। तदुच्यते। सामिधेन्यस्तावद्धविर्धानस्य नोपकुर्वन्ति । न हि तावद्विधीयन्ते, सामिधेन्योऽनुवक्तव्या इति । किं तर्हि। हविर्धानविशेषसंबन्धस्तासां विधीयते। न चाविहितमङ्गं भवति। नाप्येवं विधीयते, हविर्धानमासामनूच्यमानानामुपादातव्यं संबन्धयितुमिति। कथं तर्हि। हविर्धानविशेषसंबन्धोऽत्र सामिधेनीनां श्रूयते न हविर्धानसंबन्धो विधीयते। न च सामिधेनीसंबन्धो हविर्धानस्य प्राप्तः, यो विशेषार्थमनूद्येत। केन तर्हि हविर्धानस्य संबन्धः। प्रत्यक्षं ह्यर्थकर्म सोमस्य, न तु सामिधेनीकर्म प्रत्यक्षं हविर्धानस्य। भवति तु देशस्य सामिधेनीसंबन्धः। अपरेण वेदिमिति होतुर्देशो लक्षितः। स उत्तरस्य दक्षिणस्य वा हविर्धानस्य समासन्नः। तत्र यत्, सुन्वन्ति, तदन्वाहुरित्युपपद्यते वचनम्। तस्माद्देशलक्षणार्थं हविर्धानग्रहणम्।

र्णेयाः। कथं न गतार्थमिति चेत्। विस्पष्टार्थद्वयानुपादानात् । न त्वत्रैवं दृश्यत इदं परस्याशिष्यमिति। मम तु शिष्यमिति। कथं तर्हि सिद्धान्तसिद्धिः। उच्यते ॥ १५ ॥

सोमधारणेन तावत्प्रत्यक्षं नैरपेक्ष्यं हविर्धानस्य, सामिधेनीनां पुनः प्रकृतावेवाग्निसमिन्धनार्थत्वात्क्लृप्तं प्रयोजनमिति नास्त्यङ्गाङ्क्षित्वापेक्षा । हविर्धानविशेषसंबन्धपरे वाक्ये सामान्यसंबन्धशक्तिमपि कल्पयत आग्नेय्यधिकरणोक्तो वाक्यभेदो योज्यः।

---

१ तेनेति क्वचिन्नास्ति। २ सामिधेन्योऽनुवक्तव्या इति पा०। ३ (अ० ३ पा० २ अ० ८)।

अथैवमभिसंबन्धः कस्मान्न भवति। यस्मिन् हविर्धाने सुन्वन्ति, तस्य हविर्धानस्य सामिधेनीसंबन्ध इति। नैवं शक्यम्। एवं द्वावर्थौ विधातव्यौ भवतः। हविर्धानसंबन्धो, हविर्धानाविशेषसंबन्धश्च। तत्र वाक्यं भिद्यते। तस्मान्नैवमभिसंबन्ध इति ॥ १६ ॥

समाख्यानं च तद्वत् ॥ १७ ॥

समाख्यानं च तद्वदेव भवति। यथाऽस्माभिर्न्याय उपदिष्टः सोमार्थं हविर्धानमिति[1] ॥ १७ ॥

[८] शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यात् ॥ १८ ॥ पू०

इह कर्माण्युदाहरणम्। अग्निहोत्रं जुहुयात्स्वर्गकामः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेत, इति। तत्र संदेहः। किमेतानि कर्माणि स्वयमनुष्ठातव्यानि, उतात्रोत्सर्गमात्रं स्वयं कुर्यात्।

विशेषेण सामान्याक्षेपाद्वाक्यभेदं परिहरतः सिद्धसामान्यसंबन्धेन सिद्धान्तपक्षेणार्थापत्तिक्षयो दर्शयितव्यः। अस्ति हि प्राकृतदेशोपलक्षणत्वेन हविर्धानयोरन्यतरस्य प्राप्तिः। तत्र विशेषमात्रं सुखेन विधीयते। तस्मादपि देशलक्षणा ॥ १६ ॥

हविर्धानमिति, अनन्यप्रयोजनस्य तादर्थ्यव्यपदेशोऽवकल्पते। अन्यथा हि सामिधेनीधानमित्यपि स्यात् ॥ १७ ॥

(इति–दक्षिणहविर्धानिर्देशस्यानुवचनार्थताधिकरणम् ॥ ७ ॥)

अतः परं समाख्यायाः सर्वैः सह विरोधाविरोधचिन्ता वर्तिष्यते[2]। (होता) हौत्रमित्यादयः कथं विनियोजिका इति। तंत्र[3] प्रथमं तावदुपोद्घातः क्रियते। यदि होत्रादयो नानाभूता विद्यन्ते ततः क ते विनियुज्यन्तामिति विचारो भवति। यदि तु सर्वमेव कर्म यजमानेन कर्तव्यं न कर्त्रन्तराणामवकाशोऽस्ति ततस्तत्समाख्योत्थापितो विरोधाविरोधविचारो नैव प्रस्तोतव्य इति। तत्र दर्शपूर्णमासादीनि फलदक्षि-

---

१ हविषां निधानं हाविर्धानामिति पा०। २ वर्तिष्यत इति–'ते सर्वार्थाः प्रयुक्तत्वात्' इत्यधिकरणमारभ्येति शेषः। ३ 'शास्त्रफलं प्रयोक्तरि' इत्यादिना क्रियमाणविचारस्य बलाबलविचारत्वाभावेनासांगत्यं मनसि निधाय तदुपोद्घाततया बलाबलचिन्ताशेषत्वेन संगतिं तावदुपपादयति—तंत्रेत्यादिना।

शेषमन्यः स्वयं वेति शेषमन्य एवेति । किं प्राप्तम् । स्वयं प्रयोगे स्यात् । कुतः । यतः स्वयं प्रयुञ्जानस्य फलं भवति । कथमवगम्यते । तल्लक्षणत्वात् । शब्दोऽस्यार्थस्य लक्षणं, स्वयं प्रयुञ्जानस्य फलं भवतीति । कतमः स शब्दः । स्वर्गकामो यजेतेति । यः स्वर्गं कामयते, स एवोच्यते, यागे कर्ता भवन्फलं साधयेदिति । साङ्गे च कर्ता भवन्फलं प्राप्नोति । तस्मात्स्वयं प्रयोगे स्यात् ॥ १८ ॥

उत्सर्गे तु प्रधानत्वाच्छेषकारी प्रधानस्य, तस्मादन्यः स्वयं वा स्यात् ॥ १९ ॥

उत्सर्गे प्राधान्यमस्ति । कथम् । य उत्सर्गं करोति तेन सर्वं कृतं भवति । कथम् । परिक्रय उत्सर्गः । तेनाऽऽनताः सर्वं कुर्वन्ति ।

र्णावन्ति कर्माण्युदाहरणम् । तेषु विचारः, किं यजमानेनैव सर्वं प्रयोक्तव्यमुत प्रधानमात्रे यजमाननियमः किं वा प्रधानेष्वेव यजमानोऽन्यत्रान्य एव । किं प्राप्तं, सर्वं यजमानेनैव कर्तव्यमिति । कुतः । प्रयोगवचनस्थं ह्यात्मनेपदं साङ्गायां भावनायां फलार्थिनं कर्तृत्वेन प्रयुङ्क्ते । स यत्रैव कर्ता न स्यात्तत्कृतमेवोपकारं न प्राप्नुयात् । तस्मात्स्वयं कुर्यादिति । फलस्य चोत्पद्यमानस्योत्पादयितृत्वेन प्रयोक्ता यजमान एवोच्यते । होत्रादिसमाख्या च तस्यैव तत्तत्कुर्वाणस्य 'एकस्य कर्मभेदात्' इत्यनेन न्यायेन भविष्यतीति मन्यते ॥ १८ ॥

प्रधानमात्रवाचिनो धातोः परेण प्रत्ययेन तन्मात्रस्यैव फलार्थिकर्तृकत्वं नियम्यते । शेषाणां तु निर्वृत्तिमात्रं प्रतीयते न कर्तृविशेषः । तस्मात्तत्रानियमः । ननु च प्रधानसमानकर्तृकत्वादेवाङ्गानामपि स एव कर्ता सेत्स्यति । न । तत्र प्रयोजकत्वेनापि कर्तृत्वानुग्रहात् । द्रव्योत्सर्गे ह्यन्येन क्रियमाणे न किंचिद्यजमानेन कृतं स्यादिति तं करोति । तत्र[3] कृते परिक्रयादिना कारयन्न[4] कर्तृत्वात्प्रच्यवते । केचित्तु सुतरामात्मनेप-

---

१ फलदक्षिणावन्तीति—अनेन चाग्निहोत्रे परिक्रयानाम्नानेन भाष्यकारोदाहृतस्यापि, अग्निहोत्रस्यानुदाहरणत्वं सूचितं ज्ञेयम् । वस्तुतस्तु यद्यप्यग्निहोत्रप्रकरणे तदङ्गतया दक्षिणा नाऽऽम्नायते तथाऽपि 'अहरहर्यजमानः स्वयमग्निहोत्रं जुहुयात्, पर्वणि वा । ब्रह्मचारी वा जुहुयात् । ब्रह्मणा हि स परिक्रीतो भवति । क्षीरहोता वा जुहुयात्, धनेन स परिक्रीतो भवति' इत्यापस्तम्बधृतबह्वृचब्राह्मणे तत्रापि दक्षिणाकार्यस्य परिक्रयस्यैव विधानात्तद्बलेनाग्निहोत्रेऽप्यन्यस्य कर्तृत्वं संभाव्यत एवेति संभवत्येवाग्निहोत्रस्याप्युदाहरणत्वमिति खण्डदेवप्रभृतीनामभिप्रायः । २ (अ० ३ पा० ७ अ० ९ सू० २३) । ३ तत्र कृत इति—प्रधाने तु द्रव्योत्सर्गरूपे स्वयं कृत इत्यर्थः । ४ कारयन्निऋत्विजः प्रागङ्गानीति शेषपूरणम् ।

तस्माद्यः परिक्रयं करोति तेन स्वयमेव सर्वं कृतं भवति । तस्मादुत्सर्गमात्रं स्वयं कुर्यात् । शेषमन्यः स्वयं वा ॥ १९ ॥

अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधात्प्रत्यगात्मनि ॥ २० ॥ सि०

शेषस्यान्य एव स्यात्कर्ता । कुतः । परिक्रयस्याऽऽम्नातत्वात् । पुरुषानतिप्रकारेषु बहुषु प्राप्तेषु परिक्रयो नियतः । तस्मात्परिक्रयेणाऽऽनतैः सर्वे पदार्थाः कर्तव्या इति । विप्रतिषिद्धश्चाऽऽत्मनि परिक्रयः । यदि स्वयं कुर्यादपरिक्रीतेन कृतं स्यात् । तत्र परिक्रयाम्नानानर्थक्यम् । अदृष्टार्थो वा प्रतिज्ञायेत । तस्मादन्यैः परिक्रीतैः शेषाः पदार्थाः कर्तव्या इति । उत्सर्गं तु स्वयं कुर्वता सर्वं स्वयं कृतं भवति ॥ २० ॥

देन प्रयोजकत्वमेवाभिधीयत इति समर्थयन्ते । कर्त्रभिप्रायक्रियाफलविहितस्य ह्यात्मनेपदस्य णिजर्थ एव प्रेषणादिरूपेण संविधानात्मको वाच्यः । तथा च यजन्ति याजका इति प्रयोज्यव्यापारे परस्मैपदम् । यजते यजमान इति प्रयोजकव्यापारे, आत्मनेपदं दृश्यते । न त्वेतद्युक्तम् । एवं हि सति प्रधानमपि यथाकथंचिदन्यैरेव कारयितव्यं भवेत् । यदेव हि स्वयंकर्तृकं जातं तस्यैव फलं न प्राप्नुयात् । न च यदृत्विजः कुर्वन्ति तस्य क्रत्वर्थत्वाद्यजमानगामि फलं युज्यते । कामं तु प्रधानकारिणो यजमानस्य यथाकथंचिदनुग्रहेण प्रयोजकत्वादृत्विग्व्यापारवचनं परस्मैपदं णिजर्थे वर्तेत नाऽऽत्मनेपदम् । तस्मात्पूर्वेणैव व्याख्यानेन प्रधानादन्यस्य स्वयमन्यो वा कर्ता स्यादिति । तत्रापि तु प्रत्ययप्रतिपादिता भावना प्रत्यासन्नतया फलार्थिकर्तृत्वेन गम्यमाना कथं करणांशमात्र एवोपसंह्रियत इति वक्तव्यम् । तेनैवं व्याख्येयं, नाऽऽत्मनेपदेन फलार्थिकर्तृत्वं चोद्यते । किं तर्हि । भावनाक्षिप्तकर्तृत्वस्य स्वतः फलसंबन्धित्वम् । अतश्च फलेन कर्तुरन्यत्र न गन्तव्यम् । न तु फलार्थिनोऽन्येन व्यापारकरणं विरुध्यते । तावता च सिद्धोऽङ्गेष्वनियम इति ॥ १९ ॥

अन्वाहार्यद्वादशशतादिदानं कर्मसंयुक्तेभ्योऽभिधानात् 'परिक्रियार्थं वा कर्मसंयोगात्' इति दशमे वक्ष्यति । स्वभावतश्च परिक्रयः परत्र क्रियते नाऽऽत्मनि, विरोधात् । तत्र यदि कदाचित्स्वयमेवाङ्गानि यजमानः कुर्यात्ततः परिक्रयासंभवात्परिक्रयो न क्रियेत । तत्रास्य नित्यवदाम्नानं विरुध्येत । तस्मात्तन्नित्यतां कर्तुमवश्यं परिक्रयार्हाणि कर्मान्तराण्युपादातव्यानि । अतश्च क्वचित्स्वयंकरणात्क्वचित्संविधानाद्यज-

---

१ विहितस्येति—'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्यनया स्मृत्येत्यर्थः । २ (अ० १० पा० २ अ० ८ सू० २१)

[९] तत्रार्थात्कर्तृपरिमाणं स्यादनियमोऽविशेषात् ॥ २१ ॥ पू०

तत्र तैः परिक्रीतैः कर्तव्येष्वनियमेन कर्तृपरिमाणं स्यात् । कुतः । अविशेषात् । न कर्तृपरिमाणे विशेषः कश्चिदाम्नायते । अर्थेन तत्परिमाणं यावद्भिरसाविति कर्तव्यता निर्वर्तते, तावतो वृणीतेति ॥ २१ ॥

अपि वा श्रुतिभेदात्प्रतिनामधेयं स्युः ॥ २२ ॥ सि०

यावन्ति कर्तृनामधेयानि कर्माणि श्रूयन्ते, तावन्तो वरीतव्या भिद्यन्ते । तानि नामधेयश्रवणानि । तान्पुरोऽध्वर्युर्विभजति, प्रतिप्रस्थाता मन्थिनं जुहोति, नेष्टा पत्नीमभ्युदानयति, उन्नेता चमसानुन्नयति, इति । तथा प्रस्तोता प्रस्तौति, उद्गातोद्गायति, प्रतिहर्ता प्रतिहरति, सुब्रह्मण्यः सुब्रह्मण्यामाह, होता प्रातरनुवाकमनुब्रूते, मैत्रावरुणः प्रेष्यति चानु-चाऽऽह, अच्छावाको यजति, ग्रावस्तुत्, ग्रावस्तोत्रीयामन्वाह । एतावद्भिः कर्मणि प्रयोजनम् । तेन तेऽवश्यमेतानि यथाश्रुतानि कर्तुं वरीतव्याः । एतद्व्यतिरिक्तोऽन्यः पदार्थो न विद्यते । योऽपि वाक्येन नोपदिष्टः, स समाख्यया गम्यते । तस्मादेतावतो वृणीत इति ॥ २२ ॥

मानस्य कर्तृत्वम् । आत्मनेपदस्यापि परिक्रयवर्ती भावनामाश्रितस्येद्दशेनैव कर्तृत्वेन फलोपयोगः समानकर्तृक इत्यर्थो न विरोत्स्यते ॥ २० ॥

(इति—यजमानभिन्नकर्त्रन्तरप्रतिपादनाधिकरणम् ॥ ८ ॥)

एकस्य द्वयोर्वोपादाने परिक्रयः शक्यः कर्तुमित्यनियमः । अथवा फलसमानकर्तृकत्वे सामानाधिकरण्यात्मनेपदाभ्यां समस्तस्य प्रयोगस्य प्राप्ते, यन्मात्रमेवाबाधित्वा परिक्रयविधिरशक्यस्तदेव बाधितव्यम् । स चैकेन कर्त्रा यत्किंचित्कुर्वतोपपन्न इति नानेकं बाधितव्यमिति ॥ २१ ॥

भिन्नसमाख्यानियतकर्तृकपदार्थयुक्तभावनाविधिना तावतामुपादानमिति विहितं भवति । ' संज्ञा चोत्पत्तिसंयोगात् ' इति चैष न्यायो यथा कर्मभेदं बोधयितुं समर्थस्तथा कर्तृभेदमपीति यावत्समाख्यं कर्तार उपादातव्याः ॥ २२ ॥

---

१ ग्रावस्तोत्रीया अन्वाहेति पा०। २ सामानाधिकरण्येति-फलपदसामानाधिकरण्येत्यर्थः । ३ स चेति-परिक्रयविधिरित्यर्थः । ४ (अ० २ पा० २ अ० ८ सू० २२) ।

एकस्य कर्मभेदादिति चेत् ॥ २३ ॥

एवं चेत्प्रतिज्ञायते, एतावतो वृणीत इति । तन्न । यो यस्तत्कर्म करिष्यतीति संकल्पते, स स तत्तच्छब्दाभिधेयो भवति । एकोऽपि बहून्पदार्थान्कर्तुं बहुभिर्नामधेयैरुच्येत । तस्मादनियमः ॥ २३ ॥

नोत्पत्तौ हि ॥ २४ ॥

नैतदेवम्, उत्पत्तौ पुरुषाणाम्[1] । उत्पाद्यमानेषु पुरुषेषु नामधेयानि भिद्यन्ते । ब्रह्माणं वृणीते, होतारं वृणीते, उद्गातारं वृणीते, अध्वर्युं वृणीते, इत्येवमादि । तस्मात्कर्मणि तैरेवंनामकैः प्रयोजनम् । अवश्यं ते वरीतव्याः । तस्मादेषां वरणे संकीर्तनं न विधिः । प्रयोजनस्याभावान्नानुवादः । न वेदे तावन्तो वरीतव्या इति ब्रूयात् । अनर्थक-

---

व्याप्रियमाणानामेताः समाख्या उपलभ्यन्ते । न च लोकादवगता इति यूपादिवत्कार्यतस्तावत्परिच्छिद्यन्ते । ततश्च पाचकादिवत्[2]तत्तद्धौत्रादिकर्म कुर्वन्हौत्रादिशब्दैरभिधास्यत इत्यभेदः ॥ २३ ॥

यदि हि कर्मविनियोगवेलायामेतदुत्तरकालं वैताः समाख्याः श्रूयेरन्नेवं सति न भिन्द्युरपि । वरणं त्वत्यन्ताप्रवृत्तानां प्रवर्तनार्थमभ्यर्थनम् । तत्रैताः श्रूयन्ते 'ब्रह्माणं वृणीते' इत्यादि । न च तदानीं निमित्तान्तरं दृश्यते यत्कृतः समाख्याभेदो भवेत् । वरणान्यपि चैतानि 'एकस्यैवं पुनः श्रुतिः'[3] इत्येवं 'गुणश्चापूर्वसंयोगे'[4] इत्येवं यावच्छ्रुति भिद्यन्ते । तद्भेदाच्चोपादेयानामृत्विजामपि तत्परिमाण एव भेदः । समाख्यानामपि च प्रागनुपलब्धेरुत्तरकालं च सिद्धवद्व्यवहाराद्वरणनिमित्ततैव गम्यते । निमित्तभेदाच्च नैमित्तिकभेदसिद्धिः । दृष्टार्थत्वाच्च नैकस्यैव कर्तुः पुनः पुनर्वरणं कर्तुं शक्यते । सकृदुपात्तस्य पुनरुपादानानुपपत्तेः । उत्पत्तिवाक्याशिष्टवरीतव्यबाधाविकल्पासंभवाच्च न शक्यं तेनैव वरणेन व्रियमाणान्तरं संबन्धुम् । अतोऽपि वरणानि भिद्यन्ते । सर्वाणि च तान्यैन्द्रवायवादिग्रहणवदपर्यायविधायिना प्रयोगवचनेन गृह्यन्ते । तद्ग्रहणवशेन च सर्वर्त्विजां ग्रहणम् । अतो यावद्वरणमृत्विजां भेदसिद्धिः । यत्तु भाष्यकारेणोक्तं तस्मादेषां वरणे संकीर्तनं न विधिरित्यादि तदविहितवरणनियमप्राप्त्यभावा-

---

१ पुरुषाणामिति क्वचित्पाठः । २ पाचकादिवादिति—गृहेऽस्मिन्देवदत्त पाचक इत्युक्ते योऽस्मिन् गृहे पाककर्ता स देवदत्त इत्येवं पाककर्मसंयोगाद्यथैव देवदत्तशब्दार्थो निर्णीयते तद्वत्प्रकृतेऽपीत्यर्थः । ३ (अ० २ पा० २ अ० २ सू० २) । ४ (अ० २ पा० २ अ० ९ सू० २४) ।

मेव स्यात्। शक्नोति चेदं प्रत्याययितुं संख्याविशेषम्। तस्माद्यः संख्याविशेष एषां प्रतीयते तदर्थमेतद्वचनम्। तस्मात्, षोडश कर्तारो वरीतव्याः, तावत्कर्तृकश्च सोमः स्यात्। एवं दर्शपूर्णमासयोरपि॥ २४॥

[१०] चमसाध्वर्यवश्च तैर्व्यपदेशात्॥ २५॥ सि०

सन्ति ज्योतिष्टोमे चमसाध्वर्यवः। चमसाध्वर्यून् वृणीते, इति। तेषु संदेहः। किमेषामन्यतमा उतैतेभ्योऽन्य इति। किं तावत्प्राप्तम्। एतावतां संकीर्तनादेषामेवान्यतमा इति प्राप्ते, ब्रूमः। चमसाध्वर्यवश्चापरे भवेयुस्तेभ्योऽन्य इति। कुतः। तैर्व्यपदेशात्। तैः परिगणितैरेषां व्यपदेशो भवति। मध्यतःकारिणां चमसाध्वर्यवो, होत्रकाणां चमसाध्वर्यव इति। ननु य एव प्रकृतास्ते चमसाध्वर्यवो भवेयुः। नेति ब्रूमः। कुतः। तैर्व्यपदेशात्। मध्यतःकारिणां चमसाध्वर्यवो होत्रकाणां चमसाध्वर्यव इति। षष्ठी संबन्धे सति भवति। ऋत्विग्भिस्ते व्यपदिश्यन्ते। ऋत्विजस्तेषां स्वामिनो न यजमानः। यजमानपुरुषेभ्यश्चैतेऽन्य इति नः प्रतिज्ञातम्। न यजमानेन चमसाध्वर्युत्वं कर्तुं वरीतव्याः, ऋत्विग्भिस्ते वरीतव्या इति। अपि चैषामुत्पत्तिवाक्य एव भेदः। चमसाध्वर्यून् वृणीत इति॥ २५॥

[११] उत्पत्तौ तु बहुश्रुतेः॥ २६॥ सि०

तेष्वेव संदेहः। किमनियमः, एको द्वौ बहवो वोत बहव एवेति।

दयुक्तम्। न चैतावतो वाक्यराशेः कल्पितैकवाक्यत्वस्य सुखतरोपायप्रचयलभ्यसंख्यामात्रप्रत्यायनं फलं भवितुमर्हति। तेन वरणविधिनैवानुनिष्पादिनी प्रचयशिष्टैव संख्या सेत्स्यतीत्येतदेव समर्थयितव्यम्। न किंचित्तया विहितया॥ २४॥

(इति-ऋत्विजां संख्यानियमाधिकरणम्॥ ९॥)

अध्वर्यव इति समाख्यानात्तेषां चमससंबन्धादध्वर्युपुरुषा एव चमसाध्वर्यव इति प्राप्तेऽभिधीयते। पृथक्त्वनियतत्वाद्व्यपदेशानां सर्वैश्चेतरैस्तुल्यवत्पृथक्त्वेन व्यपदेशादुत्पत्तौ च वरणान्तराम्नानात्पूर्ववदेव भेदः। यद्यपि च यजमानेन व्रियन्ते तथाऽपि तदाज्ञाकरत्वेन व्रियमाणत्वाद्भवत्येव तदीयत्वव्यपदेशः॥ २५॥

(इति—चमसाध्वर्यूणां पृथक्त्वाधिकरणम्॥ १०॥)

अनियम इति प्राप्ते, उच्यते । बहव इति । कुतः । उत्पत्तौ बहुश्रुतेः । चमसाध्वर्यव इत्येषामुत्पत्तौ बहुश्रुतिर्भवति । तस्माद्बहव इति ॥ २६ ॥

[१२] दशत्वं लिङ्गदर्शनात् ॥ २७ ॥ सि०

ज्योतिष्टोमे सन्ति चमसाध्वर्यवः । ते च बहव इत्युक्तम् । कियन्तो बहव इति संदेहे । त्रयो बहुवचनसामर्थ्यादिति प्राप्ते, ब्रूमः । दशत्वं लिङ्गदर्शनात् । ते दश भवेयुः । तथा हि । लिङ्गं ज्योतिष्टोमविकारे दशपेये श्रूयते, दश चमसाध्वर्यवो दश दशैकैकं चमसमनुसर्पन्ति, इति । एतस्मात्कारणाद्दशपेयो भवतीति ब्रुवन् दश चमसाध्वर्यून्दर्शयति । यदि त्रयो भवेयुरेतद्दर्शनं नोपपद्येत ।

तस्मान्नातीत्यैषा संख्या । यदि च दश न भवेयुर्नोपपद्येतैतद्दर्शनम् । तस्माद्भवन्ति दश । दश चैषां स्वामिनः । तस्मात्प्रयोजनभावाद्दशसंख्योपादीयते । तस्यां चोपादीयमानायामपराऽपि संख्याऽनुगृह्यते । तेनापि दश भवेयुः ॥ २७ ॥

[१३] शमिता च शब्दभेदात् ॥ २८ ॥ पू०

अस्ति शमिता, शमितारमुपनयीत, इति । स किं संकीर्तितानामन्य-

उत्पत्तौ त बहुश्रुतेः ॥ २६ ॥

(इति—चमसाध्वर्यूणां बहुत्वाधिकरणम् ॥ ११ ॥)

बहुत्वानियमे ' प्रथमं वा नियम्येत ' इति त्रित्वे प्राप्ते दशपेये ज्योतिष्टोमविकारे दशत्वानुवादात्प्रकृतौ च दश त्रियन्त इति विज्ञायते । स्वामिदशत्वाच्चमसदशत्वाच्च दशत्वप्राप्तिः ॥ २७ ॥

(इति—चमसाध्वर्यूणां दशत्वनियमाधिकरणम् ॥ १२ ॥)

शमिता च शब्दभेदात्[३] ॥ २८ ॥

---

१ ' उत्पत्तौ तु बहुश्रुतेः ' इति सूत्रस्थभाष्यस्य स्पष्टत्वादव्याख्येयतां मत्वा सूत्रपाठमात्रं कृतम् । २ (अ० ११ पा० १ अ० ७ सू० ४२) । ३ ' शमिता च शब्दभेदात् ' इति सूत्रस्थं भाष्यमपि सुस्पष्टत्वादव्याख्याय पूर्वपक्षसूत्रस्य पाठमात्रं कृतम् ।

तम उतान्यस्तेभ्य इति । किं प्राप्तम् । तेषां वरणे संकीर्तनात्तेषा-मन्यतम इति प्राप्ते, उच्यते । शमिता च शब्दभेदात् । शब्दो भिद्यते । एवंसंज्ञकेनेदं कर्म कर्तव्यमिति । तस्मादेवंसंज्ञक उत्पादयितव्यः । अस्य संकीर्तनात्संख्याविवृद्धिर्गम्यते । तस्मादन्यः शमिता स्यात् । अपि च, क्षोमा चार्धं वैकर्तनं च शमितुः । तद्ब्राह्मणाय दद्याद्य-द्यब्राह्मणः स्यादिति, अब्राह्मणाशङ्का भवति । सा ऋत्विजि नोप-पद्यते ॥ २८ ॥

प्रकरणाद्वोत्पत्त्यसंयोगात् ॥ २९ ॥ सि०

सत्यं संख्याविवृद्धिर्गम्यते, न तूत्पद्यमानेषु । या त्वनुत्पत्तिस्तेषु गम्यते, तत्र, एकस्य कर्मभेदात्, इत्येवमप्यवकल्पते । यदुक्तम्, अब्राह्मणाशङ्का भवतीति । यजमानाभिप्राया सा, यद्यब्राह्मणो यजमानः स्यादिति । ननु यद्यब्राह्मणः स्यादिति प्रकृतः शमिता संब-ध्यते । उच्यते । शमयतीति शमिता । यौगिक एष शब्दः प्रकृतेष्व-प्यवकल्पते । शामित्रमप्याध्वर्यवे समाम्नानादध्वर्युणा कर्तव्यम् । तस्माच्छमनादध्वर्युः शमिता । एवं सति अप्रकृतो यजमानः संब-ध्यते ॥ २९ ॥

उत्पत्तिगता समाख्या भेदिका भवति । न चेयं तद्गता । तेन 'एकस्य कर्म-भेदात्' इत्येवमेव भवति । नन्वध्वर्य्वादिषु व्याप्रियमाणेषु 'शमिता पशुं कण्ठे गृह्णाति' इति श्रवणाद्भेदः स्यात् । नैष दोषः । य एव कश्चिदव्यापृतः स एव ग्रही-ष्यति । न च तदा सर्वाध्वर्युपुरुषाणां सर्वर्त्विजां वा व्यापारो विद्यते । तदेतद्वक्ष्यति 'इतरमन्यस्तेषां यतो विशेषः स्यात्' इति । प्राप्त्यभावाच्च 'यद्यब्राह्मणः स्यात्' इति लिङ्गमसाधकमतो बलाद्यजमानविषयं कल्प्यते । याजमानप्रकरणाम्नानाच्च, शामित्रस्य न कथंचिदब्राह्मणविषयत्वं विज्ञायते । हिंसात्वाद्ब्राह्मणो नेच्छेदिति चेत्तु-ल्यमेतदब्राह्मणस्यापि । स हि मन्दप्रतीकारः सुतरां प्रत्यवैति । तेन यथैव शूद्रादिः कथंचिदनिच्छन्कार्यते तथैव यो दानादिवशीकृतः करिष्यति सोऽनुष्ठास्यतीत्यविरोधः । एतेनैव हेतुनाऽऽर्त्विज्यं निन्द्यते ॥ २९ ॥

(इति—शमितुरपृथक्त्वाधिकरणम् ॥ ११ ॥)

---

१ (अ० ३ पा० ७ अ० ९ सू० २३) । २ (अ० ३ पा० ८ अ० १० सू० २१) । ३ 'तद्ब्राह्मणाय दद्यात्, यद्यब्राह्मणः स्यात्' इति वाक्यस्येति शेषः । यजमानविषयं कल्प्यत इत्यस्य वाक्यद्वयेन शेषपूरणम् । ४ कार्यत इति—शमितेति शेषः । ५ करिष्यतीति—आर्त्विज्यमित्यर्थः । ६ अनुष्ठास्यति—शामित्रमित्यर्थः ।

[१४] उपगाश्च लिङ्गदर्शनात् ॥ ३० ॥ सि०

ज्योतिष्टोमे सन्त्युपगा नाम, ते शब्दभेदात्संख्याविवृद्धिं प्रत्याययन्तीत्यध्वर्य्वादिभ्योऽन्य इति प्राप्ते, ब्रूमः। तेषामेव केचित्स्युरिति। कस्मात्। उत्पत्तौ परिगणनात्। यौगिकत्वाच्च शब्दस्य। लिङ्गमिदं भवति। नाध्वर्युरुपगायेत्, इति। यद्येभ्योऽन्ये भवेयुर्नाध्वर्युं प्रतिषेधेत्। अप्राप्तत्वात्। यतस्तु प्रतिषेधति, अतोऽवगच्छाम उत्पत्तौ संकीर्तितानामेवान्यतम इति ॥ ३० ॥

[१५] विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् ॥३१॥ सि०

अस्ति सोमविक्रयी। तत्र संदेहः। स किमध्वर्य्वादीनामन्यतमः, उतैभ्योऽन्य इति। किं प्राप्तम्। तेषां संकीर्तनात्तेषामन्यतम इति प्राप्ते ब्रूमः। विक्रयी त्वन्यः स्यादिति[१]। विक्रयो न चोद्यते, क्रयश्चोद्यते। तत्रार्थाद्विक्रयः। ज्योतिष्टोमस्य च पदार्थान्कर्तुमध्वर्य्वादय उत्पाद्यन्ते, न तु विक्रयो ज्योतिष्टोमस्य श्रूयते। तस्मान्नाध्वर्य्वादीनामन्यतम इति ॥ ३१ ॥

[१६] कर्मकार्यात्सर्वेषामृत्विक्त्वमविशेषात् ॥ ३२ ॥ पू०

य एते पुरुषा ज्योतिष्टोमस्य श्रूयन्ते, ते किं सर्व एव ऋत्विजः, उत केचिदेषामिति। किं प्राप्तम्। सर्वे। कुतः। कर्मकार्यात्। सर्वे यागस्य साधनं कुर्वन्ति। तस्मात्सर्वे, ऋतौ यजन्ति। ये च, ऋतौ

उपगाश्च लिङ्गदर्शनात् ॥ ३० ॥

(इति—उपगातॄणामृत्विग्भ्योऽनन्यत्वाधिकरणम् ॥ १४ ॥)

विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् ॥ ३१ ॥

(इति—सोमविक्रेतुर्वृतेभ्यः पृथक्त्वाधिकरणम् ॥ १५ ॥)

ऋत्विक्शब्दो हि निपात्यमान एव उपपदधातुप्रत्ययसमन्वितेऽर्थे वर्तते, ऋतौ यजन्तीति ऋत्विजः। एतस्माच्चेत्कारणादृत्विजो भवन्ति हन्त सर्वेषां तद्विशिष्टमिति

---

१ 'उपगाश्च लिङ्गदर्शनात्' 'विक्रयी त्वन्यः' इति सूत्रद्वयस्यमपि भाष्यं सुस्पष्टत्वादुपेक्ष्याधिकरणद्वयसूत्रमात्रस्य पाठः कृतः।

यजन्ति त ऋत्विजः । न कश्चिद्विशेष आश्रीयते—इम एव क्रतौ यजन्तीति ऋत्विज इमे नेति । तस्मात्सर्वेषामृत्विक्त्वम् । ननु परिसंख्या श्रूयते, सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदश ऋत्विज इति । उच्यते । परिसंख्यायां बहवो दोषाः सन्तीत्यवयुत्यवादोऽयं भविष्यति ॥ ३२ ॥

न वा परिसंख्यानात् ॥ ३३ ॥ सि०

न वा सर्वे । कस्मात् । परिसंख्यानात् । एवं हि श्रूयते, सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदश ऋत्विज इति । स एष न विधिः । बहुतराणां प्राप्तत्वात् । नानुवादः । प्रयोजनाभावात् । न चेत्परिसंख्याऽपि, आनर्थक्यमेव स्यात् । ननु परिसंख्यायां स्वार्थहानं परार्थकल्पना प्राप्तबाधश्च । उच्यते । स्वार्थहानमदोषः, प्राप्तत्वात् । परार्थकल्पना च, प्रत्ययात् । बहूनामृत्विक्त्वे ज्ञाते पुनः सप्तदशर्त्विज इत्युच्यते । सप्तदशभिर्ऋत्विक्शब्दस्य संबन्धः पुनः प्रकाश्यते, अधिकैश्च न प्रकाश्यते । तत्र विज्ञायत एतत्—ऋत्विक्शब्दस्य पुरुषैः संबन्धे पुनः प्रकाश्यमाने सप्तदशभ्योऽभ्यधिका वर्जिता इति गम्यते तत्र किं सप्तदशभिः संबन्धो विवक्षितः, किं वाऽधिकानां वर्जनमिति । सप्तदशसंबन्धस्याप्रयोजकत्वादधिकानां वर्जनं विवक्षितमिति गम्यते ।

तदनुसारमृत्विक्त्वमपि सर्वेषामेव प्राप्तम् । अतश्चत्वारः, पञ्च, षट्, सप्तदशेत्याद्या अवयवा अप्येतस्य महान्त इत्येवं स्तोतुमवयुत्यवादः ॥ ३२ ॥

परिसंख्यानादिति भाष्यकारेण परिसंख्यैव व्याख्याता । सप्तदशस्वन्येषु च प्राप्तवत्सु सप्तदशपुनःश्रवणं न तावन्मात्रपरिग्रहार्थं, योऽर्थादितराभावप्रत्ययस्तमाश्रयितुं, न सप्तदशस्वरूपं प्रत्याययितुम् । सर्वत्र हि द्वयोः संबन्धे कृते तत्स्वरूपं संसर्गश्च प्रतीयतेऽन्यनिवृत्तिश्च । क्वचिच्च किंचित्प्रयोजनवशेन विवक्ष्यते । स्वरूपसंसर्गासंभवे च बलादेव विधिरितरनिवृत्तिप्रयोजनो भवति । अतश्च त्रिदोषत्वमदोषः । स्वार्थस्य प्राप्तत्वेनैव हेयत्वात्प्रतीतस्य च परार्थस्य परिग्रहे विध्यानर्थक्यात् । परस्तु

---

१ चत्वार इति—दर्शपूर्णमासयोस्तावत्, ब्रह्मा-अध्वर्युः-होता—आग्नीध्रश्चेति चत्वारः । चातुर्मास्ये प्रतिप्रस्थात्राधिक्येन पञ्च । पशुयागे मैत्रावरुणाधिक्येन च षट् । सोमयागे च ब्रह्मगणे तावत्—ब्रह्मब्राह्मणाच्छंस्याग्नीध्रपोतारश्चत्वारः । अध्वर्युगणे—अध्वर्युप्रतिप्रस्थातृनेष्टृन्नेतारश्चत्वारः । होतृगणे-होतृमैत्रावरुणाच्छावाकग्रावस्तुतश्चत्वारः । उद्गातृगणे च—उद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्याश्चत्वारः । यजमानः सप्तदश इत्याहत्य सप्तदश भवन्तीति वस्तुस्थितिः ।

आह । ननु प्रतिषिध्यमानेष्वप्यधिकेषु प्रतिषेधो न प्राप्नोति । न हि ते क्रतौ न यजन्ति । न वा क्रतौ यजन्तो न ऋत्विजः स्युः । उच्यते । सत्यम् । न प्रतिषेधादृत्विक्शब्देन न संबध्यन्ते, किंतु प्रतिषेधसामर्थ्याद्धि ऋत्विक्कार्ये न भवन्ति । किं पुनर्ऋत्विक्कार्यम् । ऋत्विज उपवसन्ति, ऋत्विजो वृणीते, ऋत्विग्भ्यो दक्षिणां ददाति, इति । आह । यदृत्विजां कार्यं, कथं तत्केषांचिदृत्विक्शब्दकानां न स्यात् । उच्यते । एवं तर्हि द्विविधोऽयमृत्विक्शब्दः, क्रतुयजननिमित्तो, वरणभरणनिमित्तश्च । तत्र यागनिमित्तस्य ग्रहणमनर्थकम् । तस्माद्वरणभरणनिमित्तो गृह्यत इति । आह । नन्वितरेतराश्रयमेवं भवति । य ऋत्विजस्ते वरीतव्याः, ये व्रियन्ते त ऋत्विज इति । तदितरेतराश्रयम् । उच्यते । न हि ऋत्विजो वृणीते, इत्ययमर्थः, ऋत्विजः सन्तो वरीतव्या इति । कथं तर्हि । वरणेन ऋत्विजः क्रियन्त इति । एवं

कर्मकरणमेव हेतुं परिगृह्य सति निमित्तेऽन्येष्वपि शब्दप्रवृत्त्यवश्यंभावित्वं मत्वाऽऽह—ननु प्रतिषिध्यमानेष्वपीति । कार्यप्रतिषेधेनैव तावत्प्रक्रमते । सर्वत्र हि स्वरूपप्रतिषेधासंभवात्कार्यं प्रतिषिध्यते । तद्यथा न ममैष पुत्रः, पुत्रकार्ये न प्रवर्तत इत्यर्थः । एवं योऽयमर्थात्सप्तदशभ्योऽधिकानां प्रतिषेधः प्रतीयते स कार्यविषयो न स्वरूपविषय इति [1]द्रष्टव्यम् । वरणं तु शब्दप्रवृत्तिनिमित्तत्वादनुदाहरणमिति चेत् । न । अस्मिन्पक्षे कर्मयोगादेव शब्दप्रयोगासिद्धेः । इतरस्तु स्वरूपाप्रतिषेधात्तन्निमित्तं कार्यमपि दुष्प्रतिषेधमिति कथमृतौ यजतां तेषामृत्विक्त्वं न स्यादित्याह । सिद्धान्तवादी तु तत्त्वेनोत्तरं विवक्षमाण एवं तर्हि द्विविधोऽयमित्यादि प्रक्रमते । यद्येष यौगिकः स्यात्ततो न कुतश्चिन्निवर्तेत । संस्कारशब्दस्त्वयं, वरणभरणे हि संस्कारौ । ते येषां न स्तो न ते सत्यपि क्रियायोगे तच्छब्दवाच्या भविष्यन्ति । ते च वरणभरणे सप्तदशानामेव यजमानेन क्रियेते । तन्निमितत्वाश्रयणे च 'सप्तदशर्त्विजः' इत्यनुवादोऽवकल्पिष्यते । अन्यथा त्ववयवानुवादो मृषात्वरूपः कल्प्येत । तस्मान्नातिप्रसङ्गः । ननु च य ऋत्विजस्तेषां वरणभरणे येषां च ते, त ऋत्विज इतीतरेतराश्रयं प्राप्नोति । नैष दोषः । प्रथमं तावदाख्यस्येनैषा वचनव्यक्तिरन्विष्यते । य ऋत्विजस्तेषां वरणभरणे इति । यदा तु वृक्षादिवत्ते लोकव्यवहारेष्वप्रसिद्धास्तदाऽर्थादयमर्थो भवति वरणेन ऋत्विजः

---

१ नेति क्वचिन्नास्ति । २ अनुदाहरणमिति—ऋत्विजो वृणीत इत्येवं भाष्योक्तं वरणमृत्विक्कार्योदाहरणं न भवतीत्यर्थः । भरणं—दक्षिणादानमित्यर्थः ।

द्वितीयानिर्देशो युक्तो भविष्यति, अध्वर्युं वृणीते, इत्येवंलक्षणः। दृष्टार्थता च वरणस्य भविष्यति। कथमात्मेच्छयाऽध्वर्युर्भवतीति चेत्कश्चिद्ब्रूयात्, भवतीति ब्रूयाम्। कथम्। एवंशब्दकेनायं पदार्थः कर्तव्य इति, नास्त्येवंशब्दकः। यश्च नास्ति, स यदि शक्यते कर्तुं, कर्तव्यो भवति। यथा, जुह्वा जुहोति, इत्यविद्यमाना जुहूः क्रियते। एवमेतदपि द्रष्टव्यम्। तत्रार्थादनियमेन ऋत्विक्शब्दसंबन्धे कर्तव्ये, एवं वरणविशेषेण कर्तव्य इति नियम्यते। तस्मान्नेतरेतराश्रयम्। तस्मात्सप्तदशैव ऋत्विजः कर्तव्या इति परिसंख्या। सप्तदश ऋत्विजः संस्कारैः कर्तव्या इति ॥ ३३ ॥

करोतीति। यथैवास्य सूत्रस्य शाटकं वयेत्युक्ते वानेन शाटकः क्रियत इति हि भाविनि संज्ञाविज्ञानादविरोधो विज्ञायते तथैवात्र प्रत्येतव्यम्। एतेन 'अध्वर्युं वृणीते' इति तद्विशेषवचनानि व्याख्यातानि। एवं च व्रियमाणानामृत्विजां द्वितीयानिर्देशोऽवकल्पिष्यते। वरणं चाऽऽधानवत्कर्मौपयिकांस्तानुत्पादयद्दृष्टार्थं भविष्यति। वेदपौर्वापर्यपर्यालोचनात्तु ते वरणेन क्रियन्त इत्यवसानान्नाप्रसिद्धिः। न त्विदं निपातन[२]ाख्यानद्वारेण ऋतुयजननिमित्तत्वं गम्यमानं सत्परित्यक्तुं युज्यते। न च वरणभरणयोः सिद्धर्त्विक्संबन्धित्वेन तानुद्दिश्य श्रूयमाणयोर्विपरीता वचनव्यक्तिर्युक्ता। यच्चाप्रसिद्धाः संस्कर्तुं न शक्यन्त इति वरणेऽप्येवं तुल्यम्। न हि कश्चिदप्रसिद्धं वस्तु कुरुष्वेत्युक्तोऽप्यध्यवस्यति[३]। नापि तेन [४]व्यापृतेनापि तन्निमित्ता निष्पत्तिरध्यवसीयते। यदि तु वेदवाक्यपौर्वापर्येण ज्ञायत इत्युच्यते ततः सिद्धानामेव संस्कारः सुखतरमध्यवसीयते। जानाति ह्येवं वरणं कुर्वन्यथा वेदस्य प्रसिद्धा एव केचिदृत्विजः। मम तु ते वरणद्वारेण प्रसिध्यन्ति, प्राक्तस्मादन्येनानवधारितत्वात्। अथवा तस्यापि सामान्यतोऽस्त्येव प्रसिद्धिः। सर्वो हि भावः केनचिदात्मना सिध्यन्व्यवहारं साधयति। सर्वात्मिकायाः सिद्धेः क्वचिदप्यभावात्। अतो य ऋतौ यजन्ति ये वाऽऽध्वर्यवादिकं कुर्वन्ति त ऋत्विजः। के च ते, ये तत्समर्थाः, सामर्थ्यरहितानामनधिकारात्। के च समर्थाः, ये विद्वांसः। तत्रापि स्मृतिप्रामाण्याद्ये ब्राह्मणास्तदविशेषप्रसक्ते पुनर्विशेषो भवति वरणोपात्ता य इति, ततोऽपि पुनर्दक्षिणाभिर्भ्रियमाणा इति। सेयमेतैर्विशेषैः शब्दार्थसंबन्धव्युत्पत्तिर्भवति। विज्ञानं च तद्विषय-

१ एवं तावद्यथाश्रुतं भाष्यार्थमुपवर्ण्याधुना तत्र च विशेषं वक्तुं दूषणं तावदादौ वदति। मत्वित्यादिना। २ निपातनेति—'ऋत्विग्दधृक्—' इत्यनया स्मृत्या ऋत्विक्पदस्य कर्तृवाचिक्विन्नन्तत्वनिपातनेन ऋतुयजननिमित्तत्वं गम्यत इत्यर्थः। ३ नाध्यस्यतीति—बुद्धिपूर्वकारी तावदप्रसिद्धं वस्तु कर्तव्यतया न जानाति, न प्रयतते चेत्यर्थः। ४ व्यापृतेनापीति—अबुद्धिपूर्वकारिणा प्रयत्नाख्यव्यापारे यदृच्छया क्रियमाणेऽपि न तेन फलनिष्पत्तिर्नैकान्ताद्भवतीत्यर्थः।

मन्यथाऽन्यथा च प्रसज्यमानं विशेषविषयमुपसंह्रियमाणम्[1] । अक्रियमाणमेव सिद्ध-मृत्विक्त्वम् । अपि च वरणभरणाभ्यामृत्विजो वोत्पाद्येरन्, ऋत्विक्त्वं वा । तत्र ऋत्विजस्तावन्मातृपितृभ्यामेवोत्पादिता इति न पुनरुत्पत्तिमपेक्षन्ते । तथा योग्यताल-क्षणमृत्विक्त्वमध्ययनश्रवणाभ्यां सिद्धमिति न पुनः साधनीयम् । वक्ष्यति च ' याज-मानांस्तु[2] ' इत्यत्र न योग्यतैषां यजमानेन कर्तव्येति । सर्वत्र च यदनुत्पन्नं तदुत्पाद्यते, किं चैषां प्राग्वरणादनुत्पन्नं कर्म प्रत्यानमनम् । ननु ऋत्विक्त्वमप्यनुत्पन्नम् । सत्यं, तत्तु पश्चादप्युत्पद्यमानं न पश्यामः । अथ यदुत्पद्यते तदेव ऋत्विक्त्वं, तथा सत्या-नमनमेव तन्नान्यत्किंचित् । न चेदमदृष्टमृत्विक्त्वम् । यस्य हि कार्यमदृष्टं भवति तत्स्वरूपमप्यदृष्टं भवेत् । ऋत्विक्कार्यं तु कर्मनिर्वृत्तिर्दृष्टैव सा कथमदृष्टसाध्या भवि-ष्यति । यावता च सा भवति तत्सर्वं विद्वत्त्वब्राह्मणत्वादि दृश्यत एव । यत्त्वदृष्टं किंचित्तत्प्रकरणवशात्कर्मप्रयोगवचनेन गृह्यमाणं तदर्थमेव नाध्वर्य्वादित्वे व्याप्रियते । न च तद्वरणभरणाभ्यां जायत इति तयोरनिमित्तत्वं भवति । आहवनीयादीनां स्वप्र-करणोत्पत्तीनामदृष्टोपकाराणामनुत्पन्नावस्थानां संस्कारविधानादुपपन्नमुत्पाद्यत्वम् । न हि तत्र होमादिभिस्त्यज्यमानद्रव्याधारोऽपेक्षितैः[3] । तेनावश्यं तत्संबन्धाददृष्टमेवाभ्युप-गन्तव्यम् । न च तदग्निमात्रात्सिध्यतीति तन्निर्वृत्त्यर्थमदृष्टमेवाऽऽहवनीयादित्वमपेक्षि-तम् । अतो नैष दृष्टान्तः । यदि चादृष्टमृत्विक्त्वं वरणभरणाभ्यां जन्येत, ततः सत्रेऽपि यजमानेषु तदाधातव्यं, तद्विशेषाश्चाध्वर्य्वादयो दीक्षावाक्येऽनूद्यन्त[4] इति वरणभरणे कर्तव्ये स्याताम् । तत्र ' वरणमृत्विजामानमनार्थत्वात्सत्रे न स्यात्स्वकर्म-त्वात्[5] ' ' परिक्रयश्च तादर्थ्यात्[6] ' इति च विरुध्यते । तस्मात्कर्मयोग्यतयाऽ-वधारितानामेव वरणभरणाभ्यामुपादाननियमः कर्मार्थः क्रियते । ऋत्विक्शब्दश्चावैगु-ण्यात्तद्विषय एवोपसंह्रियमाणः सतोऽप्यन्यानयोग्यान्नाऽऽलम्बते । सत्रे तु स्वयंकर्तृ-कत्वाद्वरणभरणयोरनपेक्षितयोरग्रहणाद्विनैव ताभ्यामवैगुण्यामिति योग्यतामात्रेणैवाध्वर्यु-त्वादिसिद्धिः । तद्यथा पौर्णमास्या विनाऽपि शाखापरिवासनेन यदेवाङ्गारापोहनलक्षणं

---

1 उपसंह्रियमाणमिति—एभिर्विशेषैर्भवतीति पूरणीयम् । 2 (अ० ३ पा० ८ अ० २ सू० ४) । 3 अपे-क्षित इति—देवतायै यक्तस्य द्रव्यस्य पूर्वदेशादिभञ्जनमात्रेणापि प्रक्षेपघटितहोमपदार्थनिष्पत्तेरित्यर्थः । 4 दीक्षावाक्य इति—सत्रात्मकद्वादशाहप्रकरणे हि श्रूयते 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति-तत उद्गातारं, ततो होतारं ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्धिनो दीक्षयति—ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः, ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति— आग्नीध्रं ब्रह्मणः, प्रतिहर्तारमुद्गातुः, अच्छावाकं होतुः, ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति—पोतारं ब्रह्मणः सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः, ततस्तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारी वाऽऽचार्यप्रेषितः,' इति तदस्मिन्वाक्य इत्यर्थः । 5 (अ० १० पा० २ अ० १० सू० ३४) 6 (अ० १० पा० २ अ० ११ सू० ३५) ।

पक्षेणेति चेत् ॥ ३४ ॥

एवं चेन्मन्यसे, यथोक्तपक्षेणैतदेवमुच्येत। अवयुत्यवादपक्षेण सप्तदशर्त्विज इति। तत्परिहर्तव्यम् ॥ ३४ ॥

न सर्वेषामनधिकारः ॥ ३५ ॥

नैतदेवम्। नात्र सर्वेषां पुरुषाणां वचनं, यानधिकृत्यावयुत्यवादो भविष्यति। यत्र परा संख्या कीर्त्यते तत्रावयुत्यवादो भवति। यथा द्वादशकपाले यदष्टाकपालो भवतीति। न चेह परा संख्या कीर्त्यते। तस्मान्नावयुत्यवाद इति ॥ ३५ ॥

[१७] नियमस्तु दक्षिणाभिः श्रुतिसंयोगात् ॥ ३६ ॥सि०

सप्तदश ऋत्विज इति समधिगतम्। कतमे ते सप्तदश इतीदं चिन्त्यते। किं प्राप्तम्। अज्ञानम्। एवं प्राप्ते ब्रूमः। नियमस्तु दक्षिणाभिः।

द्रव्यं स एवोपवेष इत्यदोषः। तस्माद्यथा 'यूपस्य स्वरुं करोति' इत्यत्राऽऽदाने कर्मशब्द इति वक्ष्यति[२] तथाऽत्र भाष्यकारस्य द्रष्टव्यम् ॥ ३३ ॥

पक्षेणेति चेत्[३] ॥ ३४ ॥

वैश्वानरद्वादशकपालाधिकारे ह्यष्टत्वादय[४] उच्चार्यमाणाः स्वरूपेणानुपयुज्यमानाः शक्नुवन्त्यवयवत्वं गमयितुम्। स्तुत्या चोपयुज्यन्ते। न त्विह परमसंख्योपात्ता यदधिकारात्सप्तदशत्वमवयवः प्रतीयेत। स्तुत्यर्थं च स्यात्। तस्मादृत्विक्त्वोपसंहारार्थमेवैतदिति सप्तदशर्त्विजः ॥ ३५ ॥

(इति—सर्वेषामृत्विक्शब्दावाच्यताधिकरणम् ॥ १६ ॥)

प्रकृतानां ये केचित्सप्तदशेति प्राप्तेऽभिधीयते। सामानाधिकरण्यप्रयोगान्नियमः।

---

१ एवं तर्हि ऋत्विक्शब्दस्य यौगिकत्वे 'वरणेन ऋत्विजः क्रियन्ते' इत्यादिभाष्यस्य का गतिरिति चेदत आह–तस्मादित्यादिना। २ वक्ष्यतीति—(अ० ४ पा० २ अ० १ सू० ६) इत्यत्रेत्यर्थः ३ एतत्सूत्रस्यभाष्यस्य सुस्पष्टतयाऽव्याख्याय सूत्रस्य पाठमात्रं कृतम्। ४ अष्टत्वादय इति–'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते' इत्युपक्रम्यैवं श्रूयते 'यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन्पशून् दधाति' (तै० सं० २–२–५) इत्यादिरिति शेषः।

श्रुतिसंयोगात् । दक्षिणासंबन्धेन नियम्येरन् । एवं ह्याम्नायते । ऋत्विग्भ्यो दक्षिणां ददाति, इत्येवमभिधाय दक्षिणादानक्रमपरे वाक्ये ब्रह्मादयः श्रूयन्ते । अग्नीधेऽग्रे ददातीति, ततो ब्रह्मणे, ततोऽमुष्मै चामुष्मै चेति केचिदेव विशिष्टाः श्रूयन्ते । एवं ये श्रूयन्ते ते तावदृत्विजः । ततोऽभ्यधिका नान्ये भवितुमर्हन्ति । दक्षिणाभिर्नियम इति ॥ ३६ ॥

उक्त्वा च यजमानत्वं तेषां दीक्षाविधानात् ॥ ३७ ॥

य ऋत्विजस्ते यजमाना इत्येवमभिधाय ब्रह्मादीनां दीक्षाक्रमपरे च वाक्ये दीक्षां दर्शयति । कथम् । अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारम् । ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्धिनो दीक्षयति, ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः । ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति, आग्नीध्रं ब्रह्मणः, प्रतिहर्तारमुद्गातुः, अच्छावाकं होतुः । ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति, पोतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः । ततस्तमन्यो ब्राह्मणो दीक्षयति, ब्रह्मचारी वाऽऽचार्यप्रेषित इति । दीक्षा च यजमानसंस्कारः । तस्माद्ब्रह्मादय ऋत्विजः सप्तदश इति ॥ ३७ ॥

तच्च दक्षिणादानक्रमवाक्यगतं ब्रह्मादीनां दृश्यते न चमसाध्वर्यूणाम् । यद्यपि च सिद्धमृत्विक्त्वमनूद्यमानं न शक्यमुपसंहर्तुमिति बुद्धिर्भवति तथाऽपि सप्तदशश्रुत्यपेक्षितविशेषावस्थानं तेष्वेव वेदेन सिद्धवदाश्रितमतोऽस्माकमेवं परिच्छेदो भवति नूनमेत एवर्त्विज इति ॥ ३६ ॥

'य ऋत्विजस्ते यजमानाः' इति यजमानर्त्विक्शब्दौ समानविषयौ नियम्य यजमानसंस्कारं दीक्षां ब्रह्मादिषु क्रमार्थमनुवदन्नेतेषु तौ द्वावपीति दर्शयति । तस्माद्ब्रह्मत्वादिकरणयोग्येष्वेवर्तौ यजत्सु ऋत्विक्त्वं न सर्वेषु । तद्विषयमेव चर्तुयजनं शब्दस्य प्रवृत्तिनिमित्तम् । यथा सास्नादिमद्गमनं गोशब्दस्य, यथा धाय्याशब्दः सामिधेनीषु निपा-

---

१ तेभ्य इति पा० । २ निपात्यमान इति—'पाय्यसांनाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु' पा० सू० (३-१-१२९) इत्यनया स्मृत्येत्यर्थः ।

[१८] स्वामिसप्तदशाः कर्मसामान्यात् ॥३८॥ सि०

एतदुक्तं, सप्तदश ऋत्विज इति, ते च ब्रह्मादयः । तत्र संदेहः । किमेषां सदस्यः सप्तदशः, उत गृहपतिः । किं तावत्प्राप्तम् । सदस्य इति । स हि कर्मकरः । इतरः स्वामी । यश्च कर्मकरः स परिक्रेतव्यः । ऋत्विजश्च परिक्रीयन्ते । तस्मात्सदस्यः सप्तदश ऋत्विगिति । अपि च, तस्य चमसमामनन्ति वरणं च । ऋत्विग्वरीतव्यो न स्वामी । तस्मात्सदस्यः सप्तदश इति प्राप्ते, उच्यते । स्वामिसप्तदशाः कर्मसामान्यात् । स्वाम्येषां सप्तदशः स्यात् । कुतः । कर्मसामान्यात्, यज्ञे कर्तार ऋत्विजो भवन्ति । यज्ञे च कर्ता गृहपतिः, तस्मादृत्विक् । यज्ञकर्मसामान्यात् । यदुक्तं, तं समामनन्ति, तस्य चमसमामनन्ति वरणं च । तस्मात्सदस्यः सप्तदश इति । उच्यते । ब्राह्मणमेव ते

त्यमानस्तास्वेवेत्यवधारणान्नान्यासु धीयमानास्वपि धाय्याशब्दवाच्यत्वं भवतीत्यवधार्यते । तथैवर्ताविव यजत्सु भवति न तु भवत्स्वेवेत्यवधारयितव्यम् ॥ ३७ ॥

(इति—ब्रह्मादीनामेव ऋत्विक्त्वनियमाधिकरणम् ॥ १७ ॥)

दीक्षादक्षिणावाक्ययोः षोडशानां संकीर्तनात्तावन्तोऽवधारिताः । सप्तदशः कस्तेषामिति न ज्ञायते । सदस्ययजमानचमसाध्वर्यवश्चावशिष्यन्ते । तत्र चमसाध्वर्यूणां तुल्यकल्पत्वादन्यतरावधारणप्रमाणं नास्तीति सदस्ययजमानयोरन्यतरः संदिह्यते । तत्र कर्मकरत्वसामान्यात्सदस्यग्रहणप्रसक्तावभिधीयते । स्वामिसप्तदशाः स्युरिति । कथं पुनः पूर्वत्रर्तुयजमानकर्मनिमित्तत्वमनभ्युपगम्याधुना तत्सामान्यात्स्वामिनः ऋत्विक्कर्माभिधीयते । 'सदस्यं वृणीते' इति चोत्पत्तिसंयोगादध्वर्य्वादिवद्भेदः । न च ब्रह्मण्यवयवप्रसिद्धिः संभवति । समुदायप्रसिद्ध्या बाधितत्वात् । न च ब्रह्मणः पुनर्वरणं विधातुमनुवदितुं वा शक्यम् । अध्वर्य्वादिष्वप्येवमेव प्रसङ्गात् । सर्वेषु चोपहवादिषु ब्रह्ममन्त्रव्यतिरेकेणास्य मन्त्रः पठ्यते । तत्र चान्याय्यो विकल्प आश्रीयेत । न च चमससंबन्धेऽपि ब्रह्मणः संकीर्तनं सदस्यशब्देनोपयुज्यते । सामर्थ्याक्षिप्तेन चोपद्रष्ट्रा सदस्येनावश्यं भवितव्यम् । सोऽपि च प्रत्यवेक्षणाद्दतो यजतीति शक्यो वक्तुम् । सर्वे

---

१ व्यतिरेकेणेति—'ब्रह्मन्नुपह्वयस्व' 'सदस्योपह्वयस्व' इत्यादिना ब्रह्ममन्त्रापेक्षया सदस्यमन्त्रस्य पृथगाम्नानात् 'ब्राह्मणमेव ते समामनन्ति' इत्यादिना भाष्योक्तं ब्रह्मण एव सदस्यत्वं दुरभ्युपगममित्याशयः ।

समामनन्ति, वरणमपि चमसश्च ब्रह्मण एव । स हि सदसि भवः । तस्मात्स्वामिसप्तदशाः ॥ ३८ ॥

[१९] ते सर्वार्थाः प्रयुक्तत्वादग्नयश्च स्वकालत्वात् ॥ ३९ ॥ पू०

स्वामिसप्तदशा ज्योतिष्टोमस्य ऋत्विजः समधिगताः । अत्रेदानीमयं संदेहः । किं सर्वं पुरुषकार्यं तैः कार्यं, अग्निभिश्च गार्हपत्यादिभिराग्निकार्यमुत काचिद्व्यवस्थेति । किं तावत्प्राप्तम् । ते सर्वार्थाः

याज्ञिकाश्च भेदेन तं वृणते । तस्मादयुक्ता सदस्यनिराक्रियेति[1] । उच्यते ।

ऋत्वङ्गत्वेन नैवेह सदस्यस्य निराक्रिया ।
चमसाध्वर्युवत्त्वेष नर्त्विगित्यभिधीयते ॥

सदस्यो हि भेदेन वरीतव्य एव । न च ब्रह्मा सदस्यशब्देनोच्यते । ऋतुयजने सति वरणेनर्त्विक्त्वनियमाद्दक्षिणाभागसंबन्धद्वादशाहदीक्षावाक्ययोश्चासंकीर्तनादृत्विगिति नोच्यते । यथा सत्यपि वरणे ऋतुयजनसंबन्धे च कारणद्वयासंभवाच्चमसाध्वर्येव ऋत्विजो नोक्ताः । स्वामिनस्तु यद्यपि च वरणं नास्ति तथाऽप्यन्यत्सर्वमस्तीति युक्तमृत्विक्त्वम् । यत्तु सदस्योऽपि प्रत्यवेक्षणाद्यजतीति । वचनसामर्थ्यादेवासौ व्रियते, न तु कश्चित्पदार्थस्तदधीनः, येनास्य व्यपदेशः स्यात् । न च प्रत्यवेक्षणं नाम कश्चित्पदार्थो येनास्य कर्तृविशेषः केनचित्प्रमाणेन नियम्येत । तस्मात्सत्येत्र सदस्ये सूक्तं स्वामिसप्तदशा इति । यत्तु भाष्यकारेण किंचित्सदस्यनिराकरणपरमुक्तं तदृत्विक्त्वनिराकरणपरस्यातिरभसवचनामित्युपेक्षणीयम् ॥ ३८ ॥

(इति—स्वामिनः सप्तदशत्वाधिकरणम् ॥ १८ ॥)

एवं कर्तृभेदं प्रतिपाद्येदानीं समाख्याविनियोगस्य पूर्वपक्षं रचयति स्म । तत्र ‘ ते सर्वार्थाः ’ इति न ज्ञायते किं क्रत्वर्थपुरुषार्थाभिप्रायमुत क्रत्वर्थसर्वार्थाभिप्रायम् । तत्रापि किं वाक्यसंयुक्तसर्वार्था उतासंयुक्तसर्वार्थाः । यदि तावत्पुरुषार्था अपीत्यभिप्रायः, स वरणभरणयोः प्रकरणाम्नानेन क्रत्वर्थत्वादयुक्तः । उक्तं हि ‘ प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत् ’[2] इत्यादिषु । तथैकादशे[3] वक्ष्यति ‘ निर्देशाद्वा वैदिकानां स्यात् ’[4] इति । तस्मादेवं तावन्न सर्वार्थत्वम । नापि संयुक्तेषु ‘ तान्पुरोऽध्वर्युर्वि

---

१ सदस्यनिराक्रियेति—ब्रह्मव्यतिरिक्तस्य सदस्यस्य निराक्रियेत्यर्थः । २ (अ० ३ पा० ४ अ० ५ सू० १५) । ३ तथा द्वादशे वक्ष्यतीत्येवं पाठ आवश्यकोऽप्येकादश इति पाठो लेखकभ्रान्तिमूलक इति ज्ञेयम् । ४ (अ० १२ पा० २ अ० १ सू० ३) ।

प्रयुक्तत्वादग्नयश्च स्वकालत्वात् । ते वृताः सर्वस्मै पुरुषकार्याय स्युः ।
अग्नयश्चाग्निकार्याय । कुतः । तैः कार्यैराकाङ्क्षितत्वात् । प्रति स्वं ग्रह-

---

भजति ' इत्यादिकश्रुतानामन्येषामवतरणमस्तीति । यानि स्वसंयुक्तानि कार्याणि तानि यत्र तत्र वेदे पठितानि येन केनचित्कर्त्रा यथासामर्थ्यं कर्तव्यानीति सर्वार्थाः । प्रयुक्तत्वादिति—सर्वाणि हि कार्याणि शक्नुवन्ति तान्प्रयोक्तुम् । तथा तेऽपि कार्याणि । सर्वं पुरुषकार्यमिति—यद्यत्कर्माणि पुरुषैः प्रावचनविशेषात्स्वसामर्थ्येन शक्यते तत्तादित्येवं युज्यते, न पुरुषार्थाभिप्रायेण । ये पुनराहवनीयादयस्तेषां सर्वार्थत्वमप्रस्तुतमेव । न च प्रसङ्गादुच्यते । स्वकालत्वस्य हेतोरप्यसमर्थत्वात् । न च तस्योत्तरपक्षे काश्चित्पक्षस्य हेतोर्वा परामर्शोऽस्ति । यदि च लौकिककार्यापेक्षया सर्वार्थत्वमभिधीयते ततो ' विहारो लौकिकानामर्थं साधयेत्प्रभुत्वात् ' इत्युक्त्वा ' निर्देशाद्वा वैदिकानां स्यात् ' इत्यत्र निर्णीतत्वादविचार्यम् । यदपि वेदविहिताग्निकार्यसर्वार्थत्वं प्रकृतिविकृत्योः, तदपि ' अग्निमुपनिधाय स्तुवते ' इत्युदाहृत्य ' विशये लौकिकं स्यात्सर्वार्थत्वात् ' ' न वैदिकमर्थनिर्देशात् ' ' तथोत्पत्तिरितरेषां समत्वात् ' (धिष्ण्याग्नीना स्यात्) इति निर्णीतत्वादविचार्यम् । सिद्धान्तवचनमेवैतन्निराकरणोक्त्यभावात् । तस्मादेवं वर्ण्यते । नैवेदमग्नीना सर्वार्थत्वं पूर्वपक्षीकृतम् । किं तर्हि । अधिकरणान्तरसूत्रोक्तन्यायप्रतिपादितानुमितपूर्वपक्षः सिद्धान्त एवायं सूत्रवाक्यभेदेनोच्यते । न चैतदग्निकार्यापेक्षया सर्वार्थत्वम् । किं तर्हि । प्रकृतिविकृत्यपेक्षया । तत्रानारभ्यवादन्यायेनाऽऽधानवदेव पूर्वोत्तरपक्षौ रचयितव्यौ किमाहवनीयादयः प्रकृत्यर्था आहोस्वित्सर्वार्था इति । तत्र

---

१ तान्प्रयोक्तुमिति—अध्वर्य्वादीनाक्षेप्तुमित्येकोऽर्थः । २ प्रयुक्तत्वादित्यस्यैव द्वितीयार्थमाह—तथेति । अनुष्ठातुं शक्नुवन्तीति शेषपूरणम् । ३ 'सर्वस्मै पुरुषकार्याय' इति भाष्यार्थमाह—सर्वमित्यादिना । ४ (अ० १२ पा० २ अ० १ सू० १) । ५ (अ० १२ पा० २ अ० १ सू० ३) । ६ (अ० ७ पा० ३ अ० १२ सू० ३०) । ७ (अ० ७ पा० ३ अ० १२ सू० ३१) ८ (अ० ७ पा० ३ सू० ३२) । ९ अधिकरणान्तरेति—' प्रकृतौ वा द्विरुक्तत्वात् ' (अ० ३ पा० ६ अ० १ सू० २) इत्यनारभ्यवादाधिकरणसिद्धान्तसूत्रेण, स्वादिरत्वादेः प्रकृतिविकृत्यर्थत्वे द्विरुक्तत्वापत्तिलक्षणो योऽर्थो न्याय उक्तः, ' तत्प्रकृत्यर्थं यथाऽन्येऽनारभ्यवादाः ' (अ० ३ पा० ६ अ० ५ सू० १४) इत्याधानाधिकरणपूर्वपक्षसूत्रेण चाऽऽधानेऽतिदेशाद्दृढीकरणेन प्रतिपादितश्च, तेनानुमितः पूर्वपक्षो यस्य सिद्धान्तस्य स एवाग्नीनां सर्वार्थत्वसिद्धान्तः ' ते सर्वार्थाः प्रयुक्तत्वात् ' इति सूत्रवाक्यापेक्षया भिन्नः तेन ' अग्नयश्च स्वकालत्वात् ' इत्यनेनोच्यत इति पदशोऽर्थः ।

र्थेषामनुवादः। स्वकालत्वादन्यथा सर्वार्था इति समधिगतमेतत्॥३९॥

तत्संयोगात्कर्मणो व्यवस्था स्यात्संयोगस्यार्थवत्त्वात् ॥४०॥ सि०

तत्संयोगात्—विशिष्टपुरुषसंयोगाद्व्यवतिष्ठेत । ये येन पुरुषेण समाख्यायन्ते, ते तेन कर्तव्याः । एवं तेषां पुरुषसंयोगोऽर्थवान् भवि·

'तत्प्रकृत्यर्थं यथान्येऽनारभ्यवादाः' 'प्रकृतौ वा द्विरुक्तत्वात्' इत्येवं प्राप्तेऽभिधीयते । अग्नयः सर्वार्थाः—प्रकृतिविकृत्यर्था भवेयुः । कुतः । स्वकालत्वात्—स्वतन्त्रोत्पत्तित्वादित्यर्थः । तदेतद्वर्णितं 'स्वार्थं वाऽऽधानस्य स्वकालत्वात्' इत्यत्र । न त्वेतत्सर्वविषयं सर्वार्थत्वमवकल्पते ।

द्वारं येषु पराधीनं तेषु तत्प्राप्त्यपेक्षया ।
प्राप्नुवन्तीदृशा भावा न स्वतन्त्राः कथंचन ॥
शास्त्रेण चोदिता ये हि दर्विहोमाः स्वरूपतः ।
तेष्वेवाऽऽहवनीयः स्यान्न यागेष्वप्यचोदनात् ॥

यज्जुहोति तदाहवनीये इति श्रूयते । न यद्यजेरन्निति । तेनावश्यमाहवनीयचोदनया तावत्प्रतीक्षितव्यं यावत् 'चतुरवत्तं जुहोति' 'यद्ग्रहान् जुहोति' 'यच्चमसान् जुहोति' इति चातिदेशेन संबन्धाद्द्वारं प्राप्तम् ।

ततश्चाऽऽहवनीयेन सहैवास्यातिदेशतः ।
प्रकृतौ वा द्विरुक्तत्वादित्ययं निश्चयो भवेत् ॥

तथा च 'तासामग्निः प्रकृतितः प्रयाजवत्' इति सिद्धवत्प्रकृत्यर्थत्वं दर्शितम् । तथा वैकृतचरुपुरोडाशानां प्रत्यक्षहविःश्रपणविधानाद्गार्हपत्यप्राप्तिद्वारं नास्तीत्यवश्यं सगार्हपत्यमेव श्रपणं प्रकृतितः प्राप्नुवदपेक्षितव्यम् । अग्निषु पर्यवसितम् । ऋत्विक्षूत्तरं सूत्रमारभ्यते ॥ ३९ ॥

समाख्यासंयोगाद्व्यवस्था भवेत् । न हि हौत्रमकुर्वतो होतृसमाख्याऽर्थवती भवति । नापि तेनाक्रियमाणस्य हौत्रव्यपदेशोऽवकल्पते । तस्मादन्यथानुपपत्त्या कल्पितया श्रुत्या विनियोगः । तत्र केचिदाहुः । अन्योन्यनिरपेक्षयोरेव रूढिरूपेण कर्तृकर्मसमाख्ययोः प्रसिद्धयोरक्षरसारूप्येणोपतिष्ठमानयोर्विनियोजकत्वमिति । कुतः ।

संयोगः पूर्वसिद्धो हि निमित्तत्वं प्रपद्यते ।
न चेह प्राक्समाख्यानात्किंचित्संयोगकारणम् ॥

---

१ (अ० ३ पा० ६ अ० ५ सू० १४) । २ (अ० ३ पा० ६ अ० १ सू० २) । ३ (अ० ३ पा० ६ अ० ५ सू० १५) । ४ (अ० ३ पा० ६ अ० ६ सू० १६) ।

ख्यति । आध्वर्यवमध्वर्युणा, हौत्रं होत्रा, औद्गात्रमुद्गात्रेति ॥ ४० ॥

होतृशब्दस्तावन्न हौत्रनिमित्त इति राजशब्दवदेव प्रत्ययलोपप्रातिपदिकप्रत्यापत्त्योरस्मरणादवगतमेतत् । न च राजशब्दादिव राज्यशब्दो होतृशब्दाद्धौत्रशब्दः शक्यः कल्पयितुम् । न हि यथा तत्र मन्वादिभिः क्षत्रियस्य रक्षणं विहितं तद्राजकर्मत्वेन ज्ञायमानं प्रत्ययार्थत्वं प्रतिपद्यते । तथेह केनचित्सामिधेन्यनुवचनादेर्होतृकर्मत्वं प्रसिद्धं यन्निमित्ता समाख्या स्यात् । न चैवं सति समाख्या विनियोक्त्रीत्यवसीयते । कथं तर्ह्यसत्यामवयवव्युत्पत्तौ विनियोगः । उक्तमेतच्छब्दसारूप्यमात्रादिति । न त्वेतद्युक्तम् । यदि होतुः कर्म हौत्रमित्येवं न व्युत्पाद्यते ततोऽन्तरेणैव कर्तृकर्मसंबन्धं रूढ्या सारूप्यसमाख्ययोरुपपन्नत्वान्नार्थापत्तिः श्रुतिं कल्पयेत् । न हि वर्णसामान्यमात्रेण शालामालयोः कश्चित्संबन्धः । तथा च वक्ष्यति, न हि कण्वरथंतरे रथंतरसंबन्धः कश्चिदस्तीति । यदपि च कृते राज्ञः कर्मसंबन्धे राज्यशब्दः प्रवर्तत इति । तदयुक्तम् । संबन्धस्याऽऽदिमत्त्वप्रसङ्गात् । तस्माद्यथैव तत्र नित्ययोरेव शब्दार्थयोर्नित्य एव संबन्धे शास्त्रतः प्रतीयमाने साधुत्वप्रतिपत्तिवेलायां राजशब्दमन्वाख्याय राज्यशब्दोऽन्वाख्यायमानो यौगिकस्तन्निमित्तश्चोच्यमानोऽपि नित्यनिमित्तत्वान्नाऽऽदिमत्त्वं प्रतिपद्यते तथैवात्र हौत्रमिति वृद्धिदर्शनाद्धोतृशब्दात् 'तस्येदं कर्म' इत्येवमन्वाख्यानमिति गम्यते । केन तु तत्तस्य कर्मावगतमिति । समाख्यादर्शनात्तदेव तादृशं वचनमनुमास्यामहे । नन्वितरेतराश्रयं प्राप्नोति समाख्यातस्तद्वचनं, तेन क्लृप्ते संयोगे समाख्यासिद्धिरिति । नैष दोषः । समाख्या तावत्प्रतीतिरूपेण प्रत्यक्षा । सा तु केन निमित्तेन प्रवृत्तेति पूर्वप्रवृत्ततयैव निमित्तमपेक्षते । न च तदस्ति । तस्मान्नूनमीदृशी श्रुतिरस्ति, यथा होत्रा कर्तव्यमेतदिति । सर्वेष्वेव लिङ्गादिष्वेवमेतद्भवतीति व्याख्यातम् । अतो नेतरेतराश्रयत्वमिति । ननु चेदम् 'आख्या चैवं तदर्थत्वात्' इत्यनेनैवाधिकरणेन सिद्धम् । सत्यं सिद्धं न तु तत्र विरोधाविरोधौ विचारितौ । इह तु योग्यत्वप्रकरणविशेषात्सर्वार्थत्वप्रसक्त्या विरोधमाशङ्क्य परिहरति, उत्तरविवक्षया वाऽनुवदतीत्यपुनरुक्तम् ॥ ४० ॥

(इति—समाख्ययाऽध्वर्य्वादीनां नियतपदार्थकर्तृताधिकरणम् ॥ १९ ॥)

---

१ (अ० १० पा० ४ अ० २३ सू० ४६) अत्रत्यं 'नासौ कण्वानां रथंतरं कण्वरथंतरमित्येवं कृत्वोच्यते' इत्येवं भाष्यमर्थतः पठति वक्ष्यतीत्यादिना । २ व्याख्यातमिति—बलाबलाधिकरण इति शेषः । ३ (अ० ३ पा० ३ अ० ६ सू० १३) ।

[२०] तस्योपदेशसमाख्यानेन निर्देशः ॥ ४१ ॥ सि०

किमेष एवोत्सर्गः, सर्वं समाख्यातं समाख्यातपुरुषैः कर्तव्यमिति। नेति ब्रूमः। तस्योपदेशाद्विशेषसमाख्यानाच्च निर्देशः। यथोपदेशः, तस्मान्मैत्रावरुणः प्रेष्यति चानु चाऽऽहेति। समाख्या, पोत्रीया, नेष्ट्रीयेति। एष समाख्यायाश्चापवाद इति ॥ ४१ ॥

तद्वच्च लिङ्गदर्शनम् ॥ ४२ ॥

यत्र होतुः प्रातरनुवाकमनुब्रुवत उपशृणुयादिति हौत्रे प्रातरनुवाके समाख्यया प्राप्तं होतारं दर्शयति। तथेदमपरं लिङ्गं भवति, उद्गीथ उद्गातॄणाम्, ऋचः प्रणव उक्थ्यशंसिनां, प्रतिगरोऽध्वर्यूणामिति समाख्याकृतं भेदं दर्शयति। तथेदमपि लिङ्गं भवति। यो वाऽध्वर्योः स्वं वेद स्ववानेव भवति। एतद्वाऽध्वर्योः स्वं यदाश्रावयतीति समाख्याकृतं नियमं दर्शयति ॥ ४२ ॥

[२१] प्रैषानुवचनं मैत्रावरुणस्योपदेशात् ॥ ४३ ॥ पू०

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः। यो दीक्षितो यदग्नीषोमीयं पशुमालभते, इति। तत्रेदं समामनन्ति। तस्मान्मैत्रावरुणः प्रेष्यति चानु चाऽऽह, इति। तत्र संशयः। किं सर्वानुवचनेषु सर्वप्रैषेषु च मैत्रावरुणः स्यादुत यत्रानुवचने प्रैष इति। किं तावत्प्राप्तम्। सर्वानुवचनेषु, अविशेषात्। न हि कश्चिद्विशेष आश्रीयते। अस्मिन्ननुवचने मैत्रा-

---

विशेषसमाख्याऽपि विशेषश्रुतिवदेव शीघ्रतरप्रवृत्तेर्बाधिका भवति ॥ ४१ ॥

सामान्यसमाख्याविनियोगस्यैवैतल्लिङ्गम्। विशेषसमाख्यायां तु किंचिदन्यद्द्रष्टव्यम् ॥ ४२ ॥

(इति—सामान्यसमाख्यातकर्तुर्विशेषसमाख्यादिना बाधाधिकरणम् ॥ २० ॥)

उपदेशात्सिद्धे समाख्याबाधे समस्तैकदेशविषयत्वेन विचारः। ज्योतिष्टोमप्रकरण एवैतच्छ्रूयते 'तस्मान्मैत्रावरुणः प्रेष्यति चानु चाऽऽह' इति। प्रदर्शनार्थं त्वग्नीषोमीय इत्युक्तम्। तत्र सर्वप्रैषाणामाध्वर्यवत्वं, सर्वानुवचनानां च हौत्रसमाख्यानम्। तत्किमनेनोपदेशेन समस्तविषयः समाख्ययोर्बाध उत क्वचिदेवेति। किं प्राप्तं, प्रैषानुवचनोद्देशेन मैत्रावरुणोपादानादुद्दिश्यमानयोश्च शब्द[1]प्रतिपादितसाहित्यविवक्षानुपपत्तेः

---

१ शब्दप्रतिपादितेति—एकवाक्योपादानावगतस्यार्थः।

वरुणोऽस्मिन्निति। तस्मात्सर्वानुवचनेषु सर्वप्रैषेषु च मैत्रावरुणः स्यात् ॥ ४३ ॥

पुरोनुवाक्याधिकारो वा प्रैषसंनिधानात् ॥ ४४ ॥ सि०

पुरोऽनुवाक्यां वा मैत्रावरुणोऽनुब्रूयात्। कुतः। यत्र प्रैषश्चानुवाक्या च सहोच्येते तत्र मैत्रावरुणः। यत्र केवलानुवाक्या न तत्र मैत्रावरुणः। यत्र वा केवलः प्रैषस्तत्रापि न। यत्रोभे समुच्चीयेते, तत्र स भवेत्। तथा हि समुच्चितयोस्तं समामनन्ति, तस्मान्मैत्रावरुणः प्रेष्यति चानु चाऽऽहेति। चशब्दात्समुच्चितयोरिति गम्यते ॥ ४४ ॥

प्रातरनुवाके च होतृदर्शनात् ॥ ४५ ॥

इतश्च पश्यामो न सर्वानुवचनेषु मैत्रावरुण इति। कुतः। यतः

श्रूयमाणश्च चशब्दः समुच्चयान्वाचयमात्रं प्रतिपादयति नेतरेतरयोगसमाहारौ, नित्यं समासगम्यत्वात्। न चेहान्वाचयलक्षणमुभयोस्तुल्यत्वादुपपद्यत इति समुच्चयः स्यात्। स च पृथगपि सर्वेष्वनुष्ठीयमानेषु संभवत्येवेति सामान्यवचनात्सर्वप्रत्ययः ॥ ४३ ॥

न सर्वप्रैषानुवचनेष्वसौ भवेत्। क्व तर्हि। पुरोनुवाक्यासु। प्रैषान्तान्यनुवचनानि पुरोनुवाक्याः। ताश्च प्रकृत्यैतद्वचनं प्रवृत्तं 'तस्मान्मैत्रावरुणः' इति। ताश्च तादृश्यो हौत्र एव पठिता इति तस्यैव केवलस्य प्राप्नुवन्ति। यस्तु तासामन्ते यजेतिशब्दः स इष्टिप्रकृतिकेषु तावदङ्गेष्वतिदेशनाध्वर्योः प्राप्नोति। सोमयागेष्वपि 'प्रैषेषु च पराधिकारात्'[1] इत्येवं निवर्तमानः 'तेषां यतो विशेषः स्यात्'[2] इत्येवं मैत्रावरुणस्यैव। अथवा प्रेषकस्योभयत्र कर्तृत्वाद्वक्ष्यमाणेन न्यायेन प्रेष्यत्वं मैत्रावरुणस्य कल्पयित्वा होतुरेव प्राप्नोति। तथाऽध्वर्योः 'प्रेष्य' इति प्रेषान्तराम्नानात् 'यज' इत्येष निवर्तमानः प्रतिप्रस्थातुः प्राप्नोति। शेषाणि तु प्रैषानुवचनानि निर्ज्ञातकर्तृविशेषत्वान्निराकाङ्क्षाण्येवेति न तेषु मैत्रावरुणविधिः संभवति। पुरोनुवाक्यानां पुनरमर्यांशपातित्वादेकपदार्थत्वेन च नानाकर्तृत्वानुपपत्तेर्होतुरध्वर्योश्च प्रच्यवमानानां साकाङ्क्षत्वात्संनिधानाच्च युक्तो मैत्रावरुणविधिः। एवं चशब्दोऽपि सहप्रयोगादपि प्रकृष्टार्थः समर्थितो भवति, प्रैषसंनिधानात्। न च 'प्रेष्य' इत्यादयोऽपि प्रैषास्तस्यैवाऽऽत्मविषयाः संभवन्ति ॥ ४४ ॥

---

१ (अ० ३ पा० ८ अ० ११ सू० २२)। २ (अ० ३ पा० ८ अ० १० सू० २१)।

प्रातरनुवाके होतारं दर्शयति । कथम् । यत्र होतुः प्रातरनुवाकमनुब्रुवत उपशृणुयात्तदाऽध्वर्युर्गृह्णीयादिति । तस्मान्न सर्वानुवचनेषु मैत्रावरुण इति ॥ ४५ ॥

[२२] चमसांश्चमसाध्वर्यवः समाख्यानात् ॥ ४६ ॥ पू०

सन्ति चमसाध्वर्यवस्तेषु संदेहः । किं चमसाध्वर्यवश्चमसाञ्जुहुयुरुताध्वर्युरिति । चमसाध्वर्यव इति ब्रूमः । कस्मात् । चमसेष्वाध्वर्यवं ते कुर्वन्तीति चमसाध्वर्यवः । तस्मात्ते जुहुयुरिति ॥ ४६ ॥

अध्वर्युर्वा तन्न्यायत्वात् ॥ ४७ ॥ सि०

अध्वर्युर्वा जुहुयात् । एष हि न्यायः । यदाध्वर्यवपदार्थमध्वर्युः कुर्यात्, आध्वर्यवश्च होमः । तस्मादध्वर्युर्जुहुयात् । ननु चमसाध्वर्यव इति विशेषसमाख्यानाच्चमसाध्वर्यवो होष्यन्तीति । नेत्युच्यते । चमसेष्वेतेऽध्वर्युवद्भवन्तीति चमसाध्वर्यवः । यदि तैरध्वर्युर्जुहोति, ततस्तैश्चमसाध्वर्युभिरपि होतव्यम् । यदि चमसाध्वर्यवो जुह्वति नाध्वर्युस्तदा ते न तद्वत्स्युश्चमसाध्वर्यवः । तस्मान्न जुहुयुरिति ॥ ४७ ॥

चमसे चान्यदर्शनात् ॥ ४८ ॥

[1]चमसे चा[2]न्यं चमसाध्वर्योर्दर्शयति । कथम् । चमसांश्चमसाध्वर्यवे प्रयच्छाति, तान् स वषट्कर्त्रे हरति, स हुत्वा चमसाध्वर्यवे प्रयच्छ-

---

प्रातरनुवाके च होतृदर्शनात् ॥ ४५ ॥[3]

(इति—प्रैषान्तानुवचनेष्वेव मैत्रावरुणस्य कर्तृतानियमाधिकरणम् ॥ २१ ॥)

उन्नयनासादनहोमादि यावत्किंचिदध्वर्योश्चमसेषु प्राप्नोति तत्सर्वं विशेषसमाख्यानाच्चमसाध्वर्युभिः कर्तव्यम् ॥ ४६ ॥

सा नाम विशेषसमाख्या सामान्यसमाख्यां बाधते या तन्निरपेक्षा प्रवर्तते । चमसाध्वर्युसमाख्या तु चमसेष्वध्वर्युवद्वृत्तिं प्रतिपादयति । तद्यदि तावदध्वर्युर्नैव जुहुयान्न तर्हि तान् जुह्वतस्ते चमसाध्वर्यवो भवन्ति । काममजुह्वत एव तद्भावं लभेरन्नान्यथा । यदि तु स जुहोति ततः कदाचित्तस्य व्यापृतत्वेनाशक्तौ सत्यां ते जुह्वतस्तद्भवेयुस्तस्माज्जुहोत्यध्वर्युः ॥ ४७ ॥

वषट्कारिणं प्रति प्रयोजनान्तराभावाद्भक्षार्थे नयने चमसाध्वर्युं नेतारं ब्रुवन्नहु-

---

१ चमसेषु चान्यं चमसाध्वर्युभ्य इति पा० । २ अन्य इति पा० । ३ एतत्सूत्रस्थभाष्यस्य स्पष्टत्वान्न व्याख्यातम् ।

तीति गम्यते । एवं स वषट्कर्त्रे हरति, भक्षयितुमिति गम्यते । तस्माद्धुतस्य चमसाध्वर्यवे प्रदानम् । यो जुहोति, स प्रयच्छति । तस्मादन्यो जुहोतीति । अपि च । यो वाऽध्वर्योः स्वं वेद स्ववानेव भवति । स्रुग्वाऽध्वर्योः स्वं वायव्यमस्य स्वं चमसोऽस्य स्वमिति । न तावदस्य चमसः स्वम् । यजमानस्य हि सः । चमसोऽस्य स्वमिति ब्रुवन्नध्वर्योश्चमसेन होमं दर्शयति ॥ ४८ ॥

अशक्तौ ते प्रतीयेरन् ॥ ४९ ॥

अथ कथं चमसाध्वर्यव इति समाख्यानम् । उच्यते । अशक्तौ ते प्रतीयेरन् । यदा व्यापृतत्वान्न शक्नोत्यध्वर्युर्होतुं तदा समाख्यासामर्थ्यात्ते होष्यन्ति ॥ ४९ ॥

[२३] वेदोपदेशात्पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ॥५०॥ पू०

अस्त्यौद्गात्रे समाख्यातः श्येनः, आध्वर्यवे वाजपेयः । तत्र संदेहः । किं श्येने, उद्गातृभिरेव पदार्थाः कर्तव्याः, वाजपेयेऽध्वर्युभिरुतोभयत्र नानर्त्विग्भिरिति । किं प्राप्तम् । वेदोपदेशात् । समाख्यानादित्यर्थः । पूर्ववत् । यथा, आध्वर्यवमिति समाख्यानात्पदार्थानध्वर्युः करोति, एवमेव वेदान्यत्वे यथोपदेशं स्युः । यो येन समाख्याते वेदे उपादिष्टस्तस्य पदार्थास्तेनैव कर्तव्याः । सोऽङ्गः स तत्रोपदिश्यते । तस्माच्छ्येने, उद्गातृभिर्वाजपेये चाध्वर्युभिः पदार्थाः कर्तव्या इति ॥ ५० ॥

तस्य भक्षणासंभवाद्य एव जुहोति स एव प्रयच्छति भक्षणार्थं तं च ग्रहीतृत्वेन चमसाध्वर्यूणां व्यापृतत्वात्तेभ्योऽन्यमध्वर्युं दर्शयति ॥ ४८ ॥

अशक्तौ ते प्रतीयेरन् ॥ ४९ ॥

(इति—चमसहोमेष्वध्वर्युकर्तृकत्वाधिकरणम् ॥ २३ ॥)

‘ गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इत्यत्र व्याख्यातं यथाऽङ्गानि

---

१ साङ्गस्तत्रेति पा० । २ ‘ अध्वर्युर्वा तन्न्यायत्वात् ’ इति सूत्र एव ‘ यदि तु स जुहोति तत. कदाचित्तस्य व्यापृतत्वेनाशक्तौ सत्याम् ’ इत्यादिना व्याख्यातत्वादधुना सूत्रस्य पाठमात्रं कृतम् । ३ (अ० ३ पा० ३ अ० २ सू० ९)

तद्ग्रहणाद्वा स्वधर्मः स्यादधिकारसामर्थ्यात्सहाङ्गै-रव्यक्तः शेषे ॥ ५१ ॥ सि०

तद्ग्रहणात्—प्राकृतधर्मग्रहणाद्वा, स्वधर्मः—स्वैर्धर्मैश्चोदकप्राप्तैः संयुक्तः स्यात् । चोदकसामर्थ्यात्सहाङ्गैः कुर्यादिति श्रूयते । तानि चाङ्गानि ज्योतिष्टोमे सन्त्यपेक्ष्यन्ते । तत्र ज्योतिष्टोमे नानर्त्विजस्तैरस्य सहैकवाक्यता । ननु प्रत्यक्षा समाख्या, चोदक आनुमानिकः । उच्यते । सत्यं प्रत्यक्षा समाख्या । लौकिकी तु सा । तत्रानुमाय वैदिकं शब्दं तेनैकवाक्यता स्यात् । चोदके पुनर्विप्रकृष्टाधीतया प्रत्यक्षयेतिकर्तव्यतया सहैकवाक्यता । तस्माच्चोदको बलवत्तरः ।

प्रधानवेदव्यपदेशं लभन्त इति । तस्माच्छ्येने सर्वे पदार्थाश्चोदकप्राप्ता उद्गातृभिः कर्तव्या इति ॥ ५० ॥

उक्तं, वक्ष्यते चैतद्यथा जघन्यकालत्वात्प्रयोगवचनश्चोदकाद्दुर्बल इति । प्रयोगवचनाश्रया च प्रधानसमाख्या, सा सत्यपि प्रत्यक्षत्वे दुर्बला । यावच्चातिदेशेन नाङ्गानि प्राप्यन्ते तावत्कस्य कर्तारं नियच्छति । यदा तु प्राप्तानि भवन्ति तदैषां क्लृप्तकर्तृसंबन्धान्न कदाचिदपेक्षेति किं समाख्या करिष्यति । न चात्र प्राप्तबाधो भवति, श्रुतिकल्पनेन समाख्याया विप्रकृष्टत्वात् । उक्तं ह्येतद्यथा क्लृप्तमूलानां प्रमाणानां प्राप्तबाधो भवति न कल्प्यमूलानामिति । तस्मात्प्राप्तकृतग्रहणेन तदधिकारसामर्थ्याज्ज्योतिष्टोमवदेव नानाकर्तृकः स्यात् । यद्यपि च प्रकृतावपि समाख्ययैव नानाकर्तारस्तथाऽपि क्लृप्तसंबन्धत्वादिह श्रुतितुल्यता । यत्त्वप्राकृतं किंचिदाम्नायते तस्य प्रधानसमाख्यात कर्ता भविष्यतीति दर्शयन्नाह—'अव्यक्तः शेषे' इति । अक्लृप्तावस्थत्वादव्यक्तोऽयं कर्तृसंबन्धः क्लृप्तादन्यत्र भवितुमर्हति । न त्वस्य विषयः सम्यग्दृश्यते । कण्टकवितोदनादीनि यद्वा प्रधानसमाख्याते वेदे पठ्यन्ते, वेदान्तरे वा । यदि तावत्तत्रैव ततः समाख्ययैव तेषां

---

१ चोदकेनेति पा० । २ उक्तमिति—गुणमुख्यव्यतिक्रमाधिकरणे स्वरचर्चायां स्वयमुक्तमित्यर्थः । ३ वक्ष्यत इति—(अ० ५ पा० १ अ० १० सू० १८) इत्यत्र भाष्यकारेणेत्यर्थः । ४ (अ० ३ पा० ३ अ० ७) इत्यत्र 'अथ यत्तत्र तत्रोच्यते, इदमनेन बाध्यते' इत्यादिभाष्यग्रन्थव्याख्यानावसर इत्यर्थः । ५ समाख्ययैवेति—औद्गात्रमिति समाख्यायाः सर्वनामार्थविहितत्वात् [illegible] सर्वनाम्नश्च बुद्धिस्थप्रकारावच्छिन्नवाचित्वात्प्रत्येकवृत्तित्वाद्वाक्यात्स्वसमाख्ययैव कर्तृप्राप्तिर्न प्रधानसमाख्ययेत्यर्थः ।

यत्तूक्तं समाख्यानादिति । तत्रोच्यते । अव्यक्तः शेषे, समाख्यातो भविष्यति । यः पदार्थो न चोदकेन प्राप्नोति, तत्र समाख्यया नियमो भविष्यति । यथा, श्येने कण्टकैर्वितुदन्तीति, उद्गातारो विलोत्स्यन्ति, वाजपेये चोषं पुटैरर्पयन्तीत्यध्वर्यवोऽर्पयिष्यन्ति ॥ ५१ ॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये तृतीयाध्यायस्य सप्तमः पादः ॥

कर्तृसंबन्धो न प्रधानद्वारेण । अथ तु वेदान्तरे पठ्यन्ते ततः प्रत्यक्षत्वे सत्यपि तयव विशेषसमाख्यया बलीयस्या भवितव्यम् । अथात्रापि गुणमुख्यव्यतिक्रमन्याय आश्रीयते ततः स्तोत्रशस्त्रादीनां ज्योतिष्टोमस्याऽऽध्वर्यवसमाख्यानादध्वर्युकर्तृकत्वप्रसङ्गः । न चात्र 'मन्द्रं प्रातःसवने' इत्यादिवत्समाधानमस्ति । तस्माच्च प्रधानेनाङ्गेषु स्वसमाख्या बाध्यते । सा त्वौत्पत्तिकेन कर्तृसंबन्धेन विनियुक्तार्था सती प्रधानेन गृह्यते । न चाङ्गानां प्रधानद्वारेणाऽऽध्वर्यवादिसमाख्या युज्यते । न हि प्रधानान्याध्वर्यवादिसमाख्याभिर्युज्यन्ते, गुणभूतेषु कर्तृव्यापारात् । या च प्रधानेषु न व्यापृता सा तद्द्वारेणाङ्गेष्ववतरिष्यतीति कुत एतत् । ऋग्वेदादिसमाख्या प्रधानेष्वङ्गेषु चाविरुद्धा । तेन क्रियत इति च तत्र व्यपदेशः । स च प्रधानप्रयोगवचनेन विधेयत्वादङ्गेषु युज्यते । पाठकृता चाऽऽध्वर्यवादिसमाख्या । सा यथापाठमेव भवितुमर्हति । न चात्र गुणमुख्यव्यतिक्रमन्यायेनानभ्युपगतेन किंचिद्दुष्यति । कण्टकवितोदनादयश्च प्रधानवेदसमानोत्पत्तय एव द्रष्टव्याः । तदात्मना च शक्यम् 'अव्यक्तः शेषः' इति वक्तुं, नावश्यं प्रधानादेवावतरन्ती समाख्याऽनुगृह्यते । साक्षादनुग्रहेऽप्यननुग्रहेऽपि वाऽन्याङ्गेषु कृतार्थत्वेनाविरोधांशेन प्राकृताङ्गव्यतिरिक्तेषु समाख्या विनियोक्त्रीति सिद्धम् ॥ ५१ ॥

(इति—श्येनादौ प्राकृताङ्गेषु नानाकर्तृकत्वाधिकरणम् ॥ २१ ॥)

इति—श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके तृतीयाध्यायस्य सप्तमः पादः ।

---

१ समाख्येति पा० । २ (अ० ३ पा० ३ अ० २) अत्रत्यन्याय इत्यर्थः ।

अथ तृतीयेऽध्यायेऽष्टमः पादः ॥

[१] स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात् ॥ १ ॥ सि०

अस्ति परिक्रयो ज्योतिष्टोमे, द्वादशशतं, दर्शपूर्णमासयोरन्वाहार्यम् । तत्र संदेहः । किमध्वर्युणा परिक्रेतव्या ऋत्विज उत स्वामिनेति । किं प्राप्तम् । समाख्यानादध्वर्युणेति प्राप्ते, ब्रूमः । स्वामिकर्म परिक्रयः । स्वयं करोतीति गम्यते । कस्मात् । कर्मणस्तदर्थत्वात् । फलकामो हि यजमानः । यश्च फलकामस्तेन स्वयं कर्तव्यम् । स यदि परिक्रीणीते, ततः स्वयं सर्वं करोतीति गम्यते । अथ न परिक्रीणीते न सर्वं कुर्यात् । तस्मात्स्वामी परिक्रीणीत इति ॥ १ ॥

वचनादितरेषां स्यात् ॥ २ ॥

किमेष एवोत्सर्गः । नेत्युच्यते । वचनादितरेषां स्यात् । यत्र वचनं भवति तत्र वचनप्रामाण्याद्भवति परिक्रयः । य एतामिष्टकामुपदध्यात्स त्रीन्वरान्दद्यात्, इति ॥ २ ॥

समाख्यापवादत्वेनैतदपि विचार्यते । किं परिक्रय आध्वर्यवादिष्वाम्नानात्तत्समाख्यातैः पुरुषैः कर्तव्य उत स्वामिनेति । सिद्धे त्वेतस्मिन् ' अन्यो वा स्यात्परिक्रयाम्नानात् '.इत्येतद्द्रष्टव्यम् । तथा स्वामिना लौकिक उपाय आस्थेयो यथाऽध्वर्य्वादयः स्वद्रव्येणेतरान्परिक्रीणते समाख्यानुग्रहार्थमिति प्राप्तेऽभिधीयते ।

लौकिकाश्रयणं तत्र यत्र नान्योऽस्ति वैदिकः ।
वैदिके दक्षिणादाने सति किं लौकिकाश्रयः ॥

परिक्रयेण हि सर्वत्र स्वयं कर्तृत्वं यजमानस्योपपादितं यदि परिक्रयमपि न कुर्यान्न कश्चित्कर्तृत्वं प्रतिपद्यते । लौकिकेनोपायेन प्रतिपत्स्यत इति चेत् । न वचनादृते स्वयं कर्तृत्वबाधासंभवात् । तस्मात्स्वामिकर्म ॥ १ ॥

उपदध्यादिति परस्मैपदाद्याजमानत्वेऽवधारिते वरदानमृत्विक्कर्म । तत्सिद्धिश्च यदि तावच्छास्त्रीयेण परिक्रयेण लभ्यते ततोऽस्त्येव यजमानस्य कर्तृत्वम् । अथ न लभ्यते ततो लौकिक उपाय इति ॥ २ ॥

(इति—दक्षिणादानस्य यजमानकर्तृकत्वाधिकरणम् ॥ १ ॥)

---

१ स्वयमिति पा० । २ (अ० ३ पा० ७ अ० ८ सू० २०) ।

[२] संस्कारास्तु पुरुषसामर्थ्ये यथावेदं कर्मवद्-व्यवतिष्ठेरन् ॥ ३ ॥ पू०

ज्योतिष्टोमे श्रूयते—केशश्मश्रु वपते, दतो धावते, नखानि निकृन्तते, स्नाति, इति । तत्र संदेहः । किमेवंजातीयका अध्वर्युणा कर्तव्या उत यजमानेनेति । किं प्राप्तम् । अध्वर्युणा कर्तव्याः संस्कारा यथावेदं व्यवतिष्ठेरन् समाख्यानात्पुरुषेण कर्मवत् । यथा, अन्ये पदार्था यस्मिन्वेद आम्नातास्तत्समाख्यातेन पुरुषेण क्रियन्ते, एवमेतेऽपीति ॥ ३ ॥

याजमानास्तु तत्प्रधानत्वात् कर्मवत् ॥ ४ ॥ सि०

यजमानेन वा कर्तव्याः । कुतः । पुरुषप्रधानत्वात् । कथं पुरुषप्राधान्यम् । कर्त्रभिप्रायं क्रियाफलं गम्यते, तस्मात्पुरुषस्य कर्मकरणसामर्थ्यमुपजनयन्ति । न च कश्चिद्येन कर्मकरणेन सामर्थ्यमुपजन्यते तदर्थं पुरुषान्क्रीणातीति । ईप्सितेभ्यः पदार्थेभ्यः क्रीणाति । येन यस्य सामर्थ्यं भवति, तत्तेनैव कर्तव्यम् । कर्मवत् । यथा प्रधानकर्माणि पुरुषार्थानि यजमानस्य भवन्त्येवमेतदपीति ॥ ४ ॥

व्यपदेशाच्च ॥ ५ ॥

परस्मैपदव्यपदेशश्च भवति । तमभ्यनक्ति, शरेषीकयाऽनक्ति, इति च । अन्यो यजमानस्याञ्जनमभ्यञ्जनं करोतीति गम्यते ॥ ५ ॥

कर्तृत्वमेवैतैर्विना विगुणमिति यथासमाख्यं संस्काराः ॥ ३ ॥

पुरुषप्रधानत्वादेषां याजमानता । गुणभूते हि कर्तर्यपेक्षिते समाख्या नियामिका भवति । प्रधानत्वं च यजमानस्यासंदिग्धमवधारितम् । न चैते कर्तृत्वसंजननार्थाः । तैर्विनाऽपि सिद्धे कर्तृत्वे फलमात्रानुत्पादात् । ऋत्विक्फलं च दक्षिणालाभात्मकं विनाऽपि तैरुपलभ्यते न तु याजमानम् । तस्माद्यथैव प्रधानानि पुरुषार्थत्वाद्यजमानकर्तृकाणि भवन्ति, एवमेतेऽपीति, यथाप्राप्तरूपाणामेव चैषां यजमानगामित्वमिति न दन्तधावनमध्वर्युणा गृहीत्वा यजमानस्य दन्ताः क्षालयितव्याः । केशश्मश्रुवपनेऽपि नित्यं नापितकर्तृत्वमिति नाध्वर्योः क्षुरग्रहणापत्तिः ॥ ४ ॥

अध्वर्युव्यापारे च 'अभ्यनक्ति' इति परस्मैपदेन निर्देशात् 'अभ्यङ्क्ते' इत्यात्मनेपदयुक्तो विधिर्यजमानस्येति गम्यते ॥ ५ ॥

---

१ कर्मकरणे, इति पा° । २ दन्तधावनमिति—दन्तसंशोधकं काष्ठमित्यर्थः । ३ नापितकर्तृके प्रयोजकत्वेनैवास्य कर्तृत्वमिति क्वचित्पाठः ।

गुणत्वे[1] तस्य निर्देशः ॥ ६ ॥

यदुक्तं समाख्यानाद्यथावेदमिति। नैतदेवम् । गुणत्वे तस्य निर्देशः। तत्र वयं सामाख्यां नियामिकामिच्छामो, यत्र कर्मणः प्राधान्यम् । यदर्थं क्रेतव्याः पुरुषाः प्राप्तास्तत्र समाख्यया नियमः । कल्प्यो हि संबन्धो वपनादिभिः पुरुषाणाम् । अदृष्टार्थत्वात् । क्लृप्त आरादुपकारकैः । न च क्लृप्त उपपद्यमाने कल्प्यः शक्यः कल्पयितुम् । तस्मान्न पुरुषप्राधान्ये समाख्या नियामिका स्यात् ॥ ६ ॥

चोदनां प्रति भावाच्च ॥ ७ ॥

चोदनेत्यपूर्वं ब्रूमः । अपूर्वं प्रति संस्कारा विधीयन्ते । ते ह्यसंभवाद्द्रव्येषु कल्प्यन्ते । संनिकृष्टद्रव्याभावे च विप्रकृष्टेषु भवेयुः । यदा तु संनिकृष्टे द्रव्ये संभवन्ति तदा न विप्रकृष्टेषु प्रयोक्तव्याः । कृतार्थत्वात् । तस्माद्याजमाना इति ॥ ७ ॥

अतुल्यत्वादसमानविधानाः स्युः ॥ ८ ॥

इदं पदोत्तरं सूत्रम् । अथ कस्मान्न समानविधाना भवन्ति । अविशेषविधानाद्धि पुरुषमात्रस्य प्राप्नुवन्ति । तदुच्यते । नैतत्समानं सर्वपुरुषाणां विधानम् । कुतः । अतुल्यत्वात् । अतुल्या एत एतद्विधानं प्रति । काऽतुल्यता । यद्यजमानस्य विहिता न ऋत्विजाम् । कथं यजमानस्य विहिता इत्यवगम्यते । अर्थात्स्वयं प्रयोगे स्यादिति। नन्वविशेषादृत्विजामपि विहिताः । प्रयोजनाभावादविहिता इति पश्यामः ।

यत्त्वितरकर्मवत्समाख्यया नियम्यत इति । तत्र समाख्या नियामिका भवति, यत्र कर्तुरपेक्षा । क्व चासौ, यदर्थः परिक्रयः । स च कर्तुः क्वचिद्गुणत्वमापादयितुं क्रियते न संस्काराय । तद्दर्शयति कल्पनीयो हि वपनादिभिः सह विनैवापेक्षया संबन्धः । इतरैः[2] पुनः क्लृप्तोऽपेक्षणादिति ॥ ६ ॥

प्रधानापूर्वाश्रयत्वाच्च यजमानस्य संस्काराः संनिकृष्टाः सुखमपूर्वेण ग्रहीष्यन्ते । तत्सिद्ध्यर्थत्वाद्वा तत्रैव कर्तव्या इति ॥ ७ ॥

अनेन च न्यायेन यजमानस्य, समाख्यया चर्त्विजां भवन्तु विरोधाभावात् । न च संस्कारत्वात्प्रतिप्रधानमावर्तमाना दोक्ष्यन्तीति चोदिते वदति । नैतद्युक्तम् । सर्वं हि यजमानेन स्वयं कर्तव्यं परिक्रयेण वा कारयितव्यम् । तद्यदि संस्कारानध्वर्य्वादयः

---

१ गुणत्वेनेति पा° । २ इतरैः—आरादुपकारकैरङ्गैरित्यर्थः ।

कथं प्रयोजनाभावः। ऋत्विग्भिः क्रियमाणा न यजमानेन कृता न कारिताः। अतदर्थत्वात्परिक्रयस्य। स्वयंकृताश्च नार्थिन उपकुर्वन्ति। तस्मादप्रयोजनाः। अत ऋत्विजामविहिताः। एतदतुल्यत्वम्। तस्मान्न समानविधाना इति ॥ ८ ॥

[३] तपश्च फलसिद्धित्वाल्लोकवत् ॥ ९ ॥ सि०

तपः श्रूयते—द्व्यहं नाश्नाति, त्र्यहं नाश्नाति, इति। तत्र संदेहः। किमार्त्विजं तपः, याजमानमिति। किं प्राप्तम्। समाख्यानादार्त्विजं तप इति प्राप्तम्। एवं प्राप्ते ब्रूमः। याजमानं तप इति। कुतः। फलसिद्धित्वात्। फलसिद्ध्यर्थं तपः। तपःसिद्ध्या यागफलं सिध्यति। कथमेतदवगम्यते। दुःखं हि तपः। दुःखं चाधर्मफलम्। अधर्मो यागफलस्य प्रतिबन्धको भवति। अश्रेयस्करो हि सः। तस्मिन्सति न श्रेयो भवितुमर्हति। तस्मात्सोऽपनेतव्यः। फलभोगेन च विरुध्येते धर्माधर्मौ। तस्माद्दुःखफलभोगायाधर्मः श्रूयते। यत्तेन दुःखमुत्पादयितव्यमिदं तदिति। एवं दृष्टार्थं भवति, नादृष्टं कल्पयितव्यम्।

कुर्युस्ते परिक्रयस्यायोग्यत्वेनासाध्यत्वान्न कारिता नापि कृता इत्यकर्माङ्गमेव स्युः। तस्मान्नर्त्विग्यजमानानामेते समानविधाना इति ॥ ८ ॥

(इति— वपनादिसंस्काराणां याजमानत्वाधिकरणम् ॥ २ ॥)

तपसो दुःखकरत्वात्कर्ता गुणभूतः समाख्यया नियम्यत इत्याशङ्कां निवर्तयति। यस्मादिदमपि संस्कारवत्फलप्रतिग्रहणयोग्यत्वं करोति। यजमानस्य च योग्यत्वमप्रतिबद्धं कर्तव्यं नर्त्विजस्तस्माद्याजमानम्। योग्यता च सर्वत्रैव द्विप्रकारा दोषापनयेन गुणान्तरोपजननेन वा भवति। तत्र संस्कारा गुणान्तरमुपजनयन्ति। तपश्च दोषनिर्घातं करोति। यो हि ज्योतिष्टोमादि करोति तस्यैकान्तेनास्मिन्नन्यस्मिन्वा जन्मनि विहिताकरणप्रतिषिद्धसेवानिमित्ता दोषाः सन्ति। ते चानपनीताः क्रतुविपरीतस्वफलोपभोगदानादत्यन्ताविगुणस्यापि क्रतोः फलं प्रतिबध्नन्ति। सोऽयं क्रतुरप्रतिबन्धहेतुं कंचिदपेक्षते। तत्र प्रकरणश्रुतस्यैव तपसोऽवश्यं क्रतुं प्रति कथंचिदुपकारकत्वं कल्पयितव्यम्। तत्रापेक्षासंनिधियोग्यत्वैर्दोषक्षपणकल्पनमेव ज्यायः। शक्यं हि दुःखदानादधर्मस्य कार्यविरोधिनस्तपसाऽपनयनम्। यथैव प्रायश्चित्तचरणाद्दुःखेनाल्पेनापि सता

---

१ धर्म इति पा०।

तेन फलोपभोगेन क्षीणेऽधर्मेऽप्रतिबद्धो यागः फलं दास्यतीति । फल-सिद्धिश्च यजमानस्य कर्तव्या, नर्त्विजाम् । तस्माद्याजमानं तप इति॥९॥

वाक्यशेषश्च तद्वत् ॥ १० ॥

एतमेवार्थं वाक्यशेषोऽपि द्योतयति । यदा वै पुरुषे न किंचना-न्तर्भवति, यदाऽस्य कृष्णं चक्षुषो नश्यति, अथ मेध्यतम इति । यदाऽनशनस्तदा मेधार्ह इति । मेधश्च यज्ञो, यज्ञश्च त्यागः । त्यागं कर्तु-मर्हस्तपसा क्रियत इति वाक्यशेषो भवति । त्यागी च यजमानः । तस्माद्याजमानं तप इति ॥ १० ॥

वचनादितरेषां स्यात् ॥ ११ ॥

किमेष एवोत्सर्गः, सर्वं तपो याजमानमिति । वचनादितरेषाम् । यत्र वचनं, तत्र ऋत्विजाम् । यथा, सर्वे ऋत्विज उपवसन्तीति॥११॥

[४] गुणत्वाच्च वेदेन न व्यवस्था स्यात् ॥ १२ ॥ सि०

अथ यदुक्तं, समाख्यानादार्त्विजं तप इति । गुणत्वान्न समा-ख्यया गृह्यते । यत्र पुरुषस्य गुणभावस्तत्र समाख्या नियामिका । एवं वा । श्येने श्रूयते—लोहितोष्णीषा लोहितवसना ऋत्विजः प्रचर-न्ति, इति । तथा वाजपेये श्रूयते, हिरण्यमालिन ऋत्विजः प्रचरन्ति, इति । तत्र संदेहः । किं श्येने, उद्गातृभिर्लोहितोष्णीषता कर्तव्या, वाजपेये चाध्वर्युभिर्हिरण्यमालित्वमुतोभयमपि सर्वर्त्विजामिति । किं

महते दुःखान्तराय प्रवृत्तः सन्नधर्मो विनाश्यत इति वचनाद्गम्यते तथैवात्र द्रष्टव्यम् । यानि त्वकर्मोङ्गभूतान्येव तपांसि श्रूयन्ते फलसंबद्धानि वा तेषां फलसाधनस्यापरस्या-भावात्प्रतिबन्धनिराकरणापेक्षा नास्तीति स्वर्गाद्येव कल्प्यते । यानि तु प्रायश्चित्तत-पांसि तेषा दोषापहारमात्रमेव फलमिति न सर्वत्रैकरूपत्वमध्यवसातव्यम् ॥ ९ ॥

मेधार्हत्ववाक्यशेषश्चामुमेवार्थं द्योतयति ॥ १० ॥

वरदानवदेतद्द्रष्टव्यम् ' ऋत्विज उपवसन्ति ' इति ॥ ११ ॥

(इति—तपसो याजमानत्वाधिकरणम् ॥ ३ ॥)

' गुणत्वे तस्य निर्देशः ' इत्यनेन गतार्थमित्यन्यथा व्याचष्टे, ये संस्काराः सन्तो वचनादृत्विजां जातास्ते किं समाख्यया नियम्यन्ते नेति । लोहितोष्णीषादयो ह्यौद्गात्रा-

---

१ वरदानवदिति—' य एतामिष्टकामुपदध्यात्स त्रीन्वरान्दद्यात् ' इति वचनाद्यथा वरदान-माध्वर्यवं तथा प्रकृतेऽपीत्यर्थः । २ (अ० ३ पा० ८ अ० २ सू० ६) ।

तावत्प्राप्तम् । समाख्यानात्, श्येने, उद्गातृभिर्वाजपेयेऽध्वर्युभिरिति । एवं प्राप्ते ब्रूमः । गुणत्वाच्च वेदेन न व्यवस्था स्यात् । गुणो लोहितोष्णीषता हिरण्यमालित्वं च । पुरुषः प्रधानम् । अतो लोहितमुष्णीषं हिरण्यमाला च पुरुषविशेषणत्वेन श्रूयते, न कर्तव्यतया । तस्मात्पुरुषप्राधान्यम् । किमतो यद्येवं, पुरुषाणां प्रधानभावे समाख्या न नियामिकेत्येतदुक्तम् । अपि च, गुणत्वश्रवणात्सर्वपुरुषाणामेतद्विधानमिति गम्यते । प्रधानसंनिधौ हि गुणः श्रिष्यमाणः प्रतिप्रधानमुपदिष्टो भवति । तत्र वचनेन प्राप्तं कथं समाख्यया विद्यमानयाऽपि नियन्तुं शक्येत । तस्मादुभयत्र सर्वैर्त्विग्भिरेवंजातीयको धर्मः क्रियेतेति ॥ १२ ॥

[५] तथा कामोऽर्थसंयोगात् ॥ १३ ॥ सि०

ज्योतिष्टोमे समामनन्ति, यदि कामयेत वर्षेत्पर्जन्य इति, नीचैः सदो मिनुयात् , इति । तत्र संदेहः । किमार्त्विजः कामोऽथ याजमान इति । किमेवं, यदि कामयेताध्वर्युरिति, उत यजमान इत्येवं संशयः । किं प्राप्तम् । आर्त्विजः कामः । समाख्यानात् । अर्थी प्रकृतोऽध्वर्युः ।

दिषु पठ्यमानाः सत्यपि संस्कारत्वे वचनात्[1] ऋत्विजां क्रियमाणाः समाख्याविषयतां प्रतिपद्यन्त इति प्राप्ते ब्रूमः ।

> संस्कारत्वादतिक्रान्ते समाख्यागोचरे सति ।
> वचनेनर्त्विजां येन तेनैवान्येष्वपि स्थिताः ॥

ऋत्विगुद्देशेन ह्येते विधीयमानाः प्रतिप्रधानावृत्तिन्यायात्सर्वेषां भवन्तो न शक्याः समाख्यया बाधितुम् । तस्मादिह न व्यवस्था स्यादिति ॥ १२ ॥

(इति—ऋत्विक्संस्काराणां सर्वर्त्विग्धर्मताधिकरणम् ॥ ४ ॥).

प्रधानकामस्य[2] यजेतेत्यात्मनेपदात्सामानाधिकरण्यादाधानगताच्चाऽऽत्मनेपदात्प्रधानकर्तृविषयत्वेऽन्यतः[3] सिद्धे ये गुणकामाः सदोमानविशेषादिषु श्रुतास्तेषु मिनुयादित्यनेन

---

१ वचनादिति—अनेन च प्रकृतोदाहरणस्य वपनाधिकरणन्यायाविषयतया विचारविषयत्वं युक्तमिति सूचितम् । २ सौत्रस्य कामशब्देन प्रकृताधिकरणविषयं विवेचयति—प्रधानकामस्येत्यादिना । ३ अन्यतः सिद्ध इति—'शास्त्रफलं प्रयोक्तरि' (अ० ३ पा० ७ अ० ८ सू० १८) इत्यधिकरणन्यायेनेत्यर्थः ।

स वाक्येन संबध्यते, मिनुयादिति । तस्मादार्त्विजः काम इति । एवं प्राप्ते ब्रूमः । तथा कामः स्यात् । यथा तपः । याजमानः काम इत्यर्थः । कुतः । अर्थसंयोगात् । अर्थेन यागस्य साङ्गस्य, यजमानः फलेन संबध्यत इति गम्यते, उपग्रहविशेषात्, ज्योतिष्टोमेन स्वर्गकामो यजेत, इति । उपग्रहविशेषाच्च मिनुयादित्यध्वर्युः परार्थमिति गम्यते । अथ यदुक्तं, प्रकृतेनार्थिना सहैकवाक्यत्वादिति । उच्यते । एवमपि प्रकृतेनार्थिना सहैकवाक्यता । यजमाने कामयमाने मिनुयादिति ॥ १३ ॥

व्यपदेशादितरेषां स्यात् ॥ १४ ॥

यत्र भवति व्यपदेशस्तत्राऽऽर्त्विजः कामो भवति । यथा, उद्गाताऽऽत्मने वा यजमानाय वा यं कामं कामयते, तमागायति, इति । यद्यात्मन इति यजमानायेति परिकल्प्येत, यजमानग्रहणं वाशब्दश्च न समर्थितौ स्याताम् । तस्माद्यजमानव्यपदेशादात्मानमेवोद्गाता प्रतिनिर्दिशतीति गम्यते ॥ १४ ॥

[६] मन्त्राश्चाकर्मकरणास्तद्वत् ॥ १५ ॥ सि०

इहैवंजातीयका मन्त्रा उदाहरणम्- आयुर्दा अग्नेऽस्यायुर्मे देहीति,

---

समानकर्तृकत्वादविरुद्धया समाख्ययाऽध्वर्युविषयत्वे प्राप्ते, प्रधानगतेनाऽऽत्मनेपदेन समस्तप्रयोगविषयः फलसंबन्धो यजमानविषयोऽवगम्यत इति यदि कामयेत यजमान इति प्रकरणादवधार्य तद्भागित्वं गम्यते । तथा चाध्वर्युव्यापारे परस्मैपदमुपपत्स्यते । अन्यथा 'डुमिञ् प्रक्षेपणे' इत्यस्य कर्त्रभिप्रायक्रियाफलविवक्षायां ञित्वादात्मनेपदं स्यात् । अनया च श्रुत्या सामानाधिकरण्यं वाक्यगम्यं बाधितमित्यदोषः । तदुद्देशेन वा यजमानप्रार्थनानुसारो योऽध्वर्योः काम एष मे यजमानो वृष्टिं प्राप्नुयादिति तदपेक्षया सामानाधिकरण्यमविरुद्धम् । तथाशब्देन च पूर्वाधिकरणादेतावदतिदिश्यते समाख्यया न नियम्यत इति ॥ १३ ॥

अन्यत्र वचनादितरेषां स्यादिह तादृशस्य वचनस्याभावाद्व्यपदेशादित्युच्यते । वाशब्दोपादानाद्यजमानव्यतिरेकेण चाऽऽत्मग्रहणाच्चतुर्थ्या च विस्पष्टतादर्थ्यप्रतीतेः 'आत्मने वा यजमानाय वा' इति कर्तृद्वयस्य फलसंबन्ध इति शक्यं विज्ञातुम् ॥१४॥

(इति—गुणजन्यकामानां याजमानत्वाधिकरणम् ॥ ९ ॥)

---

१ वाक्येनेति पा० । २ परस्मैपदश्रुत्येत्यर्थः ।

वर्चोदा अग्नेऽसि वर्चो मे देहि, इति । एषु संदेहः । किमार्त्विजा उत याजमाना इति । समाख्यानादार्त्विजा इति प्राप्तम् । एवं प्राप्ते ब्रूमः । मन्त्राश्चैते तद्रूपवेयुर्यथा कामः । एवमात्माभिधायिपदं युक्तं भवति, आयुर्मे, वर्चो मे, इति । आयुर्वर्च इत्येवमादिभिः कर्मफलमभिधीयते । अग्ने त्वं कर्मफलं मे साधयेति । तदिह कर्मफलमुत्साहार्थं संकीर्त्यते । यजमानश्च तेनोत्सहते, नान्यः । यदृत्विजः कर्मफलं, न तदर्थोऽग्निः । सिद्धं हि तत् । यद्यजमानस्य, तदर्थोऽग्निः । तच्चासिद्धं सदाशासितव्यं, यदुत्साहं जनयत्यवैगुण्याय । ऋत्विगपि सिद्धे यदुत्सहते, तद्यजमानस्यैव कर्मफलायोत्सहते । तत्राऽऽत्माभिधायिपदं नावकल्पते । यजमाने चाऽऽत्माभिधायिपदं कल्प्यमानमगौणं भवति तस्माद्याजमानाः ॥ १५ ॥

विप्रयोगे च दर्शनात् ॥ १६ ॥

विप्रयोगे चाग्नीनां प्रवासे, उपस्थानमस्ति । इह एव सन् तत्र सन्तं त्वाग्ने, इति । न च प्रोषितोऽग्निभ्य ऋत्विग्भवति । कर्म कुर्वत एष वाचकः शब्दः । भवति तु यजमानोऽग्निभ्यः प्रोषितोऽपि । यजमानः संविधाय सोऽग्निहोत्राय प्रवसति । शक्यते च विदेशस्थेनापि त्यागः कर्तुम् । स एव प्रोषितस्योपस्थानविशेषं ब्रुवन्यजमानस्योपस्थानं दर्शयति । तेनैवंजातीका यजमानस्य भवेयुरिति ॥ १६ ॥

अकर्मसंयुक्ता आशीर्मन्त्राः समाख्यया नियम्यन्ते । न हि तेभ्यः फलनिष्पत्तिः । मन्त्राणामविधायकत्वादन्यस्य च फलकल्पनाहेतोरसंभवात् । यत्त्वाशासनं तद्यजमानवदध्वर्योरप्युत्साहकरत्वेनाविशिष्टमिति प्राप्ते याजमाना इत्युच्यते । ते हि फलान्तराभावात्प्रधानफलप्राप्तिमाशासते । यजमानेन च तदाशासनीयं नर्त्विजा । तदीयस्य दक्षिणालाभस्यान्यथाऽपि सिद्धत्वाद्यजमानाच्च लभ्यमानत्वेनाग्नेरप्रार्थनीयत्वात् । अथ यजमानार्थमेवासौ प्रार्थयेत तत्र 'आयुर्मे देहि' इत्यात्मविषयं सद्धिरुध्येत । तस्माद्यजमानेनैव प्रधानफलप्राप्तिरूपेणाऽऽत्मोत्साहनार्थं प्रयोक्तव्या इति ॥ १५ ॥

आशीर्मन्त्रं च प्रवसद्यजमानाग्निहोत्रेष्वग्न्युपस्थानार्थं प्रोषितस्य दर्शयति । न चर्त्विजः प्रोषितस्य ऋत्विक्त्वं संभवति कर्मसंयोगाभावात् । यजमानस्य तु द्रव्यत्यागेनोपपद्यते । तस्मात्तत्सामान्यादितरेषु तथात्वम् ॥ १६ ॥

(इति—प्रोत्साहनमन्त्राणां याजमानत्वाधिकरणम् ॥ ६ ॥)

[७] द्व्याम्नातेषूभौ द्व्याम्नानस्यार्थवत्त्वात् १७ ॥ सि०

स्तो दर्शपूर्णमासौ, तत्र द्व्याम्नाता मन्त्रा आध्वर्यवे काण्डे याजमाने च। आज्यं गृह्णाते, पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि, इत्येवमादयः। तथा स्रुग्व्यूहनमन्त्राः। स्रुचौ व्यूहति, वाजस्य मा प्रसवेन, इति। तत्र संदेहः। किं तु, उभाभ्यामपि कर्तव्या उताध्वर्युणैवेति। किं प्राप्तम्। समाख्यानादाध्वर्यवा इति प्राप्ते, उच्यते। उभावपि तान् प्रयुञ्जीयातामिति। कुतः। द्व्याम्नानस्यार्थवत्त्वात्। द्वाभ्यां समाख्यानाद्द्वावपि कर्तारौ गम्येते। तस्माद्द्वौ ब्रूयाताम्। अध्वर्युः—एतेन प्रकाशितमनुष्ठास्यामीति। यजमानो—न प्रमदिष्यामीति ॥१७॥

आज्यग्रहणादिमन्त्रेषु सामान्येनाऽऽध्वर्यवे पुनर्विशेषेण याजमाने काण्डे पठ्यमानेषु किमुभौ प्रयोक्तारौ विकल्पेन समुच्चयेन वाऽथान्यतर इति। तत्राऽऽध्वर्यवत्वे विकल्पे वा प्राप्ते द्वावित्याह। ननु च विशेषसमाख्यानात्केवलयाजमानत्वमेव स्यात्। तत्र वयं विशेषसमाख्यां बलीयसीमिच्छामो यत्र सकृदाम्नानम्। ये तु सामान्ये विशेषे च भेदेनाऽऽम्नायन्ते तेषु यदि विशेषसमाख्याऽङ्गी क्रियते ततः सामान्यपाठस्याऽऽनर्थक्यमेव स्यात्। एकविषयत्वे च सामान्यं विशेषो बाधते। सत्यपि त्वत्र मन्त्राभेदे पाठभेदाद्विषयान्यत्वम्। पाठस्य हि भेदेन प्रयोजनं कल्पयितव्यम्। न च तदुभयप्रयोज्यत्वादन्यत्संभवति। तस्मादुभावपीति। ननु द्वयोः पाठयोरेकः स्वरूपप्रज्ञापनार्थ इतरो विनियोगार्थः स्यात्। तत्रापि मन्त्राणां कर्मप्रकाशनार्थत्वादङ्गप्रधानानां च समानकर्तृकत्वाद्यत्रैवाऽऽज्यग्रहणादि कार्यमाम्नातं तत्रैव समाख्यातेनैव कर्त्रा विनियोगो युक्तः। तत्रैव च मन्त्रस्य प्रयोज्यत्वेनावगतस्य कर्तृविशेषाकाङ्क्षा भवति नेतरत्र। रूपमात्रप्रज्ञापनस्यान्तरेणापि कर्मकालप्रयोगमध्ययनमात्रेणैव सिद्धत्वात्। आज्यग्रहणादि चासंदिग्धमाध्वर्यवम्। तस्मान्न यजमानेन प्रयोक्तव्या इति। उच्यते। याजमानेऽपि रूपमात्रादेवान्तरेणापि कार्यं प्रयोज्यत्वेनावधारणादस्त्येव कर्त्रपेक्षेति यजमानकर्तृत्वसिद्धिः। किं पुनस्तेषां प्रयुज्यमानानां प्रयोजनम्। उच्यते। यथैवाध्वर्युणा पदार्थाः कर्तव्यास्तथैव यजमानेनाप्रमादार्थं प्रत्यवेक्षितव्याः। तद्यत्र मन्त्रा नाऽऽम्नायन्ते तत्रोपायान्तरेण प्रत्यवेक्ष्यते, इह तु मन्त्रैरित्यर्थवत्ता ॥ १७ ॥

(इति—द्व्याम्नातानामुभयप्रयोज्यत्वाधिकरणम् ॥ ७ ॥)

[८] ज्ञाते च वाचनं न ह्यविद्वान्विहितोऽस्ति ॥ १८ ॥ सि०

वाजपेये श्रूयते—क्लृप्तीर्यजमानं वाचयति, उज्जितीर्यजमानं वाचयति, इति । अत्र संदेहः । किं ज्ञश्चाज्ञश्च सर्वो वाचयितव्य उत ज्ञ एवेति । किं प्राप्तम् । अविशेषाज्ज्ञश्चाज्ञश्चेति प्राप्ते, ब्रूमः । ज्ञ एवेति । कुतः । न ह्यविद्वान्विहितोऽस्ति । यो ह्यविद्वान्नासावधिकृतः । सामर्थ्याभावात् । ननु प्रयोगकाले शिक्षित्वा प्रयोक्ष्यते, सामर्थ्यादधिक्रियेतेति । नेति ब्रूमः । वेदाध्ययनादुत्तरकाले प्रयोगः श्रूयते । न प्रयोगश्रुतिगृहीतं वेदाध्ययनम् । कुतः । अनारभ्य कर्माणि वेदाध्ययनं श्रूयते, तस्मात्स्वाध्यायोऽध्येतव्य इति । सत्येतस्मिन्वचने, अग्निहोत्रं जुहुयात्, इत्येवमादिभिर्वेदोऽध्येतव्य इत्येतदुक्तं भवतीति न शक्यते कल्पयितुम् । तत्र होममात्रे चोदिते वेदाध्यायी शक्त इत्यधिक्रियते, नाविद्वान् । कियता पुनर्विदितेन विद्वानधिक्रियत इति । यावता विदितेन शक्तो भवति यथोक्तं क्रतुमभिनिर्वर्तयितुं तावद्यो वेद स तेन क्रतुनाऽधिक्रियते । ननु वेदमधीयीतेति वचनात्कृत्स्नो वेदोऽध्येतव्य इति भवति, न वेदावयवेनाधिक्रियत इति । उच्यते । क्रतूनां ज्ञानार्थं वेदाध्ययनं

यत्र 'यजमानं वाचयति' इति श्रूयते तत्राविद्वानपि खण्डशः शक्यो वाचयितुमित्यनियमः । अथवा विद्वान्स्वयमेव ब्रूयात् । तत्र प्रयोजकव्यापारवैयर्थ्यं भवेत् । तस्मादविद्वानेव वाचयितव्य इति प्राप्तेऽभिधीयते । न ह्यविद्वान्विहितोऽस्तीति । यदि कामश्रुतिपरिगृहीतं वेदाध्ययनं भवेत्ततः प्रयोगकालेऽप्यध्याप्येत । तत्त्वाधानवदनारभ्य विधीयते 'तस्मात्स्वाध्यायोऽध्येतव्यः' इति । तथा सति चार्थापत्त्यभावात्सिद्धमेवेदं सर्वकर्माण्यग्निवद्दृह्णन्ति न शिक्षणं प्रयुञ्जते । न च शिक्षितो वेदो भवति । तस्मात्सा-कर्मणो ये मन्त्राः पठितास्तेऽङ्गत्वं प्रतिपद्यन्त इति नाविदुषोऽधिकारोऽत्र । शङ्क्यते च तत्रापि प्रैषवत्प्रयोजकव्यापारस्यार्थवत्ता सत्यामपि शक्तावप्रयुक्तो न ब्रूयादिति । तच्च प्रयोजकत्वं द्वेधा भवति, यदि वा खण्डशः समर्प्यतेऽथवा ब्रूहीत्यभिधीयत इति यथेष्टं कर्म । कियता पुनर्विदितेनेति—वैशेषिकादयः स्वशास्त्रेणाप्यनधिगतेनानाविकारं वदन्तीति स्पष्टनिरूपणार्थं पृच्छति । तत्र विद्वत्तायाः शक्त्युत्पादनद्वारेण प्रत्यक्षेणैवोपकारित्वाद्यावता विदितेनेत्याह । यद्यपि स्वाध्यायग्रहणेन सकलो वेदः परिगृहीतस्तथाऽपि दर्शपूर्णमासौ कुर्वाणस्य ज्योतिष्टोमिकमन्त्रब्राह्मणं न क्वचिदुपयुज्यत इति, असदपि नाधिकारं व्यावर्तयति, इष्टिवेदनैव योग्यतायाः सिद्धत्वात् । तेन तथा-

कार्यम् । तत्रान्यस्मिन्क्रतौ कर्तव्येऽन्यक्रतुज्ञानं न दृष्टाय भवति । तस्मात्क्रत्वन्तरज्ञानमधिकारे नाऽऽदर्तव्यम् । क्रत्वन्तरज्ञानाय क्रत्वन्तरग्रन्थः । सर्वे क्रतवः कथं ज्ञायेरन्पृथक् पृथगिति कृत्स्नस्य वेदस्याध्ययनं श्रूयते । तस्मात्स्वपदार्थज्ञोऽधिक्रियेतेति । तेनास्वपदार्थज्ञस्य कर्मैव नास्ति । कथमसौ वाच्येत । तस्मात्साध्वभिधीयते ज्ञ एव वाचयितव्य इति ॥ १८ ॥

[९] याजमाने समाख्यानात्कर्माणि याजमानं स्युः ॥१९॥पू०

स्तो दर्शपूर्णमासौ । तत्र यजमानकाण्डे कर्माण्याम्नातानि द्वादश, वत्सं चोपावसृजति, उखां चाधिश्रयति, अव च हन्ति, दृषदुपले च समाहन्ति, अधि च वपते, कपालानि चोपदधाति, पुरोडाशं चाधिश्रयति, आज्यं च, स्तम्बयजुश्च हरति, अभि च गृह्णाति, वेदिं च परिगृह्णाति, पत्नीं संनह्यति, प्रोक्षणीश्चाऽऽसादयति, आज्यं च । एतानि वै द्वादश द्वंद्वानि दर्शपूर्णमासयोः, इति । अत्र संदेहः । किमेतान्यध्वर्योः कर्माणि, उत यजमानस्येति, किं प्राप्तम् । यजमाने समाख्यानात्कर्माणि याजमानं स्युः । विशेषसमाख्यानाद्याजमानानीति गम्यते । यथा पोत्रीयं नेष्ट्रीयमिति ॥ १९ ॥

जिनस्तावानेव स्वाध्यायः । यत्त्वसौ सकलः पठ्यते तन्नित्यकाम्यनैमित्तिकानां कर्मणां यथोपपन्नकालत्वान्न ज्ञायते कतरत्कदा करिष्यत इति । तत्र कदाचिद्यन्न पठितं तत्फलमार्थनानिमित्तं वाऽस्योपजायते तत्र तदविद्वत्त्वादशक्नुवन्विहन्यते, तदानीं वाऽधीयानस्य व्रत[2]नियमवदध्ययनासंभवात्कर्मभिश्च विशिष्टक्रियोपात्तवेदनिराकाङ्क्षैस्तादृशस्याग्रहणाद्वैगुण्यप्रसङ्गः । कामश्रुत्यपरिग्रहाच्च सर्वैरनारम्यवादविध्यधीतो वेदोऽपेक्षित इत्यवश्यं ब्रह्मचर्यकाल एव समस्तो वेदोऽध्येतव्यः । यदि तु कश्चिदशक्तो नाधीते सकलम्, अग्निहोत्रदर्शपूर्णमासमात्रं कथंचिदधिगच्छति न तस्य तत्रानाधिकारः । एवं च सति बाह्यज्ञानं दूरविप्रकृष्टमेव । यत्त्वात्मज्ञानं, तेन विना प्रवृत्तिरेव नास्त्यतः सर्वकर्मार्थमङ्गीकर्तव्यम् ॥ १८ ॥

(इति—वाजपेयादावभिज्ञस्यैव वाचनाधिकरणम् ॥ ८ ॥)

उखाधिश्रयणावहनन्स्यादीनां द्वादशानां कर्मद्वंद्वानां याजमान आध्वर्यवे च पठितानामाम्नातमन्त्रवदुभाभ्यां प्रयोक्तुमशक्यत्वाद्याजमानसमाख्यानाद्यजमानकर्तृकत्वमिति ॥१९॥

---

१ द्वादशद्वन्द्वानि, इति पा० । २ व्रतनियमेति—अध्यायानध्यायते, शिष्योपाध्यायते, इत्यादयोऽध्ययनाङ्गभूता नियमा इत्यर्थः ।

अध्वर्युर्वा तदर्थो हि न्यायपूर्वं समाख्यानम् ॥ २० ॥ सि०

अध्वर्युर्वा कुर्यादेतानि। तदर्थो ह्यध्वर्युः परिक्रीत इति समाख्याना-दवगम्यते । आध्वर्यवा एव सर्वे इमे पदार्थाः समाम्नाताः । याजमाने, एषां द्वंद्वतोच्यते । द्वंद्वता च समभ्यासक्रिया । तत्राध्वर्युः पदार्थान्क-रिष्यति, यजमानेनापि समभ्यासीकरणमित्येतदशक्यम् । तत्र, अङ्गगुणविरोधे च तादर्थ्यादिति द्वंद्वतागुणो बाधितव्यः । तस्मादा-ध्वर्यवा एते पदार्था इति । यदुक्तं समाख्यानादिति तत्परिहर्तव्यम् । उच्यते । न्यायपूर्वं समाख्यानं, समाख्यानाद्यजमानेन द्वंद्वता संपाद-यितव्या । इदं चेदं च संपादयेति यजमानो ब्रूयात् । केषुचिच्चात्र पदार्थेषु यजमानस्यानुमन्त्रणम् । तन्निमित्ता समाख्या भविष्यति । अपूर्वं स्वपक्ष्येत । यदुक्तं, यथा पोत्रीयं, नेष्ट्रीयमिति, एवमत्रापीति । तदुच्यते । युक्तं तत्र, विशेषसमाख्यानात् । इह तु द्वंद्वता याजमानी-या, पदार्थास्त्वाध्वर्यवा एव । तस्माददोषः ॥ २० ॥

[१०] विप्रतिषेधे करणः समवायविशेषादितरमन्य-स्तेषां यतो विशेषः स्यात् ॥ २१ ॥ सि०

अनुत्पन्नानां द्वंद्वत्वापादनाशक्तेर्विधायकशब्दाभावाच्च नैषां याजमान एवोत्पत्तिः । किं तर्हि । आध्वर्यवे । तत्र च कर्त्राकाङ्क्षा तदर्थश्च परिक्रय इत्यवगते कर्तरि न द्वंद्वाम्नानवेलायामपेक्षाऽस्तीति यजमानकर्तृत्वानुपपत्तिः । तत्र स्वरूपस्यासति यजमा-नसंबन्धे द्वंद्वता कथं याजमानी क्रियेत । न च सा कर्त्रन्तरेण क्रियमाणानां संभवति। समासन्नकरणं हि द्वंद्वता । न चान्यकर्तृकां क्रियामन्यः समासन्नां कर्तुं समर्थः । न च समासन्नकरणानुरोधेन क्रियास्वरूपमपि याजमानं संभवति । अतोऽङ्गगुणविरोधन्या-यात्तदप्याध्वर्यवमेव । यजमानस्तु स्मारयिष्यति द्वंद्वतामिति समाख्यार्थवत्ता ॥२०॥

(इति—द्वादशद्वंद्वानामाध्वर्यवत्वाधिकरणम् ॥ ९ ॥)

---

१ (अ० १२ पा० २ अ० ९ सू० २७) । २ कथमिति पाठस्तु क्वचिदपि नोपलभ्यते । परं तु ' तत्र स्वरूपस्यासति ' इत्यादिवार्तिकस्य ' तत्राध्वर्युः पदार्थान् ' इत्यादि भाष्यग्रन्थव्याख्याना-र्थत्व यथाश्रुते विवक्षितार्थालाभेन कथमित्यादिरावश्यकमिति भाति । ३ (अ० १२ पा० २ अ० ९ सू० २७) अग्रस्यादिति शेषः ।

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । तस्य यूपस्य परिव्याणे मन्त्रौ । एक अध्वर्योः, परिवीरसि, इति करणः । अपरो होतुः, युवा सुवासाः, इति क्रियमाणानुवादी । तयोश्चोदकपरम्परया कुण्डपायिनामयनं प्राप्तयोर्भवति संदेहः । कः पुनरसौ । तत्र ऋत्विक्समास आम्नातः, यो होता सोऽध्वर्युरिति । किं करणमाध्वर्यवं होता कुर्यात्, किं हौत्रं क्रियमाणानुवादिनमिति । किं प्राप्तम् । अनियम इति । इति प्राप्ते । उच्यते । विप्रतिषेधे करणः स्यादाध्वर्यवः परिवीरसि, इति । न क्रियमाणानुवादी, होतुर्युवा सुवासा इति । कुतः । समवायविशेषात् । द्वौ तत्र समवायौ, होतुश्चोदकेन हौत्रेषु, प्रत्यक्षश्रव-

---

'परिवीरसि' 'युवा सुवासाः' इत्येतयोः करणक्रियमाणानुवादिनोरध्वर्युणा होत्रा च युगपत्प्रकृतौ प्रयुक्तयोः कुण्डपायिनामयने हौत्राध्वर्यवयोरेककर्तृकत्वादशक्तेरवश्यावहेयेऽन्यतरस्मिन्कतरः प्रतिगृह्यतामिति संदेहः । तत्रानियमः प्राप्नोति । यद्वा होतुः सिद्धस्वरूपस्याऽऽध्वर्यवविधानादजहत्स्वधर्मतया हौत्र एव युक्त इति प्राप्तेऽभिधीयते । एतस्मिन्विप्रतिषेधे करणः प्रयोक्तव्यः । कुतः । समवायविशेषात् । केचिदाहुः । प्रधानप्रत्यासत्तिः समवायविशेष इति । बहिरङ्गो ह्यारादुपकारकरूपत्वात्क्रियमाणानुवादी, करणस्त्वन्तरङ्ग इति । तदकारणं, यदि हि प्रधानद्वारेणाङ्गेषु कर्ताऽवतरेत्ततः संनिकर्षविप्रकर्षावुपयुज्येयाताम् । स तु समाख्यया चोदकेन च प्रधानेष्वङ्गेषु चाविशेषेण लक्ष्यते । न च कश्चिदङ्गगुणविरोधन्यायः । उभयोरङ्गत्वाविशेषात् । न च संनिपातित्वेन क्रियान्तरगतमारादुपकारित्वं दुर्बली क्रियते । न चायमतीवाऽऽरादुपकारकः । क्रियमाणपरिव्याणस्मृत्यविच्छेदेन दृष्टसंस्कारजननात् । तस्मादानुमानिकाद्धौत्रसंबन्धात्प्रत्यक्षत्वेनैवाऽऽध्वर्यवस्य समवायस्य विशेषो भवति । कथम् । एषा ह्यत्र वचनव्यक्तिः । यदुत होत्रादयः श्रुतिवृत्ता अध्वर्य्वादिशब्दलक्षितेषु कर्मसु विधीयन्ते । तत्र हौत्रसंबन्धो होतुरानुमानिक आध्वर्यवसंबन्धस्तु प्रत्यक्षः । यस्त्वजहत्स्वधर्म एव होताऽऽध्वर्यवेण संबध्यत इति । संबध्येत, यदि तत्प्रयोगमात्रकृतमेवास्य होतृत्वं भवेत्, यदि वा हौत्रं प्रत्यध्वर्युर्विधीयेत, होतारं वोद्दिश्याध्वर्युकर्मविधिर्भवेत्, न तु तत्सर्वमस्ति । होता तावद्योग्यतामात्रेणावधारितः सत्यपि च कर्मनिमित्तत्वेऽन्यानि सहस्राणि तदुपलक्षणं करिष्यन्ति । न च हौत्रं प्रत्यध्वर्युविधिरिह, होत्रध्वर्युशब्दयोरत्यन्तविभिन्नपुरुषवचनयोर्मुख्यसामानाधिकरण्याभावादन्यतरस्यावश्यकल्पनीये लक्षणा-

---

१ (अ० १२ पा० २ अ० ९) अत्रत्य इति शेषः ।

वृत्तत्वे विरोधनिमित्तत्वाल्लक्षणाकल्पनायाः प्रथमोच्चारिते होतृशब्दे किंचिदपि कल्पनाबीजं न पश्यामः । तेन 'मुख्यं वा पूर्वचोदनात्' इति तं स्वार्थवृत्तमेव गृहीत्वाऽध्वर्युशब्दः कर्मलक्षणार्थोऽध्यवसीयते । तत्रापि तदुद्दिश्य होता विधीयते, तद्धि कत्वर्थेन प्रयोजनवत्त्व तथा कर्ता । प्रधानं चैवंजातीयकेषूद्दिश्यते । ततश्च गुणभूतो होतोपादीयमानो यः प्रधानाविरोधी धर्मस्तन्मात्रयुक्त एव संबध्यते । यदि तु होतुराध्वर्यवं विधीयेत ततस्तस्य कर्माविरुद्धं तत्प्रवर्तेत इति न किंचिदपि हौत्रं हापयेत् । अप्राकृतकर्तृसंस्कारत्वप्रसङ्गाच्चाऽऽध्वर्यवस्य नैवं संबन्ध इति पक्षान्तरमवलम्बितम् । तस्मादाध्वर्यवसंबन्ध एव गुणभूतः प्रधानं चेति सिद्धम् । अत्र चोदयन्ति । नैवात्रान्यतरस्यापि मन्त्रस्य होतृसंबन्धो बाधितव्यः । कुतः ।

एककालप्रयोगे हि विरोधो मन्त्रयोर्भवेत् ।
करणः प्राक् क्रियातस्तु परतश्चेतरः स्थितः ॥

करणस्य हि 'मन्त्रान्तेन कर्मादिसंनिपातः' इत्यनेन न्यायेन प्राक्परिव्याणात्प्रयोगः । क्रियमाणानुवादिनस्तु तस्मिन्क्रियमाणे । तेन द्वावपि प्रयोक्तुं समर्थो होतेति । नैतदस्ति । क्रियमाणता नाम संकल्पादेः कारकप्रचलनात्प्रभृत्यासमाप्तेः । अतश्च पूर्वपदार्थसमाप्त्यैव पर्युपस्थापितं चेत्परिव्याणं वर्तते स एव दीर्घः समस्तः क्रियमाणानुवादिनः कालः । एवमपि कारणस्य तादृशादेव प्राक्प्रयोगादविरोध इति यदुच्येत । तन्न । न हि 'परिवीरसि' इत्ययं संकल्पं रशनादानं संनिहितं वा यूपमवयवक्रियामात्रप्रवृत्तं वा परिव्याणं शक्नोति प्रकाशयितुम् । तस्मात्प्रधानक्रियारम्भ एव यूपसमीपस्थेन प्रयोक्तव्यः । नन्वेवमपि दीर्घकाले कर्मण्येकदेशे करणमेकदेशे च क्रियमाणानुवादिनं प्रयुञ्जानो न विरोत्स्यते । कथं न विरुध्यते । यदा 'यूपाय परिवीयमाणायानुब्रूहि' इत्यनेन पाठक्रमात्करणः प्रैषसामर्थ्याच्चेतरो युगपदेव प्राप्यते, न च क्रियैकदेशे क्रियमाणानुवादिनः प्रयोग इत्यस्ति प्रमाणम् । स हि रशनादानानन्तरं प्रयुक्तेव प्रैषेण प्रयोजितः दीर्घत्वादापरिव्याणसमाप्तेः कालमवरुणद्धि । तदन्तराले चाऽऽध्वर्यवे आपन्नो न कथंचिदविरोधेनावतिष्ठते । ननु च युगपत्कालता बाध्यतामेककर्तृत्वं वेति वरं पदार्थप्राप्तेर्जघन्यत्वात्काल एव बाधितुं नान्तरङ्गः कर्तृसंबन्ध इति । भवेदेतदेवं, यदि

१ (अ० १२ पा० २ अ० ८ सू० २५)। २ तं—होतृशब्दमित्यर्थः । ३ तदुद्दिश्य—अध्वर्युपदलक्षिताध्वर्युकार्यमुद्दिश्येत्यर्थः। ४ (अ० १२ पा० २ अ० १० सू० २०) एतत्सूत्रस्य मध्यमावयवः ।

णेनाऽऽध्वर्यवेषु, यो होता सोऽध्वर्युरिति । एवं प्रत्यक्षमध्वर्योः कार्यं चोद्यते । प्रत्यक्षं चानुमानाद्बलीयः । तस्मादाध्वर्यवं करणं परिवीरसीति होता कुर्यात् । अथ हौत्रं विरुद्धं कः कुर्यात् । इतरमन्यस्तेषां यतो विशेषः स्यात् । अन्यो होतृपुरुष एव स्यात् । यस्यान्यापृतता, प्राधान्यविशेषो वा ॥ २१ ॥

प्राकृतकाल बाधमानौ मन्त्रौ स्वकार्यान्न प्रच्यवेयाताम् । तयोस्तु य एव कालान्तरे प्रयुक्तः स एव स्वसामर्थ्यप्रतिपाद्यादर्थात्प्रच्यवते । सोऽयं लिङ्गविरोध आपद्यते । ननु च 'यो होता सोऽध्वर्युः' इत्यनया श्रुत्या[1] लिङ्गं बाध्येत । बाध्येत, यदि श्रुतिः स्यात् । वाक्यं त्विदं, तदपि लक्षणया । न ह्यत्र कस्यचिच्छब्दस्य श्रवणादिदं गम्यते हौत्राध्वर्यवे समानकर्तृके इति । किं तर्हि । होत्रध्वर्युशब्दसामानाधिकरण्यात् । सर्वत्र[2] चैष संबन्धो वाक्यलक्षण इत्युक्तम् । तत्रापि चाध्वर्युशब्दस्य कर्मलक्षणार्थत्वाद्विप्रकृष्टता । ननु लिङ्गमप्येतच्चोदकापेक्षित्वाद्विप्रकृष्टतरं भवेत् । वाक्यं ह्यर्थविप्रकर्षाल्लिङ्गेन बाध्येत । स चेह विपरीतोऽर्थविप्रकर्षः । न हि चोदकेनाप्राप्तयोर्मन्त्रयोरेककालप्रयोज्यत्वं गम्यते । तस्मादेककर्तृत्वमेव बलीय इति । उच्यते । सत्यमिह चोदकाङ्गीकरणं, तत्तु मन्त्रस्वरूपे न लिङ्गे । द्वयोरपि च तदविशिष्टं, प्राप्ते तु मन्त्रद्वये लिङ्गमौपदेशिकेनाविशिष्टम् । स्यादेतदेवं यदि चोदकः प्रापयेत् । स तु प्रत्यक्षवाक्यशिष्टसमानकर्तृत्वविरोधिमन्त्रद्वयं प्रापयितुमेव न शक्ष्यति । यद्यपि हि वाक्यं लिङ्गस्य नेष्टे, चोदकस्य तु स्वरूपप्रापणे पश्चाद्भाविनमपि विरोधमालोच्य शक्तं निरोधं कर्तुम् । ततश्छिन्नमूलत्वाल्लिङ्गस्य दुर्बलतेति । उच्यते । सर्वं हि विरोधवेलायां बाध्यते । न चानवगतो विरोधो बाधकारणं भवितुमर्हति । तदिह चोदकप्राप्तिवेलायां न कश्चिदपि विरोधो लक्ष्यते । यस्तु प्राप्ते विरोधस्तत्र लिङ्गं बलवत्तरमित्युक्तमेव । यदि चात्र द्वयोरपि समानकर्तृत्वं वाक्येन विधीयेत ततोऽप्येतस्य बलीयस्त्वमुद्भाव्येत । इह त्वाध्वर्यवस्य होत्रा सह संबन्धो विधीयते । न हौत्रस्यापि । स हि चोदकेन प्राप्नोति । तेन यदि प्रत्यक्षत्वादेतस्य बाधकत्वं ततः समाख्याकृतमेव क्रियमाणानुवादिनो होतृसंबन्धबाधनम् । एवं च सति लिङ्गवाक्ययोरविरोधान्न किंचिदपि बाधिष्यते । आध्वर्यवप्रयोगश्च सेत्स्यति । यथा तु लिङ्गबलीयस्त्वमाश्रितमासीत्तथाऽन्यदेवानिष्टमापद्येत । यो ह्यस्य वाक्यस्य विषयः स बाध्येत । न चास्य होतृहौत्रसंबन्धो विषयः । कस्तर्हि । होत्राध्वर्यवसंबन्धः । ततश्च

१ श्रुत्या—सामानाधिकरण्यात्मिकया श्रुत्येत्यर्थः । २ (अ० ३ पा० १ अ० ६) इत्यत्रेति शेषः ।

[११] प्रैषेषु च पराधिकारात् ॥ २२ ॥ सि०

स्तो दर्शपूर्णमासौ। तत्र प्रैषाः समाम्नाताः। प्रोक्षणीरासादय, इध्माबर्हिरुपसादय, स्रुवं च स्रुचश्च संमृड्ढि, पत्नीं संनह्याऽऽज्येनोदेहीति। तत्र संदेहः। किं य एव प्रैषे, स एव प्रैषार्थे, उतान्यश्च प्रैषेऽन्यश्च प्रैषार्थे, इति। किं प्राप्तम्। एक एव प्रैषप्रैषार्थयोरिति। कुतः। समाख्यानात्। अन्य इति चाश्रुतत्वात्। नन्वात्मनः प्रैषो विप्रतिषिध्यते। उच्यते। न प्रैषो भविष्यति। प्राप्तकाले लोटं वक्ष्यामः। आह। प्राप्तकालेऽपि सति युष्मदादिष्वेवोपपदेषु मध्यमादयो व्यवस्थिताः। न पुरुषसंकरो भवति। उच्यते। सत्यां विवक्षायां युष्मदादिषु मध्यमादयः। यदा तव प्राप्तः काल इति विवक्ष्यते, तदा युष्मद्येव मध्यमो नास्मदि शेषे वा। यदा खलु क्रियायाः प्राप्तः काल इत्येतावद्विवक्ष्यते, न तव मम वेति, न तदा युष्मदादीनामनुरोधेन मध्यमादयो भवितुमर्हन्ति।

यथाप्रकृत्येव प्रयोगः स्यात्। तस्मात्समाख्याक्लृप्तमेवाऽऽतिदेशिकं संबन्धं बाधित्वा समवायविशेषात्करणः प्रयोक्तव्य इति सिद्धम् ॥ २१ ॥

(इति—[1]होतुः करणमन्त्रानुष्ठातृत्वाधिकरणम् ॥ १० ॥)

प्रैषस्य प्रैषार्थस्य चाऽऽध्वर्यवसमाख्यातुल्यत्वादध्वर्युप्रयोज्यत्वेऽवधारिते कथमात्मनः प्रैष इति चेदाह—नैवायं प्रैषः। किं तर्हि। प्राप्तकालतायां लोटं वक्ष्याम इति। प्रैषवादी त्वाह—प्रत्यगात्मविषया चेत्प्राप्तकालता विवक्षिता हन्तोत्तमपुरुषेण भवितव्यम्। न हि परविषययुष्मदर्थमन्तरेण मध्यमपुरुषो लभ्यते। प्रैषे तु स्वभावतः परविषयत्वात्सुलभ इति। परस्त्वाह—यदा समाख्यावगतात्समानकर्तृत्वात्प्रैषबुद्धिरपनीता तदा प्राप्तकालत्वमभिधीयमानं किं क्रियाणामभिधीयतामुत कर्तॄणामिति क्रियाणामित्येव गम्यते। ता हि चोदितत्वात्प्रयोजनवत्यः प्रथमतरं प्रतीताः। तासां चानुष्ठानार्थं प्राप्तकालत्वस्मरणं दृष्टार्थम्। कर्तृप्राप्तकालप्रकाशने तु सर्वं विपरीतम्। आख्यातेषु च प्रथमादेः पुरुषस्य कस्यचिदवश्यंभावित्वान्नान्तरीयककृत एव मध्यमपुरुषो भविष्यति। क्रियैव चोच्यते तव प्राप्तकाल इति। यदि च कर्तुः प्राप्तकालत्वमुच्येत ततः किं कर्तुमिति साकाङ्क्षमेव स्यात्, अथ प्रोक्षण्यासादनादि कर्तुमिति[2], तथा विशिष्टार्थप्रैष-

१ आध्वर्यवे करणमन्त्रे होत्रा क्रियमाणे तद्विरुद्धं क्रियमाणानुवादिनं कः प्रयुञ्जीयादिति शङ्कायां होतृपुरुषेषु य एव कश्चनान्तरङ्गोऽध्वर्यादिः, तस्य वा कार्यान्तरव्यापृतत्वे बहिरङ्गो वा तृतीयादिः प्रयुञ्जीयादित्येवं समाधानार्थस्य 'इतरमन्यस्तेषां यतो विशेषः स्यात्' इत्युत्तरसूत्रावयवस्य व्याख्यार्थं 'अथ हौत्रं विरुद्धं कः कुर्यात्' इत्यादिभाष्यं वार्तिककारैरुपेक्षितम्। तदुपेक्षानिदानं तु कुण्डपायिनामयने होतृपुरुषाणां मैत्रावरुणाच्छावाकग्रावस्तुन्नामकानां त्रयाणामपि वचनात्कार्यान्तरव्यापृतत्वेन तादृशपुरुषाभावात्प्रकृतोदाहरणानुपयोगरूपं द्रष्टव्यम्। २ इतीति—अध्याहृतम् इति शेषपूरणम्।

न चेदं युगपद्विवक्षितुं शक्यते । पदार्थस्य प्राप्तः कालः, तव चेति । भिद्येत हि तथा वाक्यम् । तेन यदि वा निर्ज्ञाते पदार्थकाले तव काल इति शक्यते वदितुं, यदि वा तवेति निर्ज्ञाते पदार्थस्य काल इति । तत्र पदार्थस्य कालो वदितव्यो न तु युष्मदर्थस्य । तेन हि स्मृतेन प्रयोजनम् । स हि कर्तव्य इत्यवगतो न तु युष्मदर्थस्तथा । तस्मात्स-माख्यानाद्ध्वर्योरेव प्रैषप्रैषार्थाविति प्राप्ते, ब्रूमः । प्रैषेष्वन्योऽन्यस्तदर्थे-ष्विति । कुतः । पराधिकारात् । परस्मिन् हि प्रैषे, उपपद्यते, नाऽऽत्म-नीति । आह । ननूक्तं प्राप्तकाले भविष्यतीति । उच्यते । न संभवति प्रैषे प्राप्तकालता न्याय्या । तस्माद्युष्मदर्थो गम्यमानो न विवक्षित इत्युच्यते, संभवति चात्र प्रैषार्थः । तस्मात्प्रैषः । प्रैषश्चेदन्यः प्रैषार्थ इति सिद्धम् ॥ २२ ॥

णाद्वाक्यभेदः[1] स्यात् । तस्मादपि क्रियायाः प्राप्तकालत्वं प्रकाश्यते । अथापि प्रैषोऽ-भ्याश्रीयते तथाऽप्यात्मानमेव कथंचिच्छरीरशरीरिणोरवस्थान्तराणां वा भेदेन प्रैषकं प्रेष्यं च व्यपदेक्ष्यतीति समानकर्तृकत्वे प्राप्ते, ब्रूमः । प्रैषेषु चेतरमन्यः कुर्यादिति संबन्धः । कुतः । स्वभावेनैव तेषां परविषयत्वात्परिक्रयवत् । यत्तु नैवायं प्रैष इति । तदयुक्तम् । मन्त्ररूपादेव प्रैषप्रत्ययोत्पत्तेः । यो हि समानकर्तृकतया तं बाधते तेन समाख्यया[2] लिङ्गं बाधितं स्यात् । न च प्राप्तकालतया लिङ्गविरोधः परिह्रियते । मध्य-मपुरुषार्थस्यासंपादनात् । न च शब्दान्तरेणानुपात्ता क्रियैवं शक्यते वक्तुं तव प्राप्तः काल इति । यद्यपि च शक्यते तथाऽपि न दृष्टः कश्चिदर्थः स्यात्, चेतनविषयत्वादी-दृशस्य प्रयोगस्य । तथाऽऽत्मभेदपरिकल्पनायामपि नैवं दृष्टं प्रयोजनं, गौणताऽत्र स्थितैव । मुख्यं च कार्यं मन्त्राणामित्यवधारितम् । ततश्च यद्यपि प्राप्तकालतायामेव लोट्, तथाऽपि परस्यैव सा कथ्यत इति न पराधिकारो निवर्तते । न च वाक्यभेदो विशिष्टार्थप्रेषणात्, अवश्यं चात्र विशिष्टताऽभ्युपगन्तव्या, प्रोक्षणीपदोपादानात् । न चैकपदोपात्तोऽनेकोऽर्थो वाक्यं भिनत्ति । सर्वाख्यातेषु क्रियाकर्तृसंख्योपग्रहपुरुषविशे-षभावनानां युगपदुपादानस्यापरिहार्यत्वात् । न चेदृशं विशिष्टविधानं क्वचिन्नाभ्युपगन्त-व्यम् । प्राप्तकालत्वे च क्रियायुष्मदर्थयोः पृथक्त्वाद्भेदेन शक्तिः कल्प्येत । प्रैषे तु तस्य नित्यमेव युष्मदर्थविषयत्वान्मध्यमपुरुषोऽनुवादः । एवं चैषां समाख्याऽनुगृह्यते । तस्माल्लिङ्गेन समाख्याबाधादन्यः प्रैषोऽन्यश्च प्रैषार्थ इति ॥ २२ ॥

(इति—प्रैषप्रैषार्थयोर्भिन्नकर्तृकत्वाधिकरणम् ॥ ११ ॥)

---

१ वाक्यभेद इति—कर्तृक्रियाविशिष्टकालप्राप्तत्वोक्त्या गौरवलक्षणवाक्यभेदः स्यादित्यर्थः । २ (अ० ३ पा० ३ अ० ७) इत्यत्रेति शेषः । ३ एषा समाख्या—प्रैषसमाख्येत्यर्थः ।

[१२] अध्वर्युस्तु दर्शनात् ॥ २३ ॥ पू०

अथैवं गते, इदं संदिह्यते । किमध्वर्युरग्नीधं प्रेष्येदुताग्नीदध्वर्युमिति । अनियमोऽविशेषादिति प्राप्ते, ब्रूमः । अध्वर्युरुक्तप्रैषार्थकारी स्यात् । कुतः । दर्शनात् । दर्शनं भवति, तिर्यञ्चं स्फ्यं धारयेत्, यदन्वञ्चं धारयेद्वज्रो वै स्फ्यो वज्रेणाध्वर्युं क्षिण्वीतेति । यः प्रेष्यति तस्य हस्ते स्फ्यः । स्फ्येनाध्वर्युं क्षिण्वीतेत्यन्यमध्वर्युं प्रेषकं दर्शयति । तस्मादग्नीदध्वर्युं प्रेष्येदिति ॥ २३ ॥

गौणो वा कर्मसामान्यात् ॥ २४ ॥ सि०

नैतदस्ति, अग्नीधः प्रैषोऽध्वर्योः प्रैषार्थ इति । किं खलु, अध्वर्युरेवाग्नीधं प्रेष्येत् । एवमध्वर्युणा प्रैषः प्रैषार्थश्चोभावपि कृतौ भविष्यतः । तत्राऽऽध्वर्यवमिति समाख्याऽनुग्रहीष्यते । तस्मादध्वर्युरेव मुख्यः स्यात् । किमस्य मुख्यत्वम् । यदनेन सर्वं कर्तव्यं समाख्यानादिति । अथ यदुक्तमध्वर्युः प्रचरिता दृश्यत इति । तदुच्यते । सत्यं दृश्यते । न त्वस्य प्रैषार्थकरणे प्रमाणमस्ति चिन्त्यमानम् । तस्मादेतन्मिथ्यादर्शनम् । यस्य हि दर्शनस्य प्रमाणं नास्ति, व्यामोहः सः । यथा शुक्तिकायां रजतविज्ञानम् । अस्ति त्वग्नीधः प्रैषार्थकरणे प्रमाणम् । तस्मादाग्नीध्रः प्रचरिता प्रचारितरि चाध्वर्युशब्दो दृश्यते । तस्माद्गौणः, आध्वर्यवे वेदे समाम्नातान्पदार्थान्करोतीति कृत्वाऽध्वर्युरित्युच्यते

'यदन्वञ्चं धारयेद्वज्रे ।ध्वर्युं क्षिण्वीत' वज्रोऽध्वर्युं क्षिण्वीतेति वा पाठः । स्फ्यस्य धारणं तावदग्नीध एकान्तेन । स चाध्वर्युं क्षिण्वीतेति वदन्नग्नीधं स्फ्यवन्तं प्रेषकं दर्शयति । का त्वस्य प्राप्तिः । उच्यते । '[1]अङ्गगुणविरोधे च तादर्थ्यात्' इत्यनेनाङ्गत्वात्प्रैषस्य कर्तृलोपो युक्तो न प्रधानस्य । बहवश्च प्रैषार्था एको निगदः । तेन '[2]भूयसां स्यात्सधर्मत्वम्' इत्यपि प्रैषार्थेऽध्वर्युरिति परिशेषात्प्रैषेऽग्नीत् ॥ २३ ॥

'[3]मुख्यं वा पूर्वचोदनात्' इति प्राथम्यात्प्रैषे समाख्यातः कर्ता युक्तः । न हि तदानीं विरोधः कश्चिदस्ति । तस्मिंस्तु प्रयुक्ते विरोधात्प्रैषार्थेऽन्यो भवति । प्रयोजकस्य च प्रयोज्यव्यापारेऽपि कर्तृत्वं न विहन्यत इत्युभयानुग्रहः । इतरथा हि प्रैषेऽत्यन्तबाध एव स्यात् । न हि स तेन कृतो नापि कारितो भवेत् । तस्मादध्वर्युप्रेषितोऽग्नीत्कुर्यादिति । 'वज्रेणाध्वर्युम्' इति चाऽऽग्नीध्रमेव तत्कार्यापत्तेरभिधास्यति ॥२४॥

(इति—प्रैषस्याऽऽध्वर्यवत्वाधिकरणम् ॥ १२ ॥)

---

१ (अ० १२ पा० २ अ० १ सू० २७) । २ (अ० १२ पा० २ अ० ७ सू० २४) एतत्सूत्रावयवः ३ (अ० १२ पा० २ अ० ८ सू० २५) ।

आग्नीध्र इति । तस्मादाध्वर्यवः प्रैषः आग्नीध्रः प्रैषार्थ इति ॥ २४ ॥

[१३] ऋत्विक्फलं करणेष्वर्थवत्त्वात् ॥ २५ ॥ पू०

दर्शपूर्णमासयोरामनन्ति, ममाग्ने वर्चो विहवेष्वस्त्विति पूर्वमग्निं परिगृह्णाति, इति । तत्र संदेहः, किमृत्विक्फलमाशासितव्यम्, अग्ने वर्चो विहवेष्वस्त्विति, उत यजमानस्येति । किं प्राप्तम् । अध्वर्योरेवेति । कुतः । एवं श्रुतिरादृता भविष्यति । इतरथा लक्षणा स्यात् । आत्मना यजमानं लक्षयेत् । तस्मादृत्विक्फलमाशासितव्यमिति । कोऽर्थः । अनया समिधा धार्यमाणेऽग्नौ यागः संभविष्यति । तत्र विहवेषु—स्पर्धास्थानेषु, अहं वर्चस्वी भविष्यामीत्यध्वर्योर्वचनम् । एवमुत्साही भविष्यतीति ॥ २५ ॥

स्वामिनो वा तदर्थत्वात् ॥ २६ ॥ सि०

यजमानस्य वा वचनं, तदर्थत्वात्कर्मणः । यजमानार्थं हीदं कर्म साङ्गम् । उपग्रहविशेषात् । साङ्गस्यास्य प्रयोजनं यजमानस्य फलनिष्पत्तिर्नाध्वर्योः सुप्रचारितुरपि यशः । किमतो यद्येवं, फलसं-

यथैवाकरणेषु यत्फलं तत्प्रकरणस्थं कीर्त्यते नान्यत्कल्प्यते तथा 'ममाग्ने वर्चो विहवेष्वस्तु' इत्यादिष्वपि । ते तु यजमानेनैव प्रयुज्यन्ते तस्यैव च फलमित्यविरुद्धाः । करणाः पुनरेकान्तेन कर्मसमानकर्तृकत्वादाध्वर्यवाः । तैर्ह्यध्वर्युणा प्रयुज्यमानैर्यजमानस्य फलमभिधीयेत ततो ममेत्यभिधानं विरुध्येत । कीदृशं त्वध्वर्योः फलमनूद्यत इति, तद्भावभावित्वमात्रेण सुप्रचारितृत्वयशः । तच्च तस्योत्साहं करिष्यतीति निरूपयति ॥ २९ ॥

नैवेदमकरणवदुत्साहार्थं फलं संकीर्त्यते । किं तर्हि । मन्त्रवर्णान्नित्याकाङ्गाश्रयं फलमवकल्पते । कथम् । [२]व्यतिरिक्तक्रियासाधनत्वेन हि मन्त्रश्चोदितस्तां वा तत्संबन्धि वा किंचित्प्रकाशयन्नङ्गभावं गच्छति । तस्माद्दिह यद्यध्वर्युयशः संकीर्त्यते नैतेन सकलेन मन्त्रेणाग्न्यन्वाधानं साधितं स्यात् । न हि तत्प्रकाशनमग्न्यन्वाधानेना-

१ अकरणवदिति—'आयुर्दा अग्ने' 'अगन्म सुवः सुवरगन्म' इत्यादयो ये, इतिकरणाद्यविनियुक्ता मन्त्रास्तद्वदित्यर्थः । २ व्यतिरिक्तेति—स्वशक्त्या प्रकाश्यार्थव्यतिरिक्ताग्न्यन्वाधानाख्यक्रियासाधनत्वेनेत्यर्थः ।

कीर्तनात्फलकर्तव्यता गम्यते । तदेतदग्न्यन्वाधानं यजमानस्य फलसंकीर्तने क्रियमाणेऽनेन मन्त्रेण फलसंबन्धात्प्रकाशितं कृतं भवति, नाध्वर्युयशःकीर्तनेन । तस्माद्यजमानफलमाशासितव्यमिति । अथ कस्मान्न याजमान एष मन्त्रो भवतीति । उच्यते । अग्न्यन्वाधानं समाख्ययाऽऽध्वर्यवम् । तच्चैवंगुणो मन्त्रः करोत्याध्वर्यवः । स उच्यतेऽनेन मन्त्रेणेति । तस्मादाध्वर्यवो मन्त्रः । मम वर्चोऽस्त्वित्यपि यजमानस्य वर्चो ममेति व्यपादिशति लक्षणया । यथा राजनि जयं वर्तमानं सैनिका अस्माकमिति व्यपदिशन्त्येवम् ॥ २६ ॥

पेक्षितम् । यद्यपि तावत्प्रधानफलं प्रकाशयेत्तथाऽपि न संबध्येत किमुत कर्मकालानौपयिकानुनिष्पादिबाह्यऋत्विग्यशःप्रकाशनेन । तस्मात्सूक्तवाकन्यायेनैव चोदितमन्त्रकरणत्वान्यथानुपपत्त्याऽग्न्यन्वाधानस्य फलमेतत्कल्प्यते । यास्त्वाशिषस्ताः साक्षात्प्रधानाङ्गमिति तत्फलप्रकाशनेनैवाङ्गं भवन्ति । यदि पृथक्फलं साधयेयुस्ततः संयुक्तत्वान्नैव प्रकरणेन क्रत्वङ्गभावं गच्छेयुरिति वैषम्यम् । आह । सत्यपि पृथक्फलत्वे ममशब्देनाध्वर्युर्गृह्यत इति व्यपदेशन्यायेनाऽऽध्वर्यवमेव प्राप्नोति । उच्यते । लिङ्गेनाऽऽध्वर्यवत्वं प्राप्नोत्यात्मनेपदश्रुत्या याजमानत्वम् । अथोभयानुग्रहार्थं कस्मात्कर्मापि याजमानमेव न भवति । तथा सति हि ममशब्द आत्मनेपदं चोभयमपि न विरोत्स्यत इति । नैतदस्ति । यदि ह्येतन्मन्त्रपूर्वकं कर्म भवेत्तत एवं नियम्येत । प्रथमं त्वेतदुत्पद्यमानं केवलक्रत्वर्थत्वप्रतीतेरविरुद्धाध्वर्युसंबन्धं समाख्यानात्प्रतिपद्यते । मन्त्रमात्रं याजमानमिति चेन्न । कर्मणाऽऽकृष्यमाणस्य तत्समानकर्तृकत्वनियमात् । फलमपि तर्ह्याकृष्येत । आकृष्येत, यद्यात्मनेपदेन न प्रतिबध्येत । तत्राऽऽत्मनेपदस्य बाधासंभवाद्गौणत्वप्रकारानुपपत्तेश्च मन्त्रगत एव ममशब्दोऽध्याहारेण वा पूर्यते गौणो वा भवति, मदीयस्य यजमानस्य मद्रूपस्यैव वा यजमानस्य वर्चो विहवेष्वस्त्विति । तस्माद्यजमानफलमेतदिति । ये च यजमानकर्तृकमेवाग्न्यन्वाधानं पक्षे वदन्ति तेषामित एव मन्त्रवर्णाद्भ्रान्तिः । अथ तु किंचिद्वचनमुपन्यस्यन्ति तथाऽपि किं कर्मविकल्पवत्फलमध्वर्युयजमानयोर्विकल्पते किं वा फलं नित्यमेव याजमानमिति विचारः ॥ २९ ॥

---

१ तच्चैव गुणो मन्त्रो यः करोत्याध्वर्यवं स उच्यतेऽनेन मन्त्रेणेति पा० । २ (अ० ३ पा० २ अ० ५) अन्नत्येनेति शेषः । ३ संयुक्तत्वादिति—' असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात् ' इति प्रकरणाधिकरणोक्तन्यायेन लिङ्गादिविनियुक्तेषु प्रकरणविनियोज्यत्वासंभवादित्याशयः । ४ (अ० ३ पा० ८ अ० ५ सू० १४) अन्नत्येनेति शेषः । ५ ये च—कल्पसूत्रकारा इत्यर्थः ।

लिङ्गदर्शनाच्च ॥ २७ ॥

लिङ्गमप्यमुमर्थं दर्शयति । एवं ह्याह । यां वै कांचन ऋत्विज आशिषमाशासते यजमानस्यैव सा, इत्याशिषो यजमानार्थकतां दर्शयति । तस्मादपि ब्रूमो यजमानफलमाशासितव्यमिति । पक्षोक्तमेव प्रयोजनमिति ॥ २७ ॥

[१४] कर्मार्थं तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात् ॥ २८ ॥ सि०

इदं समधिगतं, करणेषु मन्त्रेषु स्वामिनः फलमाशासितव्यमिति । किमेष एवोत्सर्गः । नेत्याह । क्वचिदृत्विजामपि फलमाशासितव्यमिति, यत्र कर्मार्थं फलम् । यथा, अग्नाविष्णू मावामवक्रमिषं विजिहाथां मा मा संताप्तम्, इति । असंतप्तोऽध्वर्युः कर्म शक्नोति कर्तुम् । कर्मसिद्धिर्यजमानस्योपकारिकेति, ऋत्विक्फलमाशासितव्यमत्रेति ॥ २८ ॥

व्यपदेशाच्च ॥ २९ ॥

यत्र च व्यपदेशो भवति, तत्राऽऽर्त्विजम् । दक्षिणस्य हविर्धानस्याधस्ताच्चत्वार उपरवाः प्रादेशमुखाः प्रादेशान्तरालाः । तत्र हस्तौ प्रवेश्याध्वर्युर्यजमानमाह, किमत्रेति । स आह, भद्रमिति । तन्नौ सहेत्यध्वर्युः प्रत्याहेति व्यपदेशो भवत्यध्वर्योर्यजमानस्य च । तन्नौ सहेत्युभयोर्वचनमध्वर्युयजमानयोः । तस्मादध्वर्युफलमाशासितव्यमत्रेति ॥ २९ ॥

सर्वाशिषामृत्विक्प्रयोज्याना यजमानसंबन्धानुवाद एवमवकल्पिष्यते ॥ २७ ॥

(इति-करणमन्त्रप्रकाश्यफलस्य याजमानत्वाधिकरणम् ॥ १३ ॥)

दत्त्वसंतापादि फलं कर्मप्रयोग एवोपयुज्यते तद्यजमानेनापि तथेष्यत एवेति नाऽऽत्मनेपदेन विरुध्यते ॥ २८ ॥

' व्यपदेशादितरेषाम् ' इत्यत्र ब्राह्मणगतमुदाहृतमिह तु प्रस्तावशेन मन्त्रगतम् । तद्धि क्लेशेन कल्प्यमानं कदाचिदुभयोर्न शक्यते कल्पयितुमित्याशङ्का स्यात् । कल्पनाहेतुस्तु युगपत्प्रवृत्तेरविशिष्ट इति न किंचिद्गौरवम् । अथ कस्मान्नोभावेव प्रयुञ्जाते । यदैकेनापि प्रयुज्यमानः शक्नोत्येवोभयगामि फलं प्रकाशयितुं तदा सिद्धेऽर्थे न किंचिदुभयकर्तृकत्वेन प्रयोजनमस्तीत्यध्वर्युर्नियमः ॥ २९ ॥

(इति-करणमन्त्रेषु कर्मोपयोगिप्रकाश्यमानफलस्य ऋत्विग्गामित्वाधिकरणम् ॥ १४ ॥)

---

१ अत्रेति क्वचिन्नास्ति । २ (अ० ३ पा० ८ अ० ५ सू० १४) अत्रत्यन्यायेन पौनरुक्त्यं तावत्परिहरति—व्यपदेशादित्यादिना ।

[१५] द्रव्यसंस्कारः प्रकरणाविशेषात्सर्वकर्मणाम् ॥ ३० ॥ सि०

दर्शपूर्णमासयोर्बर्हिर्धर्मा वेदिधर्माश्च । तेषु संदेहः । किमङ्गप्रधानार्था उत प्रधानार्था इति । प्रकरणात्प्रधानार्था इति प्राप्त उच्यते । नैवं, द्रव्यसंस्कारोऽङ्गप्रधानार्थो यथा व्याख्यातमेवोत्तरविवक्षया प्रतिरेषा क्रियत इति ॥ ३० ॥

[१६] निर्देशात्तु विकृतापूर्वस्यानधिकारः ॥ ३१ ॥ सि०

ज्योतिष्टोमे पशुरग्नीषोमीयो यो दीक्षितो यदग्नीषोमीयं पशुमालभते, इति । तत्र श्रूयते । बर्हिषा यूपावटमवस्तृणाति, आज्येन यूपमनक्ति, इति । तत्र संशयः । किं तयोराज्यबर्हिषोराज्यबर्हिर्धर्माः प्राकृताः कर्तव्या उत नेति । किं प्राप्तम् । कर्तव्या इति । कुतः । वाक्यं हि बर्हिर्मात्रस्याऽऽज्यमात्रस्य च धर्माणां विधायकम् । तदिहापि वाक्यं चोदकेन प्राप्तम् । न चैतद्बर्हिराज्यं निष्प्रयोजनम् । तस्मादत्र धर्माः क्रियेरन्निति । एवं प्राप्ते ब्रूमः । निर्देशाद्विकृतावपूर्वस्यानधिकारः । निर्दिष्टा एते धर्माः प्रकृतौ । यत्र प्रधानस्योपकुर्वन्ति प्राकृतकार्ययोराज्यबर्हिषोः । ये च प्रधानस्योपकारिणो धर्मास्त इहातिदिश्यन्ते । प्रधानं हि चोदकोऽपेक्षते, न धर्मान् । प्रधानस्य हि चोदकेन सामान्यं, न धर्माणाम् । अपि च । नान्यार्थे

गतः समाख्याविरोधाविरोधविषयः । सर्वश्च श्रुत्यादिविरोधाविरोधविचारः प्रकृताविव विकृतिष्वपि द्रष्टव्यः । यत्तु धर्माणां सामानविध्यमङ्गप्रधानेषु पूर्वोक्तं तद्विकृतिषु कथमिति विचारे प्राप्ते सूत्रमतत् । शक्यं तु पूर्वपक्षेऽप्येतत्समर्थयितुं यस्मात्प्रकृतौ बर्हिरादिसंस्कारः सर्वकर्मणां तस्माद्विकृतावपि तथैव स्यादिति ॥ ३० ॥

(इति—द्रव्यसंस्काराणामङ्गप्रधानार्थताधिकरणम् ॥ १९ ॥)

येयमङ्गोपदेश एवानुषङ्गरूपेण साधारणः स्यात्, यदि च शास्त्राण्यतिदिश्येरंस्ततः शास्त्रार्थः प्रकृतिवद्विकृतिष्वपि कल्प्यमानः सर्वार्थत्वेनावधार्यते कार्यप्राप्तिपुरःसरस्तु

---

१ सामान्यं—सादृश्यमित्यर्थः । २ नान्यार्थे ज्ञाते, इति पा० । ३ (अ० ३ पा० ७ अ० १ सू० २) इत्यत्रेति शेषः । ४ एवं तावद्यथाभाष्यं सूत्रं प्राप्तिसूत्रतया व्याख्यायाधुनोत्तराधिकरणपूर्वपक्षपरतयाऽपि योजयति—शक्यमित्यादिना । ५ ' ये च प्रधानस्य ' इत्यादि सिद्धान्तभाष्यं तात्पर्यतो व्याचष्टे—प्रधानमित्यादिना ।

इति ज्ञातेन संनिहितेनाप्येकवाक्यता भवति, अन्यसंबन्धोपपत्तौ सत्याम्। यथा भार्या राज्ञः, पुरुषो देवदत्तस्येति। किमङ्ग पुनर्विप्रकृष्टेन, निर्ज्ञातं खल्वङ्गत्वं प्रधानापेक्षायां भवति। केवलमिहातिदेशः क्रियते। पदार्थापेक्षायामङ्गत्वमपि साधयितव्यं स्यात्। धर्माश्चापेक्ष्यमाणाः साधारणा भवेयुः। तथोहो नावकल्पेत। लिङ्गविशेषदर्शनाच्च व्यवतिष्ठेरन् धर्माः। तत्र दर्शनं नोपपद्येत। वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यंदिने, इति। तथा, न पिता वर्धते, न माता, न नाभिः, प्राणो हि स इति। तस्माद्यद्द्वारा प्रकृतौ कृताः, तद्द्वारैव विकृतौ, नान्यद्द्वारा। न च यूपावटस्तरणं प्रकृतावस्ति यूपाञ्जनं वा। तस्मान्न तत्र प्राकृता धर्मा भवेयुरपूर्वत्वात् ॥ ३१ ॥

[१७] विरोधे च श्रुतिविशेषादव्यक्तः शेषे । ३२ ॥ सि०

[1]दर्शपूर्णमासयोरामनन्ति, समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे करोति। तथा, अरत्निमात्रे विधृती करोति, इति। तत्र संशयः। किं वेदिस्तरणार्थाद्बर्हिषो विधृती पवित्रे, उतान्यत इति। किं तावत्प्रा-

धर्मातिदेश इष्टः[1]। तत्र यागगतेन व्यापारेण गृहीतेनाऽऽत्मसिद्ध्यर्थं नियमाद्दृष्टद्वारभूतानि दृष्टान्यदृष्टानि च प्रयोजनानि गृह्यन्ते। तानि च निर्ज्ञातपरिमाणान्येव प्राप्नुवन्ति। तैश्चाऽऽत्मसिद्ध्यर्थं पदार्थाः प्राप्यमाणाः स्वात्मनियता एव प्राप्यन्ते। न च यूपावटास्तरणं नाम बर्हिषः कार्यं प्रकृतौ विज्ञातं, येन बर्हिस्तद्धर्मा वा गृह्येरन्। यैस्तु वेदिस्तरणादिभिर्गृह्यन्ते न तेषां यूपावटस्तरणमन्तरेण किंचिन्नोपपद्यत इति न तदर्थं प्राप्यन्ते। तस्मादिहापूर्वस्यानधिकार इति। प्रधानं[2] हि चोदकोऽपेक्षत इत्यादिना, अपिना साधारण्यं शास्त्रातिदेशो[3] नेत्येतन्निराकरोति। शास्त्रापेक्षायां हि सर्वमभिनवं प्रकृतिवत्पुनः कल्पयितव्यं स्यात्। दूरस्थसंबन्धादिक्लेशश्च स्थित एव। शास्त्रातिदेशात्सामानविध्याच्च, पशुधर्माणां मध्येऽग्नीषोमसंस्कारार्थः पशुपुरोडाशो देवतान्तरे न प्राप्नोति। तस्योहस्य च दर्शनं विरुध्येत। तस्मादुपकारातिदेश इति ॥ ३१ ॥

(इति-प्राकृतधर्माणां विकृतावपूर्वपदार्थानङ्गत्वाधिकरणम् ॥ ११ ॥)

---

१ इष्ट इति—सप्तमाद्ये प्रकृतिविकृतिसाधारण्यनिरासेन, दशमाद्ये च कार्यप्राप्तिपुरःसरमतिदेशोऽभिप्रेत इत्यर्थः। २ प्रधानं हीत्यनेन शास्त्रातिदेशः, अपि चेत्यनेनोपदेशस्य प्रकृतिविकृतिसाधारण्यं च निरस्यत इत्येवं भाष्यमवयवशो व्याख्यास्यति—प्रधानं हीत्यादिना। ३ शास्त्रातिदेश इत्यारभ्य स्थित एवेत्यन्तो ग्रन्थो काशीमुद्रितपुस्तकेऽनुपलभ्यमानोऽपि व्याख्यानावलम्बनेन स्थापितः।

ष्ठम् । वेदिस्तरणार्थाद्बर्हिषः कार्ये । किं कारणम् । तद्धि प्रकृतं, धर्माश्चाविशेषात्सर्वबर्हिषामर्थेन । तस्मात्तत इति प्राप्ते । ब्रूमः । अन्यतः क्रियेत । कुतः । विरोधात् । कथं विरोधः । श्रूयते हि, त्रिधातु पञ्चधातु वा वेदिं स्तृणाति, इति । तच्चेनाऽऽस्तीर्यते, कथं तद्विधृतिपवित्रं क्रियेत । न हि संभवत्येकं स्तरणाय विधृतिपवित्राय च । तदेतदुपदिष्टवचनमनेकगुणत्वं चोभे अप्यसंभविनी प्रतिज्ञाते स्याताम् । तस्मान्न ततः क्रियेतेति । यदि न ततः, कुतस्तर्हि । अव्यक्त एवंजातीयकः शेषे । अस्ति तत्र परिभोजनीयं नाम बर्हिः, ततः कर्तव्यम् ॥ ३२ ॥

[१८] अपनयस्त्वेकदेशस्य विद्यमानसंयोगात् ॥ ३३ ॥ सि०

ज्योतिष्टोमे श्रूयते, पुरोडाशशकलमैन्द्रवायवस्य पात्रे निदधाति, धाना आश्विनपात्रे, पयस्यां मैत्रावरुणपात्रे, इति । तत्र संशयः । किमन्यत एषां क्रियेत, उत प्रकृतेभ्य इति । किं प्राप्तम् । पूर्वेण न्यायेनान्यत इति । तत्रोच्यते । तत एकदेशस्यापनयः । कुतः । विद्यमानसंयोगात् । विद्यते हि तत्र पुरोडाशो धानाः पयस्या च । तत्संयोग एव न्याय्यो नान्यसंयोग इति । पुरोडाशादीनामेव संस्कारो, नैन्द्रवायवादीनाम् । कुतः । पुरोडाशादिषु द्वितीयादर्शनात् । प्रत्यक्षश्चैकदेशापनयेनोपकारो, नैन्द्रवायवादिसंबन्धेन । एवं प्रकृतानुग्रहो भविष्यति । तस्मात्प्रकृतस्योपदेशेन तत्क्रियेत । न चात्रोपदिष्टोपदेश

इदानीं प्रकृतावपि नातीव सर्वार्थतेत्येतत्साधयति । यथालूनस्य बर्हिषस्त्रिधातु पञ्चधातु चेति सकलस्य स्तरणविधानादशक्योऽन्यविनियोग इति सामान्यभूतो विधृतिपवित्रार्थो दर्भविधिरन्यो द्रष्टव्यः । धातुरिति स्तरणचयोऽभिधीयते ॥ ३२ ॥

(इति—प्रकृतावपि लवनादेरसर्वार्थताधिकरणम् ॥ १७)

पुरोडाशधानादीनां सप्तमीयचागार्थत्वात्पूर्वेणैव न्यायेन ग्रहणश्रयणार्थमन्ये पुरोडाशशकलादय इति प्राप्तेऽभिधीयते । 'एकदेशद्रव्यं च' इत्येनेनाप्रयोजकलक्षणापत्तेरन्यस्य च शकलस्याभावाद्व्यवदानमात्रे च हुते शेषस्य प्रतिपाद्यमानस्य दृष्टार्थत्वाद्-

---

१ स्तरणचय इति— स्तरणार्थबर्हिर्मुष्टिचय इत्यर्थः । २ ग्रहणे ' इति पा० । ३ (अ० ४ पा० १ अ० ११ सू० २८)

आमङ्गयोऽनेकगुणभावश्च । अन्येन शकलेन होमोऽन्यश्च प्रति-पाद्यते[1] ॥ ३३ ॥

[१९] विकृतौ सर्वार्थः शेषः प्रकृतिवत् ॥ ३४ ॥ पू०

इदमामनन्ति । यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्या इति । अत्र संशयः । किमङ्गप्रधानार्थमुपांशुत्वमुत प्रधानार्थमिति । किं प्राप्तम् । विकृतौ सर्वार्थः शेषः स्यात् । अविशेषादङ्गानां प्रधानानां च प्रकृतिवत् । यथा प्रकृतौ वेदिधर्मा आज्यधर्माश्चाङ्गप्रधानार्थाः, एवमत्रापि ॥ ३४ ॥

मुख्यार्थो वाऽङ्गस्याचोदितत्वात् ॥ ३५ ॥ सि०

प्रधानार्थो वा एष विकृतिषु स्यात् । एवमिदं सर्वार्थमुच्येत, प्रकरणं बाधित्वा वाक्येनाङ्गप्रधानार्थमिति । तदेवेदानीं वाक्यं विशेषितं काम्या इष्टय इति । काम्याश्च प्रधानयागाः, अङ्गयागाः प्रधानार्थाः । तस्मादङ्गमचोदितम् । यत्कामेन फलवच्चोद्यते, तदेवानयोपांशुत्वेतिकर्तव्यतयाऽनुबध्यते । तस्मात्प्रधानार्थमुपांशुत्वम् ॥ ३५ ॥

[२०] संनिधानविशेषादसंभवे तदङ्गानाम् ॥ ३६ ॥ सि०

श्येने श्रूयते, हतिनवनीतमाज्यमिति । तत्र संदेहः । किं नवनीतं प्रधानस्योताङ्गानामिति । किं प्राप्तम् । प्रधानस्य । तस्य हि प्रकरण-

---

द्वितीयानिर्देशानुग्रहान्न कश्चिद्विरोधो दृश्यते । तस्मादत्र प्रकृतोपादानम् ॥ ३३ ॥

(इति—प्रकृतपुरोडाशादीनां निधानार्थताधिकरणम् ॥ १८ ॥)

यत्र यत्र स्थितमुपांशुत्वं काम्यानामिष्टीनामुपकर्तुं शक्नोति तत्र तत्र कर्तव्यम् ॥ ३४॥

केचिदाहुरस्य प्रत्यक्षत्वेन प्रथमतरं प्राप्तेश्चोदकप्राह्याण्यङ्गानि न तावत्प्राप्नुवन्तीत्यचोदितत्वम् । न त्वेतत्संभवति । सर्वत्र चोदकस्य प्रथमतरं प्रवृत्तेः । तस्मादयमर्थः । प्रकृतौ हि प्रकरणात्प्रधानार्थत्वे प्राप्ते वाक्यात्सर्वार्थत्वम् । इह तु वाक्यमेव विशेषनिष्ठं, काम्या इति वचनात् । न ह्यङ्गानि कामसंबद्धानि तस्मान्न तेषामेव धर्मश्चोदित इति ॥ ३५ ॥

(इति—उपांशुत्वस्य काम्येष्टिप्रधानमात्रार्थत्वाधिकरणम् ॥ १९ ॥)

---

[1] प्रतिपाद्यत इतीति क्वचित्पाठः ।

मिति वचनप्रामाण्यान्नवनीतेन प्रधानं निर्वर्तयितव्यमिति । एवं प्राप्ते ब्रूमः । असंभव एतस्मिंस्तदङ्गानां—श्येनाङ्गानां स्यात् । कथमसंभवः । सोमद्रव्यकत्वात्प्रधानस्य । ननु वचनान्नवनीतं भविष्यति । न श्येने नवनीतं भवतीत्येष वाक्यार्थः । कस्तर्हि । श्येने नवनीतमाज्यं भवतीति नवनीताज्यसंबन्धो विधीयते, श्येनाज्यसंबन्धोऽनूद्यते । न च साक्षाच्छ्येनस्याऽऽज्यसंबन्धोऽस्ति, श्येनाङ्गानां तु विद्यते । यस्यास्ति तस्यानूद्य नवनीतं विधीयते संनिधानाविशेषात् ॥ ३६ ॥

आधानेऽपि तथेति चेत् ॥ ३७ ॥

एवं चेद्दृश्यते, श्येनाङ्गानां नवनीतमिति, आधानेऽपि पवमानेष्टिषु स्यात् । ता अपि हि श्येनस्योपकुर्वन्ति, तत्संस्कृतेऽग्नौ श्येनो निर्वर्तत इति ॥ ३७ ॥

नाप्रकरणत्वादङ्गस्य तन्निमित्तत्वात् ॥ ३८ ॥

न श्येनस्य प्रकरणे पवमानेष्टयोऽग्न्याधानं वा श्रूयते । किमतो यद्येवम् । आधानस्य च श्येनस्य च न कश्चिदस्ति संबन्धः, अग्नीनामाधानमग्नयश्च श्येनस्य । तस्मान्न पवमानहविःषु नवनीतम् । नैतच्छ्येनाङ्गत्वे निमित्तं, यदाधानमग्नीनामुपकरोति । यदि प्रकरणादीनामन्यतममस्ति, तन्निमित्तं भवेत् । तस्मान्न श्येनाग्न्याधानयोः संबन्धोऽस्तीति ॥ ३८ ॥

[२१] तत्काले वा लिङ्गदर्शनात् ॥ ३९ ॥ पू०

इदमिदानीं संदिह्यते, किं सुत्याकालानामङ्गानां नवनीतमुत सर्वे-

---

'[1] दृतिनवनीतमाज्यम्' इति प्रकरणे विशिष्टविधानात्सोमो बाधिष्यत इति मन्यते। यतस्त्वनेकार्थविध्यसंभवादाज्यमनूद्य विशेषमात्रं विधीयते । न च प्रधानस्याऽऽज्यप्राप्तिः । तस्मात् '[2] आनर्थक्यात्तदङ्गेषु' इत्येव सिद्धम् ॥ ३६ ॥

अवश्यं श्येनोपकारि यदाज्यमिति वक्तव्यम् । ततश्च पवमानहविराज्यमपि श्येनोपकारीति दृतिनवनीतं स्यात् ॥ ३७ ॥

न ह्युपकारित्वमात्रेण संबन्धः । किं तर्हि । अधिकारात्प्रकृतस्योपकारिणः, प्राकरणिकं चोदकेन संनिहितं न पवमानेष्टिगतमिति व्यवस्था ॥ ३८ ॥

(इति–दृतिनवनीताज्यस्य श्येनप्रयोगान्तर्वर्त्याज्यकार्यार्थताधिकरणम् ॥२०॥)

---

१ दृतिनवनीतमाज्यमिति—चर्मभाण्डस्थितनवनीतप्रकृतिकमाज्यमित्यर्थः । २ (अ० ३ पा० १ अ० ९ सू० १८) ।

षामिति। सुत्याकालानां स्यात्। लिङ्गदर्शनात्। इदं श्रूयते। सह पशूनालभते, इति। तत्र पुनर्वचनम्, अग्नीषोमीयस्य स्थानेऽग्नीषोमीयः पुरोडाशः, अनुबन्ध्यायाः स्थाने मैत्रावरुणी पयस्या, इति द्वे स्थाने शून्ये दर्शयति। तेनावगम्यते श्येनस्य वचनं सुत्याकालानामङ्गानां विशेषं विदधातीति ॥ ३९ ॥

सर्वेषां वाऽविशेषात् ॥४०॥ सि०

सर्वेषामेव चाङ्गानां नवनीतं स्यात्। कुतः। अविशेषात्। असति विशेषे सर्वेषामप्यङ्गानामिति ॥ ४० ॥

न्यायोक्ते लिङ्गदर्शनम् ॥ ४१ ॥

यदुक्तं लिङ्गं, तत्परिहरणीयम्। नास्ति तावत्प्रमाणं यच्छ्येनस्य वचनं तत्सुत्याकालानामङ्गानामिति। किंतु दर्शनम्। तदप्रमाणमूलत्वान्मिथ्यादर्शनं मृगतृष्णावत्। कथं तु मध्ये पशूनामालम्भ इति। न्यायात्। को न्यायः। क्रमानुग्रहः। एवं वचनवर्जितः क्रमोऽनुगृहीतो

संनिधिविशेषात्सामान्यतो दृष्टाच्च तत्कालानां लिङ्गदर्शनेन दृष्टान्तं साधयति। पशुसाहित्यं ह्येतदीयो धर्मः सुत्याकालो दृष्टोऽग्नीषोमीयानुबन्ध्यास्थानयोरन्येनानुग्रहवचनात्। तस्मादयमप्येतद्धर्मत्वात्सुत्याकाल इति ॥ ३९ ॥

तदुक्तं 'सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात्' इति[1] ॥ ४० ॥

न्यायगम्ये लिङ्गमीदृशं साधकं भवति। आगमगम्यस्त्वयम्। न च सहाऽऽलम्भस्यैतद्धर्मत्वात्सुत्याकालता। किं तर्हि। अन्यत एव न्यायात्। न चासौ दृतिनवनीते संभवति। तं न्यायं दर्शयति। एवं वचनवर्जितो यः क्रमः—संनिकर्षलक्षणोऽनुमेयश्रुत्यर्थः सोऽनुग्रहीष्यत इति। सवनीयकाले ह्यालभ्यमानेषु न कस्यचित्पशोः कालम[2]-

---

१ (अ० ३ पा० ७ अ० १ सू० २)। २ कालमतिक्रम्येतेति—प्रधानकालमित्यर्थः। अयमाशयः। ज्योतिष्टोमे, भिन्नकालानुष्ठेयानां त्रयाणामग्नीषोमीयसवनीयानूबन्ध्यानां पशूनां ज्योतिष्टोमविकारभूते श्येनयागेऽतिदिष्टानां साहित्यं श्रूयते 'सह पशूनालभते' इति। तच्च साहित्यं कस्मिन्देश इत्यपेक्षायां यत्रैवानुष्ठाने प्रधानभूतसोमयागप्रत्यासत्तिः, त्रयाणां पशुयागानां संभवति। सवनीयस्यैव तु सुत्याकालीनत्वेन तत्रैवं लभ्यते। एवं सवनीयस्थान एव पूर्वोत्तरयोरनुष्ठाने द्वयोरप्यग्नीषोमीयानूबन्ध्ययोः स्वस्थानातिक्रममात्रेण तुल्यकालोत्कर्षोऽपकर्षश्च भवतः। इतरथा, अनूबन्ध्यास्थाने—अवभृथान्ते, सवनीयाग्नीषोमीययोरनुष्ठाने, सवनीयस्य स्वस्थानातिक्रममात्रं, अग्नीषोमीयस्य तु स्वस्थानातिक्रमः सवनीयस्थानातिक्रमश्च। एवमग्नीषोमीयस्थाने—औपवसथ्येऽहनि, सवनीयानूबन्ध्ययोरनुष्ठाने, सवनीयस्य स्वस्थानातिक्रममात्रं, अनूबन्ध्यायास्तु स्वस्थानद्वयातिक्रमश्च प्रसज्येत। अतश्च प्रधानप्रत्यासत्तिस्थानातिक्रमसाम्याभ्यां सवनीयस्थान एव त्रयाणामनुष्ठानमिति न्यायत एव सिध्यतीति।

भवति । तस्मात्सर्वेषामङ्गानां नवनीतमिति ॥ ४१ ॥

[२२] मांसं तु सवनीयानां चोदनाविशेषात् ॥ ४२ ॥ सि०

शाक्यानामयनं षट्त्रिंशत्संवत्सरम् । तत्रेदं समामनन्ति संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति, स तत्र यान्मृगान्हन्ति, तेषां तरसाः पुरोडाशाः सवनीया भवन्ति, इति । तत्र संदेहः । किं सवनीयानामन्येषां च संभवतां पुरोडाशानां स्थाने तरसा उत सवनीयानामेवेति । किं प्राप्तम् । सर्वपुरोडाशानां मांसमयता स्यात् । न शक्यते पुरोडाशानां च मांसमयता विधातुं सवनीयशब्देन च पुरोडाशान्विशेषयितुम् । भिद्येत हि तथा वाक्यम् । तस्मात्सर्वपुरोडाशानां मांसमयतेति प्राप्ते । उच्यते । मांसं तु सवनीयानां स्यात् । तरसाः सवनीया भवन्तीति तरससवनीयसंबन्धो विधीयते, तरसाः पुरोडाशा भवन्ति, इत्ययं त्वनूद्यते । कुत एतत् । सर्वपुरोडाशेषु सवनीयशब्दोऽनुवादो न घटते, पुरोडाशशब्दस्तु सवनीयेष्ववकल्पते । तस्मात्पुरोडाशशब्दोऽनुवाद इति । तस्मात्सवनीयानां धानादीनां स्थाने मांसं चोदनाविशेषादिति ॥ ४२ ॥

भक्तिरसंनिधावन्याय्येति चेत् ॥ ४३ ॥

इति चेत्पश्यसि, सवनीयेषु पुरोडाशशब्दोऽनुवादो भविष्यतीति । धानादिषु पुरोडाशशब्दो न वर्तते । भक्तिश्चान्याय्या मुख्ये संभवति । ॥ ४३ ॥

तिक्रम्येत । न च द्विगुणोऽध्वा भवति । इतरथा द्वयमपि स्यात् । तस्मादुपपन्नं दर्शनम् ॥ ४१ ॥

(इति—सर्वेषामेव श्येनीयाज्यकार्याणां द्वतिनवनीताधिकरणम् ॥ २१ ॥)

पुरोडाशशब्दस्य धानादिष्वसमर्थत्वात्सर्वपुरोडाशविषयत्वं सत्यपि सवनीयत्वे विशेष्टुमशक्यत्वादिति प्राप्तेऽभिधीयते । सवनीयशब्दस्याप्रमादपाठात्पुरोडाशशब्दं लिङ्गसमवायाद्गौणं कृत्वा धानादीनामपि ग्रहणमिति ॥ ४२ ॥

अत्यन्तभिन्नत्वाद्द्रव्यान्तरेषूपचारो न युक्तो यदि वा सवनीयशब्दस्याप्यवयुत्यानुवादेन भवत्विति ॥ ४३ ॥

---

१ सर्वेषां सवनीयानामन्येषां च स्थाने तरसा इति पा० । २ लिङ्गसमवायः—अल्पत्वम् । धानाः करम्भः परिवापः पुरोडाशः, पयस्येति पञ्च सवनीयानि हवींषि । तेषु पुरोडाशस्यैकत्वादल्पत्वाद्यगौणीवृत्तिनिमित्तेन पुरोडाशशब्दो गौण इत्यर्थः ।

स्यात्प्रकृतिलिङ्गत्वाद्वैराजवत् ॥ ४४ ॥

प्रकृतौ ज्योतिष्टोमे धानादिष्वयं पुरोडाशशब्दो भाक्तः संनिहितेषु प्रयुक्तः । इहापि भाक्त एव प्रयोक्ष्यते । अत्रापि हि सवनीयशब्देन ते संनिहिताः । प्रकृतौ लिङ्गसमवायाच्छब्दप्रवृत्तिर्विकृतावपि तथैव । यथा, छत्रिणो गच्छन्ति, ध्वजिनो गच्छन्तीति । यथा, उक्थ्यो वैरूपसामा, एकविंशः षोडशी वैराजसामा, इति प्रकृतिलिङ्गेन सामशब्देन वैरूपपृष्ठो वैराजपृष्ठ इति गम्यते । एवमिहापि सवनीयानां मांसमयतेति ॥ ४४ ॥

इति श्रीशबरस्वामिविरचिते मीमांसाभाष्ये तृतीयस्याध्यायस्याष्टमश्चरणः ॥ संपूर्णश्च तृतीयोऽध्यायः ॥

'पुरोडाशानलंकुरु' इति प्रकृतौ धानादिषु लक्षणा दृष्टा न तु सवनीयशब्दस्यासवनीयेषु प्रवृत्तिः । साहित्याच्च शक्यते तेन लक्षयितुं नेतरेण । न ह्यसवनीयस्य पुरोडाशस्य धानादिभिः सह संबन्धोऽस्ति । तस्माद्धानादीनां स्थाने तरसा इति सिद्धम् ।

इति कथितबलाबलप्रवेकै-
रवगतसर्वविरोधबाधमार्गैः ।
श्रुतिकृतदृढनिश्चयैः प्रमाणैः
स्थित इह कर्मसु शेषशेषिभावः ॥

(इति–सवनीयहविषां मांसमयत्वाधिकरणम् ॥ २२ ॥)

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके तृतीयाध्यायस्याष्टमः पादः ।

संपूर्णश्च तृतीयोऽध्यायः ।

समाप्तं च तन्त्रवार्तिकम् ।

---

१ गौणं लाक्षणिकं वाऽपि वाक्यभेदेन वा स्वयम् । वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलयेत् इति न्यायेन पुरोडाशशब्दस्यैव गौणत्वौचित्यं सूचयन् सिद्धान्तमाह—पुरोडाशानित्यादिना ।

अङ्गत्वनिरुक्तिविषयानुक्रमणिका ।

समाप्ता चाङ्गत्वनिरुक्तिविषयानुक्रमणिका ।

ॐ तत्सद्ब्रह्मणे नमः ।

श्रीमन्मुरारिमिश्रविरचिता ।

अङ्गत्वनिरुक्तिः ।

नमामि तुलजां स्वीयकुलजाद्यधिदेवताम् ।
सर्वाभीष्टफलप्राप्त्यै[1] ब्रह्मादिभिरभिष्टुताम् ॥
मुरारिसंसेवनशुद्धबुद्धिः कुमारिलप्रोक्तमतानुसारी ।
मुरारिरङ्गत्वनिरुक्तिमेतां करोति सद्युक्तिगणैरुपेताम् ॥

तत्राङ्गत्वं न तावज्जातिः, तत्साधकाभावात् । क्रियात्वादिजात्या सांकर्याच्च । जात्यादिसाधारणाङ्गत्वस्य जातित्वायोगाच्च । 'व्रीहिभिर्यजेत' इत्यादौ व्रीहिपदवाच्यजात्यादेरेव द्रव्यपरिच्छेदद्वारा यागाङ्गत्वस्य सिद्धान्तसिद्धत्वात् । अङ्गत्वस्य सनिरूपकत्वेन जातित्वायोगाच्च । सकलाङ्गसाधारणानुगताकारप्रतीतेरभावादेव नाखण्डोपाधित्वम् । अतः 'शेषः परार्थत्वात्'[2] इति सूत्रेण परार्थत्वमेवाङ्गत्वं जैमिनिराह । न च सूत्रे शेषत्वापरपर्यायाङ्गत्वे साध्ये परार्थत्वस्य पञ्चम्या हेतुत्वोक्तेर्हेतोश्च साध्याभिन्नत्वात्कथमङ्गत्वस्य परार्थत्वरूपत्वमिति वाच्यम् । तत्र शेषपदवाच्यत्वस्य साध्यत्वात् । अत एव शेषपदवाच्यत्वानुमाने, इतरभेदसाध्यकानुमान इव पक्षतावच्छेदकमेतदेव । अस्मन्मते साध्यवदन्यावृत्तित्वरूपसाध्यसामानाधिकरण्याघटितव्याप्तिज्ञानस्यैवानुमितिहेतुतया पक्षतावच्छेदकहेत्वोरैक्येऽपि सिद्धसाधनासंभवात् । प्रकृतानुमानस्य व्यतिरेक्यनुमानत्वेन साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्यानुमितिहेतुत्वेन तदभावाच्च । वस्तुतो व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यानुमितिहेतुत्वेन पक्षतावच्छेदकहेत्वोरैक्ये न सिद्धसाधनम् । पक्षतावच्छेदकरूपहेतौ साध्यसामानाधिकरण्यग्रहकाले तुल्यवित्तिवेद्यतया साध्ये पक्षतावच्छेदकाधिकरणवृत्तित्वभानेऽपि पक्षतावच्छेदकावच्छिन्नविशेष्यताकसाध्यवत्तानिर्णयाभावात् । अत एव पृथिवीत्वादेरपि पृथिव्यादिलक्षणत्वमुक्तं तार्किकैरित्यन्यदेतत् । शेषपदशक्यतावच्छेदकमप्येतदेव । अन्यानिरुक्तेः । अत एव शेषत्वस्य वक्ष्यमाणरीत्या नानात्वेन तत्पदं नानार्थकं बोध्यम् ।

अथ किं नाम परार्थत्वम् । न तावत्परोपकारकत्वम् । तद्धि यद्यदुपकारकं तत्तदङ्गमिति विशिष्य निर्वाच्यम् । तथा च कृष्यादौ यागाद्यङ्गत्वप्रसङ्गः । नापि विहितत्वघटितं तत् । पश्वङ्गभूतप्रयाजगोदोहनादीनां पुरोडाशप्रणयनाद्युपकारकत्वेन तदङ्गत्वापत्तेः । अथान्यानुपकारकत्वघटितं तत् । प्रयाजादीनां पुरोडाशाद्युपकारकत्वेऽपि पुरोडाशाद्यन्यपशूपकारकत्वान्नोक्ताङ्गत्वप्रसङ्ग इति चेत् । उक्तानां पश्वङ्गत्वानापत्तेः । अथान्याप्रयुक्तत्वघटितं तत् । प्रयाजादीनां पश्वङ्गपुरोडाशाद्युपकारकत्वेऽपि तदप्रयुक्तत्वान्नाव्याप्तिः ।

---

१ सर्वाभीष्टेति पा० । २ (अ० ३ पा० १ अ० २ सू० २) ।

पुरोडाशाद्यन्यपशुप्रयुक्तत्वाच्च न पुरोडाशाद्यङ्गत्वप्रसङ्ग इति चेत् । प्रकृतिप्रयुक्ताङ्गानां विकृत्यङ्गत्वानापत्तेः । ननु यदन्यमात्राप्रयुक्तत्वे सति यदुपकारकं यत्तत्तदङ्गम् । यदन्यमात्राप्रयुक्तत्वं च यदप्रयुक्तत्वे सति यदन्यप्रयुक्तत्वम् [1] लाघवात् । यदप्रयुक्तत्वस्यैव निवेशेऽप्रयोज्यकालदेशाद्यङ्गेष्वव्याप्तिः । अतो विशिष्टाभावसंपत्त्यै यदन्यप्रयुक्तत्वरूपं विशेष्यम् । एवं च प्राकृताङ्गानां विकृत्यन्यप्रकृतिप्रयुक्तत्वेऽपि विकृत्यप्रयुक्तत्वाभावाद्विशेषणाभावप्रयुक्तविशिष्टाभावसत्त्वेन यदन्यमात्राप्रयुक्तत्वम् । अतो नाव्याप्तिरिति चेन्न । पुरोडाशकपालस्य तुषोपवापाङ्गत्वानापत्तेः । 'पुरोडाशकपालेन तुषानुपवपति' इत्यत्र हि 'कपालेषु पुरोडाशं श्रपयति' इत्यनेन पुरोडाशप्रयुक्तत्वेनावगतस्यैव कपालस्य तुषोपवापाङ्गत्वेन विधानात्पुरोडाशकपालस्य न तुषोपवापप्रयुक्तत्वमित्युक्तं चतुर्थे [2] । अतस्तुषोपवापान्यपुरोडाशमात्रप्रयुक्तत्वात्पुरोडाशकपालस्य तुषोपवापाङ्गत्वानापत्तिः । यदि तु यदन्यप्रयुक्तत्वानवच्छेदकयदुपकारकतावच्छेदकरूपवद्यत्तत्तदङ्गमित्यनवच्छेदकत्वघटितं तत् । तथा च प्राकृताङ्गानां विकृत्यङ्गत्वोपपत्तिः । तथा हि । प्राकृताङ्गानां तावद्विकृत्युपकारकत्वं न प्रकृतिप्रयुक्तत्वावच्छेदकसमित्त्वादिना । समित्त्वादेरननुगतत्वेन प्रत्येकातिदेशकल्पने गौरवापत्तेः । अपि तु दर्शपूर्णमाससंबन्ध्यङ्गत्वेन सर्वाण्यङ्गान्यनुगमय्य दर्शपूर्णमाससंबन्ध्यङ्गैर्विकृतिमुपकुर्यादित्येकातिदेशकल्पनया निरुक्तरूपेणोपकारकत्वम् । प्रकृतिप्रयुक्तत्वं तु तत्तद्वाक्यैस्तत्तद्रूपेणैवावगतमिति तत्तद्रूपस्यैव प्रकृतिप्रयुक्तत्वावच्छेदकत्वम् । अतश्च विकृत्यन्यप्रयुक्तत्वानवच्छेदकप्रकृतिसंबन्ध्यङ्गत्वरूपविकृत्युपकारकतावच्छेदकधर्मवत्त्वान्न प्राकृताङ्गानां विकृत्यङ्गत्वानापत्तिः । न वा पुरोडाशकपालस्य तुषोपवापाङ्गत्वानापत्तिः । कपालत्वस्य पुरोडाशप्रयुक्तत्वावच्छेदकत्वेन पुरोडाशीयत्वस्य च तुषोपवापोपकारकतावच्छेदकत्वेन पुरोडाशप्रयुक्ततानवच्छेदकपुरोडाशीयत्वरूपतुषोपवापोपकारकतावच्छेदकरूपवत्त्वादिति विभाव्येत । तदा भेदनहोमस्य दर्शपूर्णमासाङ्गत्वानापत्तिः । भेदनरूपनिमित्तप्रयुक्तत्वावच्छेदकविजातीयहोमत्वस्यैव दर्शपूर्णमासोपकारकतावच्छेदकत्वात् । न च प्रकृतेऽन्यप्रयुक्तत्वम्, अन्यनिष्ठोद्देश्यतानिरूपककृतिविषयत्वम् । तत्र चोद्देश्यत्वमीप्सितत्वरूपं न त्वनुपादेयपञ्चकसाधारणम् [3], तथा च भेदनादिरूपे निमित्ते,

---

१ एवं यदन्यप्रयुक्तत्वस्यैव निवेशे विकृत्यन्यप्रकृतिप्रयुक्तानामङ्गानां विकृत्यङ्गत्वानापत्तिः । अतो यदप्रयुक्तत्वरूपं विशेषणमिति च बोध्यम् । २ (अ० ४ पा० १ अ० ११ सू० २६) इत्यत्रेति शेषः । ३ अनुपादेयपञ्चकसाधारणमुद्देश्यत्वं च, कृतिसमवायाघटितसंबन्धेन प्रकृतभावनान्वितत्वे सति प्रकृतविधिप्रयुक्त्यविषयत्वरूपं ज्ञेयम् । देशः कालो निमित्तं च फलं संस्कार्यमेव च । मीमांसानिपुणाः प्राहुरनुपादेयपञ्चकम् ॥ इत्यभियुक्तप्रसिद्ध्या देशादीनामनुपादेयत्वं विवक्षितम् । कर्तुस्तदेकत्वस्य चोपादेयत्वेनाभिमतस्य विधिप्रयुक्त्यविषयत्वेन तत्रातिव्याप्तिवारणाय कृतिसमवायाघटितसंबन्धेनेत्याद्यं विशेषणम् । यागादावतिव्याप्तिवारणाय प्रकृतविधिबोधितानुष्ठानाविषयत्वरूपं प्रकृतविधिप्रयुक्त्यविषयत्वमिति च बोध्यम् ।

उक्तविधोद्देश्यत्वाभावान्निरुक्तप्रयुक्ततावच्छेदकत्वं विजातीयहोमत्वेऽस्त्यस्मिति वाच्यम् । तथाऽपीन्द्रियादिप्रयुक्तत्वावच्छेदकदधित्वादिनैव होमोपकारकत्वाद्दध्नो होमाङ्गत्वानापत्तेः । होमप्रयुक्तत्वावच्छेदकदधित्वादिनेन्द्रियोपकारकत्वात्तदङ्गत्वानापत्तेश्च । किंच विजातीयस्वर्गप्रयुक्तत्वावच्छेदकदर्शपूर्णमासत्वादिनैव पापक्षयोपकारकत्वावच्छेदकदर्शपूर्णमासादीनां पापक्षयाङ्गत्वानापत्तिः । न हि स्वर्गप्रयुक्तत्वावच्छेदकवैजात्यातीरिक्तं पापक्षयोपकारकतावच्छेदकं वैजात्यमस्ति, तथात्वे स्वर्गार्थमनुष्ठितप्रयोगेण नित्यस्य प्रसङ्गासिद्धचनापत्तेः । अपि च दर्शपूर्णमासप्रयुक्तत्वावच्छेदकाज्यभागत्वेनैव गृहमेधीयोपकारकत्वादाज्यभागयोर्गृहमेधीयाङ्गत्वानापत्तिः न । हि विकृत्यन्तरेऽतिदेशप्रापिताङ्गानां प्रकृतिसंबन्धित्वेन विकृत्युपकारकत्ववदिहाऽऽज्यभागयोर्दर्शपूर्णमाससंबन्धित्वेन गृहमेधीयोपकारकत्वम् । येनान्यप्रयुक्तत्वानवच्छेदकदर्शपूर्णमाससंबन्ध्यङ्गत्वरूपगृहमेधीयोपकारकतावच्छेदकरूपवत्त्वादाज्यभागयोर्गृहमेधीयाङ्गत्वं भवेत् । 'आज्यभागौ यजति' इति गृहमेधीयप्रकरणस्थप्रत्यक्षवचनेनाऽऽज्यभागत्वेनैवाऽऽज्यभागविधानात् । वस्तुतो दर्शपूर्णमाससंबन्ध्यङ्गत्वमपि विकृत्यन्तरप्रयुक्तत्वावच्छेदकं भवत्येवेति सत्यपि तस्य गृहमेधीयोपकारकतावच्छेदकत्वे नाऽऽज्यभागयोस्तदङ्गत्वनिर्वाहः । अत एव प्राकृताङ्गानां विकृत्यङ्गत्वानापत्तिरपि पूर्वोक्ता तदवस्थैव । तत्तद्विकृतिभेदेन लक्षणभेदादेकविकृत्युपकारकतावच्छेदकदर्शपूर्णमाससंबन्ध्यङ्गत्वादेरपि विकृत्यन्तरप्रयुक्तत्वावच्छेदकत्वात् । नापि परोद्देश्यकृतिविषयत्वं परार्थत्वम् । कृत्यविषये कालादावव्याप्तेः । अत एव नोक्तकृतिसमवायित्वमपि । कर्तरि लक्षणसत्त्वेऽपि प्रयाजादावव्याप्तेः । अथ समवायसाध्यत्वकालिकान्यतमसंबन्धेन तादृशकृतिमत्त्वम् । प्रयाजादौ साध्यत्वसंबन्धेन तादृशकृतिमत्त्वसत्त्वान्नोक्ताव्याप्तिरिति चेन्न । जात्यादिरूपाङ्गेऽन्यतमसंबन्धेनाप्युक्तकृतेरभावादव्याप्तेः । येन केनापि संबन्धेनोक्तकृतिसंबन्धित्वोक्तौ निमित्तादावतिव्याप्तिरिति दुर्वचं परार्थत्वमिति चेत् । अत्र ब्रूमः । निरूपकत्वसंबन्धेन यन्निष्ठोद्देश्यताविशिष्टकृतिकारकत्वेन विहितं यत्तत्वं तदङ्गत्वम् । यथा दर्शपूर्णमासाभ्यामित्यत्र स्वर्गनिष्ठोद्देश्यताविशिष्टकृतिकारकत्वं दर्शपूर्णमासयोरतस्तयोस्तदङ्गत्वम् । एवं 'समिधो यजति' इत्यादिवाक्येषूपस्थितदर्शपूर्णमासयोरेवोद्देश्यत्वेनान्वयाद्दर्शपूर्णमासोद्देश्यताविशिष्टकृतिकारकत्वं प्रयाजादीनामतस्तेषां तदङ्गत्वम् । एवं द्रव्यगुणजात्यादीनां करणत्वेन, कर्तुश्च, कर्तृत्वेन कालादेरधिकरणत्वेनान्वयान्न क्वाप्यव्याप्तिः । अत्र यत्त्वतत्त्वादेरननुगमात्स्वर्गनिष्ठोद्देश्यताविशिष्टकृतिकारकत्वेन विहितत्वं स्वर्गाङ्गत्वमित्येवंरीत्योद्देश्यतावच्छेदकभेदेन लक्षणभेदो बोध्यः । न त्वङ्गत्वावच्छेदकभेदेन, तस्य लक्षणेऽप्रवेशात् । अत एव स्वर्गाङ्गसकलसा-

1 अन्यत्र उपकारलाभप्रयुक्तानुष्ठानं प्रसङ्गः ।

धारणमेकमङ्गत्वलक्षणं न त्वाग्नेयत्वाग्नीषोमीयत्वादिभेदेन लक्षणभेद इति ध्येयम् । प्रकारतया निरूपकत्वनिवेशे गौरवा[1]न्निरूपकत्वसंबन्धेनोक्तोद्देश्यताविशिष्टकृतिकारकत्वेन विहितत्वमित्येवं संबन्धविधया तन्निवेशः । तत्प्रयोजनं तु स्वाश्रयप्रयोजकत्वसंबन्धेन, अन्तत एकज्ञानविषयत्वादिसंबन्धेन च स्वर्गनिष्ठोद्देश्यताविशिष्टप्रयाजाद्यनुकूलकृतिकारकत्वस्य प्रयाजादौ सत्त्वादतिव्याप्तिवारणम् । अत्र शुद्धकृतिकारकत्व—उद्देश्यताविशिष्टकृतिकारकत्व—निष्ठोद्देश्यताविशिष्टकृतिकारकत्वानां प्रयाजादौ स्वर्गाद्यनङ्गप्रधाने च सत्त्वादतिव्याप्तिरतो विशिष्टमुपात्तम् । उद्देश्यतात्वेनोद्देश्यतानुपादाने तु निरूपकत्वसंबन्धेन स्वनिष्ठप्रयोज्यताविशिष्टप्रयाजाद्यनुकूलकृतिकारकत्वं प्रयाजादीनामतस्तदुपादानाम् । कृतीति स्वरूपकथनम् । तन्निवेशे प्रयोजनाभावात् । 'न च स्वर्गोद्देश्यको यागः' इत्यादिप्रतीत्या स्वर्गनिष्ठोद्देश्यतानिरूपकत्वस्य दर्शपूर्णमासादावपि सत्त्वात्तत्कारकत्वस्य च तज्जनकद्रव्यादावपि सत्त्वात्तत्रातिव्याप्तिवारणमेव तत्प्रयोजनमिति वाच्यम् । अस्मन्मते कारकत्वस्य भावनैकनिरूपितत्वेन धात्वर्थयागाद्यनिरूपितत्वात् । स्वर्गनिष्ठत्वं च दैशिककालिकविशेषणत्वातिरिक्तस्वरूपसंबन्धेन । इतरथा कालिकसंबन्धेन प्रयाजादिकरणककृत्युद्देश्यताया अपि स्वर्गवृत्तित्वेनातिव्याप्तिप्रसङ्गात् । वस्तुतः स्वर्गनिष्ठत्वं विषयत्वीयस्वरूपसंबन्धेन । इत्थं चोद्देश्यतात्वेनोद्देश्यत्वानुपादानेऽपि न क्षतिः । प्रयाजादिकरणककृतिप्रयोज्यताया विषयत्वीयस्वरूपसंबन्धेन स्वर्गनिष्ठत्वाभावात् । निमित्तादावतिव्याप्तिवारणाय संबन्धित्वं विहाय कारकत्वनिवेशः । निमित्तस्य वक्ष्यमाणरीत्याऽकारकत्वाददोषः । अत एव निमित्तत्वार्थकसप्तम्या उपपदविभक्तित्वमुक्तं तत्र तत्र । कृष्यादावतिव्याप्तिवारणाय विहितेति । न चोक्तकृतिकारकत्वस्य स्वर्गेऽपि सत्वात्तस्य स्वाङ्गत्वापत्तिरिति वाच्यम् । कर्मकारकभिन्नकारकत्वस्यैव लक्षणे निवेशात् । एतदर्थमेव सूत्रे भिन्नार्थकं परपदम् । न च सूत्रे 'देवदत्तोऽयं परोपकारकः' इत्यादिवदौत्सर्गिकस्वप्रतियोगिकत्वलाभादङ्गभेदस्यैव परपदादुपस्थितेः कथं कर्मकारकभेदरूपस्याङ्गिभेदस्य ततः प्रतीतिरिति वाच्यम् । समानसंवित्संवेद्यतयाऽङ्गिभेदस्य तस्मादुपस्थितिसंभवात् । न हि स्वभिन्नस्वर्गोद्देश्यककृतिकारकत्वरूपं लक्षणं संभवति । स्वत्वाननुगमेनाङ्गभेदेन लक्षणभेदप्रसङ्गादत उक्तभेद एव परपदतात्पर्यम् । ननु क्रियाजन्यफलशालित्वरूपकर्मत्वावच्छिन्नप्रतियोगिताकभेदनिवेशे गौरवात्कर्मत्वस्याखण्डोपाधिरूपत्वेऽपि च सामान्यतः कर्मत्वावच्छिन्नप्रतियोगिताकभेदस्य प्रयाजादिकरणककृतिकर्मदर्शपूर्णमासादावप्यभावेन स्वर्गोद्देश्यककृतिकर्मत्वावच्छिन्नप्रतियोगिताकभेदनिवेशे गौरवाल्लाघवेन स्वर्गत्वावच्छिन्नप्रतियोगिताकभेदस्यैव स्वर्गाङ्गत्वलक्षणे निवेशोऽस्तु । उद्देश्यभेदेन लक्षण-

---

१ गौरवादिति—निरूपकत्वस्य प्रकारतया प्रवेशे प्रकारतावच्छेदकसंबन्धस्यापि प्रवेशनीयतया गौरवम् । संबन्धविधया प्रवेशे तु संबन्धस्य संबन्धान्तरानपेक्षणाल्लाघवमिति बोध्यम् ।

भेदस्योक्तत्वादिति चेन्न । 'सर्वेभ्यो ज्योतिष्टोमः' इत्यादिवाक्योपात्तफलानां पश्वादीनां स्वर्गाङ्गत्वापत्तेः । स्वर्गत्वावच्छिन्नभिन्नत्वे सति, उक्तकृतिकारकत्वस्य पश्वादौ सत्त्वात् । न च 'सर्वेभ्यो ज्योतिष्टोमः' इति वाक्ये प्रवृत्तिप्रयोजककामनाविषयत्वस्योद्देश्यतावच्छेदकत्वात्पश्वादौ स्वर्गत्वावच्छिन्नोद्देश्यताककृतिकारकत्वस्याभावान्नोक्तदोष इति वाच्यम् । एतद्वाक्ये स्वर्गत्वस्योद्देश्यतानवच्छेदकत्वेऽपि 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति वाक्ये तस्योद्देश्यतावच्छेदकत्वेन तदवच्छिन्नोद्देश्यताककृतिकारकत्वस्य पश्वादौ सत्त्वात् । वाक्यभेदेन कृतिभेदे प्रमाणाभावात् । अत एव प्रश्वर्थमनुष्ठीयमानप्रयोगात्स्वर्गस्याप्युत्पत्तिर्योगसिद्ध्यधिकरणोक्ता संगच्छते । अतश्चाखण्डोपाधिरूपकर्मत्वस्वीकारे स्वर्गोद्देश्यककृतिकर्मत्वावच्छिन्नप्रतियोगिताकभेदघटितमेव लक्षणमङ्गीकार्यम् । वस्तुतस्तु स्वावच्छिन्नोद्देश्यतानिरूपककृतिनिरूपितोद्देश्यतावत्त्वसंबन्धेन स्वर्गत्ववद्भिन्नत्वं प्रकृतलक्षणे निवेश्यम् । स्वर्गपश्वादेश्च तेन संबन्धेन स्वर्गत्ववत्त्वान्नातिव्याप्तिः । न चैवमपि दर्शपूर्णमासादौ स्वर्गाद्यङ्गत्वानापत्तिः । 'व्रीहिभिर्यजेत' इत्यादिवाक्येषु स्वर्गोद्देश्यताकदर्शपूर्णमासाद्यनुकूलकृतावेव दर्शपूर्णमासयोरुद्देश्यत्वेन स्वावच्छिन्नोद्देश्यतानिरूपककृतिनिरूपितोद्देश्यत्वसंबन्धेन स्वर्गत्ववत्त्वस्य दर्शपूर्णमासादौ सत्त्वादिति वाच्यम् । स्वावच्छिन्नोद्देश्यतानिरूपकतावच्छेदकावच्छिन्ननिरूपितोद्देश्यताकत्वसंबन्धेन स्वर्गत्ववद्भिन्नत्वस्य विवक्षितत्वात् । दर्शपूर्णमासकरणककृतौ स्वर्गोद्देश्यकत्वमित्यादिप्रतीत्या हि दर्शपूर्णमासकरणककृतित्वे स्वर्गत्वावच्छिन्नोद्देश्यतानिरूपकतावच्छेदकत्वं सिध्यतीति तदवच्छिन्ननिरूपितोद्देश्यताकत्वसंबन्धेन स्वर्गत्ववत्त्वं स्वर्गे, यागे तद्भिन्नत्वमिति लक्षणसमन्वयः । न ह्येवं स्वर्गत्वावच्छिन्नोद्देश्यतानिरूपकतावच्छेदकत्वं व्रीहिकरणककृतित्वेऽस्ति, येन तदवच्छिन्ननिरूपितोद्देश्यताकत्वसंबन्धेन स्वर्गत्ववत्त्वं यागे संपाद्येत । व्रीहिकरणककृतौ स्वर्गोद्देश्यकत्वमिति प्रतीतेरभावात् । वृत्त्यनियामकसंबन्धस्यात्यन्ताभावप्रतियोगितानवच्छेदकत्वेऽपि भेदप्रतियोगितावच्छेदकतावच्छेदकत्वस्य सिद्धान्तसिद्धत्वाच्च न सिद्धान्तविरोधः । सूत्रमपीदृशभेदपरतयैव व्याख्येयमिति तत्त्वम् । नन्वेवं सोमादेरपि स्वर्गाद्यङ्गत्वं स्यात् । नवीनमते मत्वर्थलक्षणानङ्गीकारेण यागस्येव सोमस्यापि स्वर्गोद्देश्यककृतिकारकत्वात् । न च कारकत्वं वक्ष्यमाणरीत्या क्रियान्वितकर्तृत्वाद्यन्यतमान्वितत्वम् । तत्र क्रियान्वितत्वं कारकान्तराघटितसंबन्धेन प्रकृतलक्षणे निवेश्यम् । तथा च सोमकरणत्वस्य स्वनिरूपकयागकरणकत्वसंबन्धेनैव भावनान्वयादुक्तसंबन्धेन क्रियान्वितकर्तृत्वाद्यन्यतमान्वितत्वाभावान्न सोमे लक्षणातिप्रसङ्ग इति वाच्यम् । तथात्वे यागकरणत्वादेरपि स्वनिरूपकोद्देश्यक-

---

त्वादिरूपकर्मत्वघटितसंबन्धेनैव भावनान्वयेनासंभवापत्तेः । अथोक्तातिव्याप्तिवारणाय प्रकृतकृतिकरणताघटितसंबन्धेन क्रियान्वितत्वं प्रकृतलक्षणे निवेश्यम् । 'समिधो यजति' इत्यादौ प्रयाजादिकरणत्वस्यैव कृत्यन्तरकरणीभूतदर्शपूर्णमासादिरूपकार्यत्वघटितसंबन्धेनैव भावनान्वयाद्व्याप्तिरतः प्रकृतेति । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इतिवाक्यघटकाख्यातोपात्तकृतौ दर्शपूर्णमासयोः करणत्वेऽपि 'समिधो यजति' इतिवाक्यघटकाख्यातोपात्तसमिदाद्यनुकूलकृतौ तथारूपकारविशिष्टयोर्भावनान्वयमेवेति नाव्याप्तिः । 'सोमेन यजेत' इत्यादौ यागकरणत्वस्योद्देश्यस्वर्गादिघटितसंबन्धेन भावनान्वयेऽपि प्रकृतकृतिकरणयागाद्यघटितसंबन्धेनैव क्रियान्वयाभावाद्दोषः । सोमादेस्तु प्रकृतकृतिकरणयागादिघटितसंबन्धेनैव भावनान्वयान्नातिप्रसङ्ग इति चेन्न । 'दध्ना जुहोति' इत्यादावग्निहोत्रकरणककृतावेवाग्निहोत्रस्योद्देश्यत्वेन तत्र च स्वनिरूपकोद्देश्यकत्वरूपप्रकृतकृतिकरणघटितसंबन्धेनैव दधिकरणत्वस्यान्वयाद्दध्नो होमाङ्गत्वापत्तेः । कृतौ प्रकृतत्वानिरुक्तेश्च । न च प्रकृतवाक्यघटकाख्यातप्रतिपाद्यत्वं कृतौ प्रकृतत्वम् । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्ये तत्तद्व्यक्तित्वादिरूपप्रकृतत्वसंभवेऽपि दर्शपूर्णमासाङ्गप्रतिपादकसकलवाक्यसाधारणप्रकृतत्वानिरुक्तेः । यदि तु स्वर्गोद्देश्यकत्वादिकमेव कृतौ प्रकृतत्वमतो नायं दोष इति विभाव्यते । तथाऽपि दध्यादावव्याप्तिस्तदवस्थैव । अतः सोमादौ स्वर्गाद्यङ्गत्वप्रसङ्गो दुर्वार इति चेत् । सत्यम् । सोमादीनां स्वर्गाद्यङ्गत्वमिष्टमेव । न हि तत्स्वीकारे किंचिद्बाधकमस्ति । न चैवं तुल्ययुक्त्या 'यो दीक्षितो यदग्नीषोमीयं पशुमालभेत' इत्यत्र यागस्येव पश्वादेरपि ज्योतिष्टोमाङ्गत्वप्रसक्तौ तद्वदेव ज्योतिष्टोमविकृतावतिदेशापत्तिः । अग्नीषोमीयपश्वभावेनातिदेशस्येष्टत्वात्, अग्नीषोमीयाभाववत्या विकृतौ तु द्वारलोपादेव नातिदेशः । अग्नीषोमीयपश्वात्मकयागान्तरसत्त्वे तु तस्याग्नीषोमीयविकृतित्वादेवातिदेशः । सोमादेः समवायान्वयं तु यागद्वारेणैवाङ्गत्वेन निरसनीयमिति ध्येयम् । उद्देश्यत्वमप्येतत्स्वरूपम् । न त्वनुपादेयपदकसाधारणम् । तथात्वे यावज्जीवमित्यादौ धात्वर्थादेर्निमित्तत्वस्य दुर्वारत्वात् । अत एव यत्रानुपादेयपदकसाधारणोद्देश्यताया निवेशो, यथा परोद्देश्यककृतिव्याप्यत्वरूपप्रयोज्यत्वे । तत्र निमित्तप्रयोज्यत्वं नैमित्तिकस्येष्टमेव । अत एव द्वितीयाविभक्तेरङ्गत्वघटकोद्देश्यताबोधकत्वेनाङ्गत्वप्रमाणत्वव्यवहारः । तृतीयादेस्तु तद्घटककरणत्वादिविभक्त्यर्थबोधकत्वेन तत्त्वव्यवहारः । लिङ्गादीनां तु वक्ष्यमाणविधयान्यतरबोधकद्वितीयातृतीयादिरूपश्रुतिकल्पकत्वेन सः । एतेन द्वितीयायाः भावनान्वय्युद्देश्यत्वमात्रबोधकत्वेनाङ्गत्वप्रमाणत्वेऽपि नाङ्गत्वप्रमाणत्वमिति निर-

---

१ (अ० ३ पा० ३ अ० ७) अधिकरणेनेति शेषः ।

त्वम् । आख्यातेऽप्युद्देश्यतया निविष्टत्वेन तदेकदेशबोधकत्वेनैव तत्प्रमाणत्वोपपत्तेः । इतरथा तृतीयादेरपि समुदिताङ्गत्वार्थकत्वाभावेन तत्प्रमाणत्वानापत्तेः । एवं चैतदेकदेशप्रमाणत्वेऽपि तत्प्रमाजनकत्वव्यवहारः । यथा परमते द्वितीयायाः फलमात्रप्रमापकत्वेऽपि तद्घटितकर्मत्वप्रमाजनकत्वव्यवहार इति ।

ननु किं नाम कृतिकारकत्वम् । न तावत्कृतिहेतुत्वम् । धात्वर्थादिरूपकरणकारकेऽव्याप्तेः । न हि कृतिसाध्ये यागादौ कृतिहेतुत्वं संभवति । पूर्ववृत्तित्वाभावात् । दध्यादिगुणरूपकारके पूर्ववृत्तित्वसत्त्वेऽपि रागस्यादिवत्तथासिद्धत्वेनान्यथासिद्धत्वात्तथात्वाच्च । अत एव भावनाकरणत्वं भावनाभाव्यनिर्वर्तकत्वरूपं पारिभाषिकमिति सांप्रदायिकाः । निमित्तादौ कृतिहेतुत्वसत्त्वेनातिव्याप्त्यापत्तेश्च । नापि कृत्यान्वितत्वम् । धात्वर्थे यागादौ करणत्वादिसंबन्धेन भावनान्वयस्वीकारेण लक्षणोपपत्तावपि तद्भिन्नकारकाणां विभक्त्यर्थे करणत्वादावेवान्वयेन तत्राव्याप्तेः । करणत्वादीनामपि कृत्यन्वितत्वेनाङ्गत्वापत्तेश्च । न हि सोमो यागाङ्गमितिवत्सोमकरणत्वं यागाङ्गमिति कश्चित्प्रत्येति । गुणफलसंबन्धविधावेव परं गुणकरणत्वं फलाङ्गमित्युक्तं सांप्रदायिकैः । वस्तुतस्तु तत्रापि गुणस्यैव फलाङ्गत्वम्, इतरवैलक्षण्ये प्रमाणाभावात् । भवन्मते दध्यादेर्होमार्थत्वात्तत्करणत्वस्य चेन्द्रियार्थत्वात् 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इति सूत्र एकस्यैवोभयार्थत्वोक्तिविरोधप्रसङ्गाच्च । न च 'दध्ना जुहोति' इत्यत्रापि दधिकरणत्वस्यैव होमोद्देशेन विधानान्नानुपपत्तिरिति वाच्यम् । तथात्वे दधिकरणत्वस्येन्द्रियकामवाक्य इव स्वनिरूपकाश्रयसापेक्षत्वात्तस्य प्रमाणान्तरेणानुपस्थितेरेतद्वाक्यान्निराकाङ्क्षप्रतिपत्त्यनापत्तेः । इन्द्रियकामवाक्ये तु प्रकरणेन स्वनिरूपकीभूतहोमरूपाश्रयसंभवान्निराकाङ्क्षप्रतिपत्तिरिति विशेषः । किं च दधिकरणत्वस्य होमोद्देशेन विधौ तस्यादृष्टविधया होमोपकारकत्वेऽपि दृष्टविधया तदजनकत्वाद्धोमसिद्ध्यर्थमन्यद्रव्याक्षेपापत्तिः । एतद्विधेरपूर्वविधित्वापत्तिश्चेति ध्येयम् । नापि कृत्यन्विताभिन्नत्वम् । धात्वर्थस्य करणत्वसंबन्धेन कृत्यन्वितत्वात्तत्राव्याप्तेः । यदि तु यागकरणिका भावनेत्यादिप्रतीतेः प्रकारतया करणत्वावगाहित्वात्तृतीयान्तनामपदसामानाधिकरण्याच्च धातुलक्षितकरणत्वस्यैव भावनान्वयः । धात्वर्थस्य तु करणत्व एवान्वयान्नोक्ताव्याप्तिरिति विभाव्यते । तथाऽपि लिङ्गसंख्याभिन्नसुबर्थमात्रस्यैव भावनान्वयनियमेन 'भिन्ने जुहोति' इत्यादौ सप्तम्यर्थनिमित्तत्वादेरपि तदन्वयात्तदन्विते निमित्तादावतिव्याप्ति

---

१ नैयायिकमते, इत्यर्थः । २ (अ० ४ पा० ३ सू० ५)। ३ नियमेनेति—निपातोपसर्गप्रातिपदिकातिरिक्तशब्दगम्यो यः सुबुपात्तलिङ्गसंख्याव्यतिरिक्तोऽर्थः, तत्प्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति लिङ्गानन्वयिभावनावाचिपदजन्योपस्थितिर्विशेष्यतासंबन्धेन कारणम्, इत्येवं प्रकारतानियामकत्वमस्ति मीमांसकैरेवं वादरङ्गीकृतामनुरुध्येति शेषः ।

रिति चेन्न । कृत्यन्वितविभक्त्यर्थान्वितत्वस्य कृतिकारकत्वरूपत्वात् । विभक्त्यर्थत्वं च विभक्तिशक्यत्वमतो न निमित्तत्वादिकमादाय निमित्तादावतिव्याप्तिः । सप्तम्या अधिकरणत्वार्थत्वेन निमित्तत्वे शक्त्यभावात् । न च विभक्तिशक्यत्वं विभक्तिनिरूपितशक्तिविषयत्वम् । तथा च निमित्तत्वस्य सप्तमीनिरूपितशक्तिविषयत्वाभावेऽपि षष्ठ्याः ‘षष्ठी शेषे’[1] इत्यनुशासनात्संबन्धसामान्यार्थकत्वेन तदन्तर्गतनिमित्तत्वेऽपि षष्ठीनिरूपितशक्तिविषयत्वावश्यंभावात्तदादाय निमित्तादावतिव्याप्तिस्तदवस्थैवेति वाच्यम् । विभक्तिनिरूपितसंबन्धत्वानवच्छिन्नशक्तिविषयत्वस्य विवक्षितत्वात् । षष्ठीशक्यतावच्छेदकं हि संबन्धत्वमेव । अतो न दोषः । अत एव ‘सप्तदश वैश्यस्य’ इत्यादौ षष्ठीतो निमित्तत्वत्वेन निमित्तत्वप्रतीतिर्लक्षणयैवेति बोध्यम् । ‘स्वर्गकामो यजेत’ इत्यादौ करणत्वस्य धातुलक्ष्यत्वेऽपि वस्तुतो विभक्तिशक्यत्वानपायान्न दोषः । एवं ‘सक्तूञ्जुहोति’ इत्यादावपि विनियोगभङ्गाङ्गीकारेण द्वितीयायाः करणत्वलक्षणायामपि वस्तुतस्तस्य विभक्तिशक्यत्वानपायान्न सक्तूनां होमाङ्गत्वविरोधः । अनयैव रीत्या ‘ सोमारौद्रं चरुं निर्वपेत्कृष्णानां व्रीहीणाम् ’ इत्यादौ करणत्वस्य षष्ठीलक्ष्यत्वेऽपि व्रीहीणां यागाङ्गत्वमुपपादनीयम् । एतेन[2] ‘ उत्तरेऽहन्द्विरात्रस्य गृह्यते ’ इत्यादौ लिङ्गसंख्याव्यतिरिक्तसुबर्थमात्रस्य भावनान्वयनियमेन षष्ठ्यर्थसंबन्धस्यापि भावनान्वयापत्तेरतिव्याप्तिः । न हि तत्र द्विरात्रीयोत्तराहोद्देशेन षोडशिग्रहणं विधीयते । विशिष्टोद्देशे वाक्यभेदात् । न च षष्ठीस्थले परस्परान्वयस्य व्युत्पन्नत्वादवाक्यभेदः । तथात्वेऽप्युभयं हविरितिवदुत्तरेऽहन्नित्यत्राहन्युत्तरत्ववैशिष्ट्यायोगेन वाक्यभेदात् । वस्तुतो लिङ्गसंख्याभिन्नसुबर्थमात्रस्यैव लाघवेन भावनान्वयात्षष्ठ्यर्थस्यापि भावनाव्यतिरेकेणान्वयोऽव्युत्पन्न एव । अतो द्विरात्रसंबन्धिनी षोडशिग्रहकरणिका भावनोत्तरपदार्थभागोद्देशेन विधीयते । उत्तरभागस्य च प्रतिसंबन्ध्यपेक्षायामरुणैकहायनीन्यायेन पार्ष्ठिकबोधे द्विरात्ररूपप्रतिसंबन्धिलाभः । द्विरात्रसंबन्ध्युत्तरभागस्य चाहोरूपत्वात् ‘ऐन्द्रवायवाग्रं प्रथममहः’ इतिवदहन्नित्यनुवाद इत्येव बोध्यम् । तथा च क्रियान्वितविभक्त्यर्थान्वितत्वेन द्विरात्रेऽतिव्याप्तिरित्यपास्तम् । विभक्तिनिरूपितसंबन्धत्वानवच्छिन्नशक्तिविषयत्वनिवेशेनादोषात् । वस्तुतस्तु लाघवात्षष्ठ्याः कर्मत्वलक्षणामङ्गीकृत्य द्विरात्रोद्देशेनैव षोडशिग्रहणविधिः । द्विरात्रीयोत्तराह एव चातिरात्रसंस्थाकत्वेन तत्रैव विकल्पितषोडशिग्रहणप्राप्तेर्नियमविधिलाघवानुरोधेनास्य विधेरेतद्विषयत्वात्, उत्तरेऽहन्नित्यनुवादः । अत एव द्विरात्रसंबन्ध्युत्तरभागोद्देशेनैवं षोडशिग्रहणविधिः, द्विरात्रसंबन्ध्युत्तरभागस्य चाहोरूपत्वादहन्नित्यनुवाद इत्यपि, उक्तरीत्यैव लघुभूतोद्देश्यतावच्छेदके संभवति गुरुभूतोद्देश्यतावच्छेदकायोगादयुक्तम् ।

---

१ पा० सू० (२-३-५०) । २ (अ० ३ पा० १ अ० ६) । अग्नत्येनेति शेषः ।

न चोक्तप्रकारे द्विरात्रत्वस्योद्देश्यतावच्छेदकत्वादौत्तरकालिकनियमविधिलाघवानुरोधेनास्य विधेरुत्तराहमात्रविषयतया संकोचरूपबाधकल्पनमयुक्तमिति वाच्यम् । द्विरात्रस्वरूप आनर्थक्ये प्रसक्ते दीक्षणीयाद्यङ्गनियमन्यायेनावान्तरापूर्वसाधनत्वलक्षणाया द्विरात्रजन्यैकावान्तरापूर्वाभावेनासंभवेऽप्युत्तरपदसहकृतापूर्वाव्यभिचाररूपतात्पर्यग्राहकानुरोधेनोत्तराहजन्यविजातीयापूर्वद्वारकपरमापूर्वसाधनत्वावच्छिन्नस्यैव लक्षणयोद्देश्यत्वाद्द्विरात्रत्वस्योद्देश्यतावच्छेदकत्वेऽप्यनुपपत्त्यभावात् । आवश्यकी चेयमानर्थक्यभियाऽपूर्वसाधनत्वावच्छिन्नलक्षणा, द्विरात्रसंबन्ध्युत्तराहोद्देशेन षोडशिग्रहणविधिमभ्युपगच्छतां प्राचामपि । परं तु द्विरात्रसंबन्ध्युत्तराहरूपवाक्यार्थसंबन्धेनोक्तपरमापूर्वसाधनत्वलक्षणा, अस्म मते तु द्विरात्रमात्रसंबन्धेनोक्तपरमापूर्वसाधनत्वलक्षणेति विशेषः । किं च त्वन्मत उत्तरेऽहनीति सप्तम्या अधिकरणत्ववाचिन्याः स्वशक्यतावच्छेदकानवच्छिन्नकर्मणि लक्षणा । अस्मन्मते तु संबन्धसामान्यवाचिन्याः षष्ठ्याः स्वशक्यतावच्छेदकावच्छिन्ने लक्षणेत्यपि बोध्यम् । न चैवमपि चतुर्थ्याः संप्रदानत्वशक्तत्वेन देवतात्वस्य विभक्त्यर्थत्वायोगात् 'यदग्नये च प्रजापतये च सायं जुहोति' इत्यादौ देवताया होमाङ्गत्वानापत्तिरिति वाच्यम् । त्यज्यमानद्रव्योद्देश्यत्वे सति प्रतिग्रहीतृत्वरूपसंप्रदानत्वस्य चतुर्थ्यर्थत्वेन तद्घटकत्यज्यमानद्रव्योद्देश्यत्वरूपदेवतात्वस्यापि तदर्थत्वानपायात् । यदि च विप्राय गां ददातीत्यादौ सम्प्रदानीभूतविप्रादौ देवतात्वव्यवहाराभावेन तत्र प्रतिग्रहीतृत्वाभावोऽप्यधिको निवेश्यते, अग्नीषोमयोर्व्यासज्यवृत्तिदेवतात्वानुरोधेन वाऽखण्डोपाधिरूपमेव देवतात्वमुच्यते तदाऽस्तु कृत्यन्वितकर्तृत्वाद्यन्यतमान्वितत्वमेव कृतिकारकत्वम् । देवतात्वस्याप्यन्यतमान्तर्गतत्वान्न दोषः । निमित्तत्वादीनां तु तदन्तर्गतत्वान्न निमित्तादावतिव्याप्तिः । एवं च पूर्वोक्तकर्मकारकभेदस्य लक्षणेऽनिवेशोऽपि न क्षतिः । कर्मत्वस्य कर्तृत्वाद्यन्यतमान्तर्गतत्वेन तदन्विते स्वर्गादावतिव्याप्त्यभावात् । एवंविधान्यतमत्वबोधनार्थमेव सूत्रस्थं परपदमिति ध्येयम् । विहितत्वं च न प्रवर्तनारूपविधिजन्यत्वम् प्रवर्तनाज्ञानस्यैवेष्टसाधनत्वज्ञानद्वारा प्रवृत्तिप्रयोजकत्वेनप्रवृत्तावेव तदभावे तत्कारकेषु सुतरां तस्याभावात् । अत एव न प्रवर्तनाज्ञानजन्यत्वमपि । नापि साक्षात्परम्परासाधारणविधिप्रयोज्यत्वम् । जात्यादिरूपाङ्गेऽव्याप्तेः । तस्य नित्यत्वेन विधिप्रयोज्यत्वाभावात् । अनित्यानामपि सोमादीनां सिद्धरूपत्वेन विधिप्रयोज्यत्वाभावाच्च । अतो विध्यन्वयित्वं विहितत्वम् । तच्च स्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतावच्छेदकत्वसंबन्धेन विधिविशिष्टत्वम् । अस्ति चेदं यागादौ प्रवर्तनानिष्ठप्रकारतानिरूपितार्थभावनानिष्ठविशेष्यतावच्छेदकत्वं करणत्वादौ, तदवच्छेदकत्वस्य तत्र सत्त्वात् । नन्विदं धातु-

---

१ (अ० ९ पा० १ अ० २) अत्रत्यंनेति शेषः ।

[illegible]भ्यां [illegible]तेति मते संभवति । करणत्वादिसंसर्गेण धात्वर्थस्यैव भावनायां [illegible]तेति मते [illegible]विशेष्यतावच्छेदकत्वस्यैव यागादौ सत्त्वात्स्वनि-[illegible]निरूपितविशेष्यतावच्छेदकतावच्छेदकत्वसंबन्धेन विधिविशिष्टत्वाभावान्नोक्त-विहितत्व[illegible] इति [illegible] । स्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकत्व—तदवच्छे-दकत्वान्यतरसंबन्धेन विधिविशिष्टत्वस्य विवक्षितत्वात् । न चैतस्य सुबर्थकरणत्वादि-[illegible]स्यातिव्याप्तिरिति वाच्यम् । तेषु निरुक्तविहितत्वसत्त्वेऽपि [illegible]भावेन नोक्तदोषात् । यद्यपि धात्वर्थस्यैव करणत्वादिसंसर्गेण भावनायामन्वय इति मते यागादावपि नोक्तकृतिकारकत्वं संभवति । तथा-ऽपि कर्तृत्वाद्यन्यतमसंबन्धेन कृत्यन्वितत्वकृत्यन्वितकर्तृत्वाद्यन्यतमान्वितत्वान्यतरव-त्त्वमेव तन्मते कृतिकारकत्वम् । धात्वर्थे, उक्तसंबन्धेन कृत्यन्वितत्वसत्त्वात्सो-[illegible] नोक्तदोषः । सुबर्थे निरूपकत्वादिसंबन्धे-न कृत्यन्वितत्वसत्त्वादतिव्याप्तिवारणाय कर्तृत्वाद्यन्यतमसंबन्धनिवेशः । अत एव ‘ [illegible] जुहुयात् ’ इत्यादावाश्रयत्वादिसंबन्धेन होमस्य कृत्यन्वितत्वेऽपि नेन्द्रिय[illegible]ः । वस्तुतः पूर्वोक्तरीत्या धातुलक्षितकरणत्वादेरेव प्रकारतया भावनान्वयानुभूतं कृत्यन्वितकर्तृत्वाद्यन्यतमान्वितत्वं कृतिकारकत्वं, स्वनिष्ठप्रकारता-निरूपितविशेष्यतावच्छेदकतावच्छेदकत्वसंबन्धेन विधिविशिष्टत्व विहितत्वमित्येव [illegible]ः । विहितत्वं चेदं निर्विषयकभावनायाः प्रयोज्यतासंबन्धेन प्रवर्तनान्वयायोग्य-त्वात्[illegible]तः कृतौ सकलकारकान्वयः । ततः सकलकारकविशिष्टायां भावनायां प्रयो-ज्यत्वसंबन्धेन प्रवर्तनान्वय इत्येकविशिष्टेऽपरवैशिष्ट्यमितिरीत्या शाब्दबोधमभिप्रेत्यो-क्तम् । अत एव [illegible] सप्तमे ‘ [illegible]संवरेषु ’ इति सूत्रे विकृतावर्थवादातिदेशोऽपि [illegible]नादौ नाऽर्थवादिकफलकल्पनेति प्रतिपादयितुमुक्तम्, विधिर्हि त्र्यंशपरिपूर्णा-[illegible]भावनां [illegible]पुरुषं प्रवर्तयितुं प्रवर्तमानोऽपेक्षावशात्प्राशस्त्यज्ञान-[illegible]ति[illegible] संनिधापयति । विधेयभावना तु ततः प्रागेव [illegible]ति । तस्यां [illegible]तिदेशेन नाऽर्थवादस्यासंनिधानात्तदुपात्तसंनि-[illegible] गृह्णातीति न स्वर्गस्याप्यबाध इति । यदा तु योग्यताज्ञानं विनाऽप्याकाङ्क्षायोग्यतानि[illegible]मात्रेण शाब्दबोधस्याऽऽनुभाविकत्वादेकत्र द्वयमिति रीत्या [illegible] [illegible]ः । समानाभिधानाविरूपप्रत्यासत्त्यनुग्रहेण वा प्रथमं [illegible] [illegible]कारकान्वयः । भाव्यभूतार्थभावनायां कारकान्वया-त्पूर्वं [illegible]विशेषाकाङ्क्षाकलुषितत्वेन प्रवर्तनाया विस्पष्टमितिकर्तव्यताकाङ्क्षानुत्थाना-

१ (अ० ८ पा० १ अ० ३ सू० १७)। २ (अ० ४ पा० ३ अ० ५) अत्रत्य इति शेषः ।

न्यार्थवादातिदेश इति न विश्वजित्यार्थवादिकफलस्यमानतिरिच्यते । तदा पूर्वोक्त-निर्वचनानुपपत्तेर्लाघवाच्च प्रवर्तनारूपविधिविषयत्वमेव विहितत्वम् । अस्ति च विशिष्ट-भावनाया प्रवर्तनाविषयत्वात्तद्विशेषणेष्वपि प्रवर्तनाविषयत्वमिति बोध्यम् । अथैवमपि 'नानृतं वदेत्' इत्यादिनिषेधेषु प्रकृतलक्षणाव्याप्तिः । तथा हि । निवर्तनारूपे प्रवृ-त्त्यभावरूपे वा निषेधे नोक्तलक्षणं संभवति, कृतिकारकत्वाभावात् । निवर्तना हि स्वप्रयोज्याभावप्रतियोगित्वसंबन्धेनाऽऽख्यातार्थकृतावेवान्वेति । एवं प्रवृत्त्यभावोऽपि प्रतियोगित्वसंबन्धेनेति न तयोरुक्तविधं कृतिकारकत्वम् । एवं स्वनिष्ठप्रकारतानिरूपि-तविशेष्यतावच्छेदकतावच्छेदकत्वसंबन्धेन प्रवर्तनाविशिष्टत्वरूपं प्रवर्तनाविषयत्वरूपं वा विहितत्वं तयोर्न संभवति । निषेधेषु निवर्तनाया एवोक्तसंबन्धेनार्थभावनायामेवान्व-यात् । यदि तूक्तसंबन्धेन प्रवर्तनानिवर्तनान्यतरविशिष्टत्वं तदन्यतरविषयत्वमेव वा विहित-त्वमित्युच्येत, ततो 'न कलञ्जं भक्षयेत्' इत्यादौ भक्षणादीनां कलञ्जाद्यङ्गत्वापत्तिः । निवर्तनारूपे निषेधे तस्याप्यभावाच्च । न हि स्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छे-दकतावच्छेदकत्वं स्वविषयत्वं वा स्वस्मिन्संभवति । न च निषेधानामलक्ष्यत्वम् । तथात्वे-कर्त्रधिकरणादौ तेषां क्रत्वर्थत्वादिनिरूपणानापत्तेरिति चेत् । सत्यम् । तेष्वङ्गत्वव्य-वहारस्य गौणत्वात् । अत एव 'नानृतं वदेत्' इत्यादौ निषेधो यदि निवर्तना तर्हि तस्या क्रतुवैगुण्यजनकक्रियाविषयनिवर्तनात्वं क्रत्वर्थत्वम् । निवर्तनात्वानिवेशादनृतवद-नादिज्ञानादौ नातिव्याप्तिः । यदि प्रवृत्त्यभावस्तदा तस्मिन्नुक्तक्रियाप्रतियोगिकत्वम् । न च 'नातिरात्रे षोडशिनं गृह्णाति' इत्यादिविध्युत्तरनिषेधे निषेध्यस्य क्रतुवैगु-ण्याजनकत्वादव्याप्तिः । क्रतुवैगुण्यक्रतुसाद्गुण्याद्यन्यतरजनकत्वस्य विवक्षितत्वात् । न च प्रवृत्त्यभावनिषेधपक्षे प्रयाजक्रियाभावादावतिव्याप्तिः । उक्तक्रियाप्रतियोगिकत्वे सति वै-दिकनिवर्तनाविषयत्वस्य विवक्षितत्वात् । एवं 'न कलञ्जं भक्षयेत्' इत्यादौ पुरुष-निष्ठप्रत्यवायजनकक्रियाविषयत्वम्, उक्तक्रियाप्रतियोगिकत्वं वा पुरुषार्थत्वम् । अत एव गौणमुख्यसाधारण्येनाङ्गत्वं तृतीयाध्यायार्थ इति न कर्त्रधिकरणादावध्यायासं-गतिरिति ध्येयम् । एवं 'फलं च पुरुषार्थत्वात्' इत्यत्रोक्तं फलस्य पुरुषार्थत्वं भाक्तमेव । एवमेव च यागादेर्भावनां प्रति, प्रातिपदिकार्थस्य च कारकं प्रति, लिङ्गसंख्यादेश्च प्रातिपदिकार्थं प्रति, करणत्वादेश्च भावनां प्रति, तां प्रत्येव च शब्दभावनादेरङ्गत्वव्य-वहारो गौणो विशेषणत्वमात्रविवक्षया द्रष्टव्यः । उक्तविधाङ्गत्वोक्त्यैव चाङ्गत्वघटकी-भूतोद्देश्यनाशालित्वरूपमाङ्गित्वमर्थासिद्धम् । अतः सूत्रकृता न पृथगुपन्यस्तम् । न वा तृती-याध्यायार्थः । अत्र चाङ्गत्वघटकीभूतकारकत्वनिविष्टकर्तृत्वाद्यन्यतमनिरूपितत्वमङ्गित्वम् ।

---

१ (अ० ३ पा० ४ अ० ४) । २ (अ० ३ पा० १ अ० ३ सू० ५) ।

अस्ति च स्वर्गादौ यागादिवृत्तिकरणत्वादिनिरूपकत्वम् । अतस्तस्य यागाद्यङ्गित्वमिति न भ्रमितव्यम् । तथात्वे स्वर्गादिवृत्तिकर्मत्वादिनिरूपकत्वेन भावनायाः स्वर्गाङ्गित्वापत्तेः । उक्तापेक्षया ह्यस्य गुरुत्वाच्च । अत एवाङ्गत्वघटकीभूतभेदप्रतियोगित्वमङ्गित्वम् । स्वर्गादिरूपकर्मकारकादिभेदस्य पूर्वं निवेशितत्वाच्च स्वर्गादौ लक्षणसमन्वय इत्यपि न । तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वरूपभेदत्वनिवेशेन गुरुत्वात् । कर्तृत्वाद्यन्यतमत्वघटकभेदप्रतियोगित्वमादायातिव्याप्त्यापत्तेश्चेति संक्षेपः ।

इदं चाङ्गत्वं प्राचीनोक्तपरोद्देशप्रवृत्तकृतिव्याप्यत्वमेव परिष्कृत्योक्तम् । वस्तुतस्तु लाघवात्, यन्निष्ठोद्देश्यतानिरूपितविधेयताशालि यत्तत्तदङ्गम् । सर्वेषामेवाङ्गानां श्रुतेरार्थिकैर्वा विधिभिः स्वस्वप्रधानोद्देशेन विधानात्सर्वत्र लक्षणसमन्वयः । उद्देश्यताविधेयते च स्वरूपसंबन्धरूपे न तु साध्यत्वानुष्ठेयत्वात्मिके । तेनोक्तविधेयत्वाभाववति कालादावुक्तोद्देश्यत्वाभाववन्नरकाभावोद्देशेन विधीयमानविवाहार्थानृतवदनादौ च नाव्याप्तिः । न वा तयोर्निरूप्यनिरूपकभावे मानाभावेन लक्षणासंभवः । एवंविधाङ्गत्वस्य तृतीयाध्यायार्थत्वादेव च स्वयंप्रार्थितवृत्त्युद्देश्यतानिरूपितविधेयत्व—स्वयंप्रार्थितभिन्नवृत्त्युद्देश्यतानिरूपितविधेयत्वरूपयोः क्रत्वर्थत्वपुरुषार्थत्वयोरङ्गत्वविशेषत्वेन मूले तृतीयसिद्धत्वोक्तिः । पूर्वोक्ताङ्गत्वस्य तृतीयाध्यायार्थत्वे तु विधेयत्वरूपयोः क्रत्वर्थत्वपुरुषार्थत्वयोर्निरुक्तकारकत्वादिरूपाङ्गत्वविशेषत्वाभावान्न तृतीयासिद्धत्वमिति चतुर्थे निरूप्यत्वापत्तिः । न च निरुक्तकारकत्वादिरूपाङ्गत्वव्यापकत्वादेव क्रत्वर्थत्वपुरुषार्थत्वान्यतरस्य तृतीयासिद्धत्वमिति वाच्यम् । तथात्व आमिक्षाप्रयोज्यत्वस्याऽऽमिक्षाङ्गत्वव्यापकत्वात्तृतीयासिद्धत्वेन चतुर्थे प्रतिपाद्यत्वानापत्तेः । यदि निरुक्तोद्देश्यतानिरूपककृतिकारकत्वरूपं क्रत्वर्थत्वं पुरुषार्थत्वं च निरुच्य पूर्वोक्ताङ्गत्वविशेषत्वं तयोः समर्थ्यते, तदा ' अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति ' इत्यादौ स्वर्गादिनिष्ठोद्देश्यतानिरूपककृतिकारकत्वेन पिण्डपितृयज्ञादेरिव कालादेरपि पुरुषार्थत्वापत्तिः । अस्मन्मते तु कालादौ स्वर्गादिनिष्ठोद्देश्यतानिरूपितविधेयतायाः स्वरूपसंबन्धरूपाया अभावेन नोक्तापत्तिः । कारकत्वादिघटनायां गौरवं तु स्फुटमेव । अतोऽस्मदुक्ताङ्गत्वस्वीकारेणैव निरुक्तविधेयतारूपयोः क्रत्वर्थत्वपुरुषार्थत्वयोस्तद्विशेषत्वं संगच्छते । सूत्रस्थपरार्थत्वस्याप्ययमेव निष्कर्षः । न चैवं श्रुत्यादीनामङ्गत्वैकदेशबोधकत्वस्याप्यभावादङ्गत्वप्रमाणत्वानापत्तिः । स्वरूपसंबन्धरूपोद्देश्यताया एव लक्षणघटकत्वाद्द्वितीयाया अपि तदभावादिति वाच्यम् । अङ्गत्वघटकीभूतविधेयतोद्देश्यतान्यतरप्रयोजककर्मत्वकरणत्वाद्यन्यतमबोधकत्वेनाङ्गत्वप्रमाणत्वोपपत्तेः । कर्मणो ह्युद्देश्यत्वेनैवान्वयात्कर्मत्वमुद्देश्यत्वप्रयोजकम् । करणादीनां तु विधेयत्वेनान्वयात्करणत्वादिकं विधेयत्वप्रयोजकम् । तत्र श्रुतेर्निरुक्तान्यतमवाचकत्वेनैव निरुक्ताङ्गत्वप्रमाणत्वम् । लिङ्गादीनां तु साक्षात्परम्परया वा निरुक्तान्यतमवाचकश्रुतिकल्पकत्वेन तत्त्वमिति

विशेषः । निरुक्ताङ्गत्वोक्त्यैव चाङ्गत्वघटकीभूतोद्देश्यताशालित्वरूपमङ्गित्वमर्थसिद्धमेव । अतो न सूत्रे तदुक्तं न वाऽध्यायार्थः । न च विनिगमनाविरहः । यन्निष्ठविधेयतानिरूपितोद्देश्यताशालि यत्तत्तदङ्गि । निरुक्ताङ्गत्वघटकविधेयताशालित्वरूपमङ्गत्वमर्थसिद्धमित्यस्यापि सुवचत्वादिति वाच्यम् । यत्त्वतत्त्वादेरननुगमाद्विशिष्यैव लक्षणानां निर्वक्तव्यत्वात्प्रधानापेक्षयाऽङ्गानां बहुत्वात्तत्तद्घटिताङ्गित्वोक्तौ गौरवापत्तेरेव विनिगमकत्वादिति नवीनः पन्थाः ।

केचित्तु परोद्देशप्रवृत्तकृतिव्याप्यत्वमङ्गत्वमिति प्राचीनोक्तलक्षणमेवं व्याकुर्वन्ति । अत्र परोद्देशप्रवृत्तत्वं परोद्देशेनोपपादितत्वम् । तच्च कृतिव्याप्यत्वस्य विशेषणम् । व्याप्यत्वशब्देन चोद्देश्यत्वानुद्देश्यत्वसाधारणविषयत्वमुच्यते । ततश्च विध्यन्वयिन्यां कृतौ यद्विषयत्वानुपपत्तिर्यदुद्देश्यकत्वेन परिह्रियते तत्तस्याङ्गं तदर्थं चेत्युक्तं भवति । प्रसिद्धं ह्येतत्प्रेक्षावत्कृतावपुरुषार्थविषयत्वं तत्साध्यपुरुषोद्देश्यकत्वमन्तरेणानुपपन्नमिति । भवति च वपनादिविषयत्वानुपपत्तिपरिहारः पुरुषोद्देश्यकत्वेन, तदुद्देश्यकत्वानुपपत्तिपरिहारश्च क्रत्वपूर्वोद्देश्यकत्वेनेति वपनपुरुषयोः पुरुषक्रत्वङ्गत्वसिद्धिः । इत्थं यागस्वर्गयोः स्वर्गपुरुषौ प्रति शेषत्वमूह्यम् । भवति हि यागः किमर्थं कर्तव्य इत्याक्षेपे स्वर्गायेति समाधिः । स्वर्गः किमर्थमुत्पाद्य इत्याक्षेपे पुरुषार्थमिति समाधिरिति । अत्र त्विदं विभावनीयम् । कथमेतल्लक्षणं कालादिषु योजनीयम् । न हि विध्यन्वयिकृतिवृत्तिकालादिविषयकत्वं प्रसिद्धमस्ति । येन तदनुपपत्तिर्यागाद्युद्देश्यकत्वेन परिह्रियेत ।

त्रिविधा हि कृतिविषयता । साध्यता, उपादानता, उद्देश्यता चेति । तद्यथा स्वर्गमुद्दिश्य यागं साधयितुं हविरादिकमुपादत्ते, इत्यादिप्रतीत्या यागे साध्यताख्यविषयता, स्वर्गे उद्देश्यताख्या, हविरादावुपादानताख्या । न च कालादावन्यतमविषयताऽप्यस्ति । तत्र निरुक्तप्रतीतेरभावात् । अनुपादेयपञ्चकसाधारणोद्देश्यता तु न कृतिविषयता । अन्यथा निमित्तस्यापि कृतिविषयत्वापत्तेः । अतः कालादावव्याप्तिः । अपि च भवन्मते तृतीयादेरङ्गत्वप्रमाणत्वानापत्तिः । अङ्गत्वघटकीभूतकरणत्वादिबोधकत्वेन हि तृतीयादेरङ्गत्वप्रमाणत्वमित्युक्तम् । भवदुक्तलक्षणस्य तु तदघटितत्वात्तदनापत्तिः ।

अन्ये तु परोद्देशप्रवृत्तत्वं शेषत्वम् । प्रवृत्तिरिति चेतनाचेतनकर्तृकव्यापारमात्रमभिधीयते । अस्ति च सर्वकारणानां स्वस्वव्यापारे कर्तृत्वम् । संभवति चोद्देश्यतात्मिका विषयता, तत्रापि प्रयोजनानां पाकाय काष्ठानि ज्वलन्ति, धान्याय जलं गलवतीति व्यवहारात् । व्यवहारे चाचेतनशब्दकर्तृकेऽभिधाव्यापारे व्यक्तीनामुद्देश्यत्वं भवदेवः । प्रकृतिकर्तृकव्यापारे च प्रपञ्चोद्देश्यकत्वं कपिलः । ततश्च यदुद्देशेन

यद्व्याप्रियते तत्तदङ्गमित्याहुः । तदपि च यागाद्युद्देश्यकव्यापारकर्तरि शूद्रादावपि यागाद्यङ्गत्वापत्तेर्विहितत्वनिवेशेऽपि च तस्यापि स्वरूपतस्तत्कर्तृककर्मणि विहितत्वादुक्तदोषतादवस्थ्यात् । यदुद्देश्यकव्यापारकर्तृत्वेन यद्विहितं तत्तदङ्गमित्युक्तौ च दध्यादिषु वस्तुतो होमाद्युद्देश्यकव्यापारकर्तृत्वेऽपि तत्त्वेन विहितत्वाभावादव्याप्तेरुपेक्षितम् । विधिप्रयोज्यप्रमाविषययदुद्देश्यकव्यापारकर्तृत्वं यत्र तत्र तदङ्गत्वमित्युक्तौ तु न कोऽपि दोषः । प्रतीयते हि दध्यादीना करणत्वादिना विधानेऽपि यागाद्युद्देश्यकव्यापारकर्तृत्वम् । परं त्वस्मदुक्तलक्षणापेक्षया गुरुत्वात्तदुपेक्षेति ध्येयम् । इदं च परार्थत्वमङ्गत्वस्वरूपम् । अङ्गस्य लक्षणम् । तच्चाङ्गं द्विविधं, क्रत्वर्थं पुरुषार्थं चेति । आद्यं प्रयाजादि । द्वितीयं ज्योतिष्टोमदर्शपूर्णमासादि । अथ किं नाम क्रत्वर्थत्वं पुरुषार्थत्वं वा । न हि क्रतूपकारकत्वं क्रत्वर्थत्वम् । पुरुषोपकारकत्वं पुरुषार्थत्वमिति युक्तम् । पुरुषार्थगोदोहनादेरपि प्रणयनद्वारा क्रतूपकारकत्वेन क्रत्वर्थत्वापत्तेः । प्रयाजादेरपि प्रधानद्वारा पुरुषोपकारकत्वेन पुरुषार्थत्वापत्तेश्च । उक्तलक्षणयोरेव क्रत्वन्यानुपकारकत्वादिघटनायां तूभयार्थदध्यादावव्याप्तेः । नानाविधोपकारकसाधारण्यापत्तेश्च । उपकारकत्वस्यैकस्याभावेन तद्घटितलक्षणायोगाच्च । नापि क्रतूद्देशेन विधीयमानत्वं क्रत्वर्थत्वम् । पुरुषोद्देशेन विधीयमानत्वं पुरुषार्थत्वम् । क्रत्वर्थेऽवघातादौ क्रतूद्देशेन विधीयमानत्वाभावात्क्रत्वर्थलक्षणाव्याप्तेः । न ह्यवघातादेः क्रतूद्देशेन विधानं प्रमाणवत् । विशिष्टोद्देशेन विधाने विशेषणोद्देशेनापि विधेरावश्यकत्वेऽपूर्वीयत्वविशिष्टस्योद्देश्यत्वादस्त्वपूर्वोद्देशेनावघातादेर्विधानम् । न तु व्यापारघटकक्रतूद्देशेनापि । मानाभावात् । पुरुषोद्देशेन विधीयमानदीक्षणीयादौ पुरुषार्थत्वलक्षणस्यातिव्याप्त्यापत्तेश्च । ज्योतिष्टोमादेः स्वर्गाद्युद्देशेनैव विधीयमानत्वात्पुरुषार्थत्वलक्षणस्याव्याप्त्यापत्तेरपीति चेत् ।

अत्र तन्त्ररत्ने पार्थसारथिः । स्वयंप्रार्थितसाध्याधीनानुष्ठानः पुरुषार्थः । तदुपकारार्थः क्रत्वर्थ इति तयोर्लक्षणे आह । तत्र स्वयंप्रार्थितसाध्याधीनानुष्ठानत्वं स्वयंप्रार्थितसाध्येच्छाजन्यप्रवृत्तिजन्यत्वम् । अस्ति चेदं ज्योतिष्टोमादौ । फलेच्छाया उपायेच्छां प्रति कारणत्वेन स्वयंप्रार्थितस्वर्गेच्छाजन्यज्योतिष्टोमादीच्छाजन्यप्रवृत्तिजन्यत्वस्य तत्र सत्त्वात् । स्वयंप्रार्थितत्वं च शास्त्राधीनेष्टसाधनताज्ञानाजन्येच्छाविषयत्वम् । यागादयो हि न शास्त्राधीनेष्टसाधनताज्ञानाजन्येच्छाविषयाः । तद्धि लोकावगतेष्टसाधनताज्ञानजन्येच्छाविषयत्वाद्वा भवेत्, इष्टसाधनताज्ञानानधीनेच्छाविषयत्वाद्वा भवेत् । न चोभयमपि यागादौ संभवति । तत्र लोकादिष्टसाधनत्वानवगतेरिष्टसाधनताज्ञानं विना सुखत्वादिप्रकारकज्ञानादेव सुखादाविव यागत्वप्रकारकज्ञानेऽपीच्छाया अनुत्पत्तेश्च । अतो न यागादौ स्वयंप्रार्थितत्वम् । स्वर्गादेस्तु स्रक्चन्दनवनिताद्यधिकरणीभूतदेशविशेषरूपत्वे तस्य लोकत एवेष्टसाधनत्वावगतेः, सुख-

विशेषरूपत्वे तु स्वर्गत्वादिप्रकारकज्ञानादेवेच्छोत्पत्तेश्चोक्तविधं स्वयंप्रार्थितत्वम् । पश्वादिरूपे फल इष्टसाधनताज्ञानाजन्येच्छाविषयत्वाभावादव्याप्तिरतः शास्त्राधीनेति । पश्वादौ तु लौकिकेष्टसाधनताज्ञानादेवेच्छोत्पत्तेर्न दोषः । इच्छात्वेनेच्छानुपादाने तु शास्त्राधीनेष्टसाधनताज्ञानाजन्ययागत्वप्रकारकज्ञानविषयत्वाद्यागादेः स्वयंप्रार्थितत्वापत्तिः । अतस्तदुपादानम् । इत्थं च शास्त्राधीनेष्टसाधनताज्ञानाजन्येच्छाविषयसाध्येच्छाजन्यप्रवृत्तिजन्यत्वं निरुक्तेष्टसाधनताज्ञानाजन्येच्छाजन्यप्रवृत्तिजन्यत्वं वा पार्थसारथिमते पुरुषार्थत्वलक्षणं पर्यवसन्नम् । तदुपकारार्थत्वं च तदुपकारप्रयोजकत्वम् । तेन प्रधानाङ्गाभिक्रमणादेः प्रधानोपकाराजनकत्वेऽपि नाव्याप्तिः ।

अत्रेदं बोध्यम् । पुरुषार्थत्वलक्षणेऽपि काम्यकाले, उपनयनाद्याश्रितपञ्चमवर्षादौ काम्यजातौ च दधित्वादिरूपायामव्याप्तिः । तयोरननुष्ठेयत्वात् । क्रत्वर्थत्वलक्षणे पूर्वोदाहृतगोदोहनादावतिव्याप्तिः । किंचाऽऽधानाध्ययनयोरुभयभिन्नत्वेन तन्त्ररत्नोक्तेस्तत्र क्रत्वर्थत्वलक्षणातिव्याप्तिः । एतेनेतिकर्तव्यतात्वेनान्वितत्वं क्रत्वर्थत्वं, तद्भिन्नत्वं पुरुषार्थत्वमिति शास्त्रदीपिकोक्तमपि परास्तम् । आधानाध्ययनयोः पुरुषार्थलक्षणातिव्याप्तेः । सिद्धपदार्थस्य सोमादेरितिकर्तव्यतात्वेनान्वितत्वाभावात्तत्र लक्षणद्वये क्रमेणातिव्याप्त्यव्याप्त्यापत्तेश्च । तस्यापि व्यापाराविष्टस्येतिकर्तव्यतात्वमिति यदि विभाव्यते तदा दध्न उभयार्थत्वात्तत्र तद्भिन्नत्वाभावात्पुरुषार्थत्वलक्षणस्याव्याप्तिरिति ध्येयम् ।

केचित्तु[1] स्वयंप्रार्थितवृत्त्युद्देश्यतानिरूपितविधेयताशालित्वं पुरुषार्थत्वम् । स्वयंप्रार्थितभिन्नवृत्त्युद्देश्यतानिरूपितविधेयताशालित्वं क्रत्वर्थत्वम् । अत्र स्वयंप्रार्थितत्वं पूर्ववत् । उद्देश्यताविधेयते च स्वरूपसंबन्धरूपे, न तु साध्यत्वानुष्ठेयत्वात्मिके । एतेन कालादावनुष्ठेयत्वाभावेऽपि नाव्याप्तिः । न वा पुरुषार्थेष्वभ्यनुज्ञाविधिषु दोषाभावोद्देशेन तत्तत्क्रियाविधानेऽप्यव्याप्तिः । आधानाध्ययनयोस्तु स्वयंप्रार्थितभिन्नाग्न्यर्थज्ञानोद्देशेन विधानात्क्रत्वर्थत्वस्वीकारेऽपि न दोषः । 'फलं च पुरुषार्थत्वात्[2]' इत्यत्र तु फले पुरुषार्थत्वव्यवहारोऽङ्गत्वव्यवहारवद्भाक्त इत्याहुः ।

तदपि यथाश्रुतं न साधीयः । 'अगन्म' इति मन्त्रस्य लिङ्गकल्पितश्रुत्या स्वयंप्रार्थितस्वर्गोद्देशेन विधानात्तत्र पुरुषार्थत्वलक्षणस्यातिव्याप्तेः । अत एव स्वयंप्रार्थितभिन्नवृत्त्युद्देश्यतानिरूपितविधेयताकत्वाभावात्क्रत्वर्थत्वलक्षणस्याव्याप्तेश्च ।

किं च 'हीषिति वृष्टिकामाय निधनं कुर्यात्' इत्यादौ वृष्ट्याद्युद्देशेन स्वसाधनसौभरीयनिधनाधारत्वसंबन्धेन विधीयमानेषु हीषादिषु लक्षणस्यातिव्याप्त्यव्याप्ती[3] । न हि

---

१ भाट्टदीपिकायां चतुर्थाध्याये खण्डदेवोक्तमनुवदति—केचित्त्विति । २ (अ० ३ पा० १ अ० ३ सू० ५) । ३ लक्षणस्यातिव्याप्त्यव्याप्ती इति । पुरुषार्थत्वलक्षणस्यातिव्याप्तिः । क्रत्वर्थत्वलक्षणस्याव्याप्तिरित्यर्थः ।

तेषां पुरुषार्थत्वमिष्टम् । शाखाभेदेन सौभरीयनिधनाधारतया विहितानां हीषादीनामनियमेन
दृष्ट्यर्थसौभरीयनिधनाधारत्वप्राप्तौ 'हीष् इति वृष्टिकामाय निधनं कुर्यात्' 'ऊर्गि-
त्यन्नाद्यकामाय' 'ऊ इति स्वर्गकामाय' इत्यादिवाक्यैस्तत्तत्फलार्थसौभरीयनिधने
हीषादीनां नियममात्रकरणात् । अत एवोक्तसंबन्धेन वृष्ट्याद्युद्देशेन हीषादेरपि वस्तुत-
स्तत्तत्फलार्थसौभरीयनिधने, आधारतया हीषादिनियम एव तत्तद्विधितात्पर्यम् । न
चैवमपि वृष्टिकामादिपदेन वृष्ट्यादिसाधनसौभरलक्षणया तदीयनिधनाधारत्वसंबन्धेन
हीषादिविधिरस्तु । तथा चोद्देश्यसौभरस्य स्वयंप्रार्थितत्वाभावान्नाव्याप्त्यतिव्याप्ती इति
वाच्यम् । औत्तरकालिकनियमविधिलाघवानुरोधेन गुरुधर्मावच्छिन्ने लक्षणाया अन्या-
य्यत्वात् तदपेक्षयाऽपूर्वविधित्वापादकस्य सौभराधिकरणपूर्वपक्ष्यभिमतस्य फलान्तरोद्दे-
शेन हीषादिविधेरेव युक्तत्वेन तदधिकरणसिद्धान्तानुपपत्तेः । अतो नियमविधिपरस्य
तत्रत्यसिद्धान्तस्योक्तप्रकार एव तात्पर्यमिति स्वेनैव तदधिकरणे प्रतिपादितम् । अतः
कथं स्वोक्तिविरुद्धलक्षणकथनं युज्यते । अत एव तदुक्तरीत्यैव तद्दोषाभिधानम् ।

वस्तुतो 'हीषिति वृष्टिकामाय निधनं कुर्यात्' इत्यादौ न वृष्ट्याद्युद्देशेन निरुक्त-
संबन्धेन हीषादिविधिः । तथात्वे वृष्टिकामपुरुषविशेषणतया श्रुताया वृष्टेरुद्देश्यतयाऽ-
न्वयायोगात् । वृष्टिकामपदे वृष्टिलक्षणापत्तेश्चतुर्थ्याः कर्मत्वलक्षणापत्तेश्च । अतो लक्षणाद्व-
यापत्तेस्तदपेक्षयैकस्मिन्निधनपदे वृष्टिप्रयोजकनिधनलक्षणया तदुद्देशेनैव हीषादिविधिर्युक्तः ।
निधनपदोत्तरद्वितीयया कर्मत्वस्य शक्त्यैवोक्तत्वाल्लक्षणान्तराप्रसक्तेः । न चास्मन्मते वृष्टि-
कामादिपदे कर्मधारयाङ्गीकारान्न लक्षणान्तरप्रसक्तिरिति वाच्यम् । तथाऽपि चतुर्थ्याः स्वश-
क्यतावच्छेदकानवच्छिन्नकर्मत्वलक्षणापेक्षया निधनपदेनैव स्वशक्यतावच्छेदकावच्छिन्न-
निरुक्तनिधनलक्षणाया उचितत्वात्, विधिसंनिहितस्य पदस्योद्देश्यसमर्पकत्वे संभवति विप्र-
कृष्टपदस्य तथात्वायोगाच्च ।

अपि च भवन्मते निधनपदानुवादो निष्प्रयोजनः । न च संबन्धतात्पर्यग्राहकतया
तदुपयोगः । नियमविधिलाघवानुगृहीतहीषादिपदस्यैव तत्त्वात् । अस्मन्मते तु निधन-
पदीयलक्षणातात्पर्यग्राहकतया वृष्टिकामादिपदसार्थक्यमिति न कस्यापि वैयर्थ्यम् । अत
एव यत्र नैवंविधोद्देश्यसमर्पकपदश्रवणं यथा 'वासिष्ठानां नाराशंसो द्वितीयः प्रयाजः'
इत्यादौ, तत्र द्वितीयप्रयाजपदवैयर्थ्यमङ्गीकृत्यापि वासिष्ठोद्देशेनैव तदभिलषितफलसाध-
नीभूतदर्शपूर्णमासाङ्गद्वितीयप्रयाजवृत्तित्वसंबन्धेन नाराशंसमन्त्रविधिः । न हि तत्र
प्रयाजपदे निरुक्तप्रयाजलक्षणया तदुद्देशेन मन्त्रविधिः संभवति । तथात्वे प्रथमायामपि

१ (अ० २ पा० २ अ० १३)

स्वशक्यतावच्छेदकानवच्छिन्नकर्मत्वलक्षणाङ्गीकारे लक्षणाद्वयापत्तेः । अतो वरं वासिष्ठपदोत्तरषष्ठ्याः स्वशक्यतावच्छेदकावच्छिन्नकर्मत्वलक्षणया निरुक्तप्रकाराङ्गीकरणम् । प्रकृते तु द्वितीयान्तविधिसंनिहितनिधनपदस्यैवोद्देश्यसमर्पकत्वे संभवति न तद्विपरीतवृष्टिकामादिपदस्य तदुचितम् ।

एतेन सौभराधिकरणपूर्वपक्ष्यभिमतप्रकारोऽपि निरस्तः । नियमविधिलाघवानुगृहीतनिरुक्तयुक्तिनिचयपराहतत्वात् । अत एवास्मन्मते, उद्देश्यतावच्छेदकसंबन्धगौरवपराहतत्वाच्च । अतो वस्तुतो ह्रीषादावतिव्याप्त्यव्याप्त्योरभावेऽपि तदुक्तपक्षमवलम्ब्य तदभिधानम् । ‘ अगन्म ’ इत्यादौ तु तयोर्दुर्वारत्वमेव

अथ स्वयंप्रार्थितजनकत्वे सति स्वयंप्रार्थितवृत्त्युद्देश्यतानिरूपितविधेयताशालित्वं पुरुषार्थत्वम् । विधेयतायामेव वा जनकतासंबन्धावच्छिन्नत्वं निवेश्यम् । ‘अगन्म’ इतिमन्त्रस्य स्मारकतया स्वर्गोद्देशेन विहितत्वेऽपि तदजनकत्वात्, ह्रीषादेश्च परम्परया वृष्ट्याद्यर्थत्वान्नोक्तानुपपत्तिः । अत्र सत्यन्तमात्रविवक्षायां ‘ सूक्तवाकेन प्रस्तरं प्रहरति ’ इत्यत्र प्रतिपत्त्यर्थतया विहितस्यापि प्रहरणस्य तृतीयावगतकरणत्वान्यथानुपपत्त्याऽऽनुषङ्गिकायुरादिजनकत्वादतिव्याप्तिरतो विशेष्यदलम् । ततश्चाऽऽयुरादिप्रकाशकसूक्तवाकभागस्य प्रहरणाङ्गत्वनिर्वाहायाऽऽयुरादेस्तज्जन्यत्वमात्रकल्पनायामपि तदुद्देशेन प्रहरणविधेयत्वाभावान्नातिव्याप्तिः । इतरथा प्रस्तरस्याप्युद्देश्यत्वे वाक्यभेदप्रसङ्गात् । वाक्यान्तरकल्पनयाऽऽयुराद्युद्देशेन प्रहरणविधानं तु सूक्तवाककरणकत्वानुपपत्तेरायुरादिजनकत्वमात्रकल्पनयैवोपक्षीयमाणत्वादनुपपन्नम् । एवं चोक्तपुरुषार्थभिन्नाङ्गत्वमेव क्रत्वर्थत्वमिति न क्रत्वर्थत्वलक्षणे पूर्वोक्ताव्याप्त्यतिव्याप्ती इति चेन्न । दोषाभावोद्देशेन विधीयमानाविवाहार्थानृतवदनादौ पुरुषार्थलक्षणाव्याप्तेः । दोषाभावस्याजन्यत्वाज्जनकत्वस्याननुगतत्वेन तद्घटितलक्षणायोगाच्च । क्रत्वर्थत्वलक्षणे, उभयार्थदध्यादावव्याप्तेश्च । अत एवं वाच्यम् । अपूर्वीयत्वानवच्छिन्नस्वयंप्रार्थितवृत्त्युद्देश्यतानिरूपितविधेयताशालित्वं पुरुषार्थत्वम् । अस्ति चेदं स्वर्गाद्युद्देशेन विधीयमानज्योतिष्टोमादौ । अनिर्दिष्टप्रकारस्वर्गादिस्वरूप आनर्थक्याभावेन तन्निष्ठोद्देश्यतायाः स्वर्गत्वादिनैवावच्छेदात् । अत्र पूर्वोक्तरीत्याऽगन्मेत्यादावतिव्याप्तिवारणायापूर्वीयत्वानवच्छिन्नेत्युद्देश्यताविशेषणम् । तत्र स्वर्गादिनिष्ठोद्देश्यताया अपूर्वीयत्वावच्छिन्नत्वस्य नवमे प्रतिपादितत्वान्न दोषः । आहवनीयादिस्वरूप आनर्थक्याभावेनाऽऽहवनीयत्वादेरेवोद्देश्यतावच्छेदकत्वेनापूर्वीयत्वानवच्छिन्नोद्देश्यतानिरूपितविधेयतावत्त्वस्याऽऽधानादावपि सत्त्वात्स्वयंप्रार्थितवृत्तीत्युद्देश्यताविशेषणम् । अत एव ह्रीषादिस्थलीयास्मदुक्तप्रकारे

---

१ (अ० २ पा० २ अ० १३) । २ (अ० ९ पा० १ अ० ३) इत्यत्रोति शेषः ।

निधनादिनिष्ठोद्देश्यताया वृष्टिप्रयोजकनिधनत्वावच्छिन्नाया अपूर्वीयत्वानवच्छिन्नत्वेऽपि स्वयंप्रार्थितवृत्तित्वाभावान्न तत्रातिव्याप्तिः।

एवं निरुक्तपुरुषार्थत्वघटकोद्देश्यताविलक्षणोद्देश्यतानिरूपितविधेयताशालित्वं क्रत्वर्थत्वम्। निरुक्तोद्देश्यताविलक्षणत्वं च निरुक्तोद्देश्यतावृत्त्यपूर्वीयत्वानवच्छिन्नत्वस्वयंप्रार्थितवृत्तित्वोभयाभाववत्त्वम्। भवति हि प्रयाजादिनिष्ठविधेयतानिरूपितदर्शपूर्णमासादिनिष्ठोद्देश्यता निरुक्तोभयाभाववती। दर्शपूर्णमासस्वरूप आनर्थक्येनापूर्वीयत्वेनैव तयोरुद्देश्यत्वात्स्वयंप्रार्थितवृत्तित्वाभावाच्च। अतः प्रयाजादेः क्रत्वर्थत्वम्। अत्रापूर्वीयत्वानवच्छिन्नत्वाभावमात्रोक्तौ 'यूपं छिनत्ति' 'हिरण्यशकलसहस्रेणाग्निं प्रोक्षति' इत्यादौ यूपादिस्वरूप आनर्थक्याभावेनापूर्वीयत्वलक्षणाभावाद्यूपत्वादिनैव यूपादेरुद्देश्यत्वाच्छेदनादावव्याप्तिः। एवं स्वयंप्रार्थितवृत्तित्वाभावमात्रोक्तावगन्मेत्यादावव्याप्तिः। अत उभयाभावपर्यन्तानुधावनम्। तथा च यूपादिवृत्त्युद्देश्यतायाः स्वयंप्रार्थितवृत्तित्वाभावप्रयुक्तोभयाभाववत्त्वात्स्वर्गादिनिष्ठोद्देश्यतायाश्चापूर्वीयत्वानवच्छिन्नत्वाभावप्रयुक्तोभयाभाववत्त्वान्नाव्याप्तिः। आधानादेस्तु क्रत्वर्थत्वमिष्टमेव।

ननु 'तप्ते पयसि दध्यानयति' इत्यत्र पय उद्दिश्य दध्यानयनं विधीयत इत्येष्टमे सिद्धान्तितम्। तत्र पयसो नापूर्वीयत्वेनोद्देश्यता। एतद्वाक्यप्रवृत्तेः पूर्वं पयस अपूर्वसाधनत्वानवगमेन पयःपदेन लक्षणायोगात्। न हि 'व्रीहीनवहन्ति' इत्यादिवाक्यनिरपेक्षप्रवृत्तिकेन 'व्रीहिभिर्यजेत' इत्यादिवाक्येन व्रीहीणामिव प्रकृतवाक्यनिरपेक्षेण केनचिद्वाक्येन पयसोऽपूर्वसाधनत्वमवगतम्। येन लक्ष्यतावच्छेदकस्य पूर्वमुपस्थितत्वात्तदवच्छिन्नेऽवघातादिवाक्यस्थव्रीहिपदस्येव पयःपदस्य लक्षणा भवेत्। 'सा वैश्वदेव्यामिक्षा' इति वाक्यं तु प्रकृतवाक्यनिर्दिष्टपयःपरामर्शकतच्छब्दघटितत्वादुत्तरप्रवृत्तिकमेवेत्यपूर्वीयत्वेन पयस उद्देश्यत्वायोगात्पयस्त्वेनैवोद्देश्यता वाच्या। तथा चापूर्वीयत्वानवच्छिन्नस्वयंप्रार्थितवृत्त्युद्देश्यतानिरूपितविधेयताकत्वादानयने पुरुषार्थलक्षणातिव्याप्तिः। एवं पयोगतोद्देश्यताया निरुक्तोभयाभाववत्त्वाभावात्क्रत्वर्थलक्षणाव्याप्तिरिति चेन्न। पयस आनयनासाध्यत्वेनान्वयानुपपत्तेः पयःपदस्य पयस्त्वसमानाधिकरणधर्मावच्छिन्ने लक्षणाङ्गीकारात्। स च धर्म आमिक्षावाक्यप्रवृत्त्युत्तरकालमपूर्वसाधनत्वरूप एवेत्यवगमात्पयोवृत्त्युद्देश्यतायास्तदवच्छिन्नत्वान्नोक्ताव्याप्त्यतिव्याप्ती। अत एव 'व्रीहीनवहन्ति' इत्यादौ व्रीहित्वावच्छिन्नोद्देशेनैवावघातादेर्विधानान्नापूर्वार्थत्वकल्पनमित्यपूर्वीयत्वलक्षणाखण्डनप्रकारो विधि-

---

१ (अ० ८ पा० २ अ० ४) इत्यत्रेति शेषः।

रसायनोक्तोऽपि निरस्तः । अयोग्यतानिश्चयस्य प्रतिबन्धकत्वेन प्रथमतः शाब्दबोधस्यैवानुदयाल्लक्षणाया आवश्यकत्वात् । न चैवमपि वैतुष्यादिविशिष्ट एव व्रीह्यादिपदलक्षणाऽस्त्विति वाच्यम् । लक्षणाया आवश्यकत्व आनर्थक्यपरिहारायापूर्वीयत्वविशिष्टलक्षणाया एवौचित्यात् ।

नन्वेवमपि 'व्रीहीनवहन्ति' इत्यादावपूर्वसाधनत्वलक्षणायामपि 'तप्ते पयसि' इत्यत्र न लक्षणा । तथा सति पयःपदस्य सप्तम्याश्च लक्षणामपेक्ष्य तप्तपयोधिकरणकत्वविशिष्टदध्यानयनस्याऽऽरादुपकारकत्वेनैव विधानस्योचितत्वात् । अदृष्टकल्पनाप्रयुक्तगौरवस्य फलमुखत्वेनादोषत्वात् । अवघातादिवाक्ये त्वारादुपकारकत्वपक्षे प्रधानीभूतद्वितीयायाः करणत्वे लक्षणाप्रसङ्गाद्गुणभूतप्रातिपदिक एवोक्तलक्षणाङ्गीकारात्संनिपत्योपकारकत्वमिति विशेष इति चेन्न । तच्छब्दस्य पूर्वोपस्थितप्रधानपरामर्शकत्वेन पूर्ववाक्ये प्रधानीभूतपरामृष्टव्यस्याभावे तदनुपपत्तेः 'जुषन्तां युज्यं पयः' इति मन्त्रवर्णादिनिर्णीतपयःशक्तिकामिक्षापदसमभिव्याहृततच्छब्देन च दधिपरामर्शायोगात्तस्य प्राधान्यानुपपत्तेः पूर्वोक्तलक्षणाद्वयमङ्गीकृत्य पयस उद्देश्यत्वावश्यकत्वादपूर्वसाधनत्वेनैव पयस उद्देश्यत्वान्नोक्तलक्षणद्वयेऽप्युक्तदोषः । अयं च प्राचीनमीमांसकोक्तवाक्यार्थमभिप्रेत्य दोषपरिहारः । वस्तुतस्तु निषादस्थपत्यधिकरणविरोधान्नायं वाक्यार्थः समञ्जसः । तच्छब्दस्य मन्त्रवर्णानुरोधेन गुणीभूतपयःपरामर्शकत्वानुपपतेः । पयस उद्देश्यत्वेऽपि शाब्दबोधे गुणत्वेनैवान्वयाद्भवन्मतेऽपि तच्छब्दस्य प्रधानपरामर्शकत्वाभावाच्च । न हि वस्तुतो यत्प्रधानं तत्परामर्शकत्वं तच्छब्दस्य । राजपुरुषः स सुन्दर इत्यादौ वस्तुतः प्रधानेऽपि राज्ञि सुन्दरत्वानन्वयात् ।

अत एव वैमृधन्यायेन पदान्तरकल्पनया तप्तपयोधिकरणकत्वविशिष्टदध्यानयनस्य पयोङ्गत्वेन विधिरिति कैश्चिदुक्तमपि प्रत्युक्तम् । पदान्तरकल्पनागौरवेण निषादस्थपत्यधिकरणविरोधतादवस्थ्यात् । वैमृधस्थले तु द्वितीयान्तविद्यमानपदस्यैवानुसंधानमात्रकल्पनान्न निषादस्थपत्यधिकरणविरोधः । अतो मन्त्रवर्णानुरोधेन तच्छब्दस्य गुणीभूतपयःपरामर्शकत्वमभ्युपेत्य पयोधिकरणकत्वविशिष्टदध्यानयनभावना, इष्टसामान्योद्देशेन विधीयते । इष्टविशेषाकाङ्क्षायां च सामर्थ्याद्वाक्यान्तरकल्पनया प्रधानाङ्गभूतामिक्षोद्देशेन निरुक्तानयनविधिः । न च वाक्यान्तरकल्पनायां सामर्थ्यादामिक्षाया इव वाजिनस्याप्युद्देश्यतापत्तेरानयनप्रयोजकतापत्तिः । श्रुतवाक्ये पयस आनयनव्याप्यदधिव्याप्यतयाऽवगतस्य कल्पितवाक्य उद्देश्यत्वौचित्येन तस्यैव प्रयोजकत्वात् । तत्र चापूर्वसाधनत्वस्य-

---

१ (अ० ६ पा० १ अ० १२) । २ (अ० ४ पा० ३ अ० ११) अग्रस्येनेति शेषः । ३ (अ० ६ पा० १ अ० १२) ।

पूर्वमवगतत्वात्तत्त्वेनैवाऽऽमिक्षाया उद्देश्यता । फलमुखत्वाच्च वाक्यान्तरकल्पना न दोषः । अतो नोक्तलक्षणद्वयेऽप्यव्याप्त्यतिव्याप्तिवार्ताऽपीति ।

नन्वाहवनीयत्वयूपत्वादेरप्याधानच्छेदनादिजन्यविजातीयापूर्वविशिष्टत्वरूपत्वात्तदवच्छिन्नोद्देश्यताया अप्यपूर्वीयत्वावच्छिन्नत्वात्पुरुषार्थलक्षणे, आधानादिवारकस्वयंप्रार्थितवृत्तित्वस्य, क्रत्वर्थत्वलक्षणेऽपूर्वीयत्वानवच्छिन्नत्वाभावमात्रस्य निषेधद्वयगर्भतायां गौरवेणापूर्वीयत्वावच्छिन्नत्वमात्रस्यैवोद्देश्यताविशेषणत्वेनोपपत्तावुभयाभावस्य च वैयर्थ्यमिति चेन्न । आहवनीयादिनिष्ठाधानाद्युद्देश्यताया आधारतासंबन्धेन विजातीयापूर्वरूपाहवनीयत्वावच्छिन्नत्वेनापूर्वसंबन्धित्वरूपापूर्वीयत्वानवच्छिन्नत्वात् , उक्ताव्याप्त्यतिव्याप्तिवारणाय लक्षणद्वयेऽप्युक्तविशेषणसार्थक्यात् । न चैवं स्वर्गनिष्ठमन्त्रोद्देश्यताया अपि लाघवात्साध्यतासंबन्धेनापूर्वावच्छेद्यत्वापत्तेरपूर्वीयत्वानवच्छेद्यत्वेनाऽऽद्यलक्षणे ' अगन्म ' इति मन्त्रेऽतिव्याप्तिः, क्रत्वर्थलक्षणेऽव्याप्तिश्च दुर्वारेति वाच्यम् । साध्यत्वादेः संबन्धत्वे मानाभावेनापूर्वस्य तेन संबन्धेन तत्रावच्छेदकत्वानुपपत्तेरपूर्वसाध्यत्वेनैव स्वर्गस्योद्देश्यत्वात् । अत एव साधनतासंबन्धेनापूर्वविशिष्टे लक्षणामपहाय व्रीह्यादिपदेऽपूर्वसाधनत्वविशिष्ट एव लक्षणाऽङ्गीकृता तेषामर्थाधिकरणादौ । आधारतायास्तु संबन्धत्वेऽविवादात्तत्संबन्धेनापूर्वस्यैवाऽऽहवनीययूपादिनिष्ठोद्देश्यतावच्छेदकत्वान्नोक्तविशेषणवैयर्थ्यम् । न चैवमप्यपूर्वीयत्वस्य साध्यत्वसाधनत्वादिरूपत्वेनाननुगतत्वात्तद्घटितलक्षणायोग. । अपूर्वसाध्यत्वसाधनत्वयोरपूर्वघटितधर्मत्वेनानुगमात् । अपूर्वघटितत्वं च नापूर्वाविषयकप्रतीत्यविषयत्वम् । अपूर्वस्यापि तत्त्वेनोक्तलक्षणद्वय उक्तरीत्या विशेषणद्वयवैयर्थ्यापत्तेः । नापि स्वाविषयकप्रतीतिविषयापूर्वाविषयकप्रतीत्यविषयत्वम् । स्वाविषयकप्रतीतिविषयत्वविशेषणेनापूर्वं वारयित्वा लक्षणद्वयेऽतिव्याप्त्यव्याप्ती संपाद्य तद्वारकस्वयंप्रार्थितवृत्तित्वोभयाभावविशेषणदानस्य ' प्रक्षालनाद्धि पङ्कस्य ' इतिन्यायपराहतत्वात् । गौरवाच्च । किं तु निरूपितत्वसंबन्धेनापूर्वविशिष्टत्वम् । तच्चापूर्वेऽव्यावृत्तमेव । अतो नोक्तविशेषणद्वयवैयर्थ्यम् । न चापूर्वाविषयकप्रतीत्यविषयत्वरूपापूर्वसाधारणापूर्वघटितत्वघटितलक्षणेनैव सामञ्जस्ये किमित्यपूर्वव्यावृत्तापूर्वघटितत्वघटनयोक्तविशेषणद्वयोपादानमिति वाच्यम् । तस्य लक्षणान्तरत्वात् । अपूर्वीयत्रीह्युद्देशेनावघातविधावपूर्वोद्देशेनापि तद्विधेरावश्यकत्वेनापूर्वाविषयप्रतीत्यविषयधर्मानवच्छिन्नापूर्वनिष्ठोद्देश्यतानिरूपितविधेयतावत्त्वादवघाताद्यङ्गेष्वतिव्याप्तिवारणाय तल्लक्षणेऽपि स्वयंप्रार्थितवृत्तित्वविशेषणावश्यकत्वाच्च ।

---

१ (अ० ३ पा० १ अ० ४)।

वस्तुतस्तु अपूर्वसाधनत्वावच्छिन्नाया अपूर्वावच्छिन्नाया अपूर्वनिष्ठायाश्च क्रत्वर्थीयोद्देश्यतायाः स्वयंप्रार्थितवृत्तित्वविशेषणेनैव वारणात्, 'अगन्म' इतिमन्त्रोद्देश्यतायाः स्वर्गनिष्ठाया वारणायापूर्वसाध्यत्वानवच्छिन्नत्वमेवोद्देश्यताविशेषणम् । अतो नापूर्वघटितत्वनिर्वचनाय यतितव्यम् । अस्मिंश्च पक्षेऽपूर्वसाध्यत्वानवच्छिन्नत्व—स्वयंप्रार्थितवृत्तित्वोभयाभावघटितक्रत्वर्थत्वलक्षणेऽपूर्वसाध्यत्वानवच्छिन्नत्वाभावमात्रोक्तौ 'अगन्म' इत्यादिफलाङ्गक्रत्वर्थातिरिक्तक्रत्वर्थेष्वव्याप्तिः । अतः स्वयंप्रार्थितवृत्तित्वघटितोभयाभावानुधावनम् ।

परमार्थतस्तु, पुरुषार्थत्वलक्षणेऽपूर्वानवच्छिन्नत्वमेवोद्देश्यताविशेषणम् । विशिष्टपर्याप्तावच्छेदकतायाः पर्याप्तिसंबन्धेन विशिष्ट इव स्वरूपसंबन्धेन विशिष्टघटकीभूतविशेषणेऽपि वृत्तेः, अपूर्वनिष्ठावच्छेदकत्वानिरूपकत्वरूपापूर्वानवच्छिन्नत्वस्य स्वर्गनिष्ठमन्त्रोद्देश्यतायामपूर्वसाध्यत्वरूपविशिष्टधर्मावच्छिन्नायामभावेन तद्वारणसंभवात् । अपूर्वनिष्ठावघाताद्युद्देश्यताव्यावृत्तये स्वयंप्रार्थितवृत्तीति विशेषणम् । क्रत्वर्थत्वलक्षणे चापूर्वावच्छिन्नत्वमेवोद्देश्यतायां निवेशनीयमिति नोभयाभावघटनाप्रयासोऽपि । सर्वेषामेव क्रत्वर्थानामुद्देश्यताया मुख्यविशेष्यतयोद्देश्यतावच्छेदकघटकतया वाऽपूर्वस्यावच्छेदकत्वमिति नाव्याप्तिः । अपूर्वनिष्ठावघाताद्युद्देश्यतायामपूर्वस्यानवच्छेदकत्वेऽपि श्रुतव्रीह्यादिनिष्ठोद्देश्यतामादायैवावघातादिषु लक्षणसमन्वय इति दिक् । यदि तु 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत'[1] इत्यनेन बृहस्पतिसवस्य वाजपेयप्रयोगबहिर्भूतत्वावगमाद्वाजपेयस्वरूप इव तज्जन्यपरमापूर्वस्वरूपेऽपि आनर्थक्यात्प्रकरणकल्पितवाक्येन वैमृधन्यायेन वा बृहस्पतिसवस्य नापूर्वसाधनीभूतवाजपेयोद्देशेन विधानम्, अपि तु स्वाराज्यभूतफलसाधनीभूतवाजपेयोद्देशेन । तत्र च विशिष्टोद्देशेन विधानेऽपि विशेषणोद्देशेन विधानस्याऽऽवश्यकत्वात्स्वाराज्योद्देशेनापि बृहस्पतिसवविधिरिति सर्वेष्वेव स्वयंप्रार्थितवृत्त्युद्देश्यताघटितलक्षणेषु बृहस्पतिसवे नव्योक्तहीषादिस्थलीयप्रकारे हीषादौ चातिव्याप्तिः । अपूर्वावच्छिन्नत्वघटितक्रत्वर्थत्वलक्षणे चाव्याप्तिरिति सूक्ष्ममीक्ष्यते तदा पुरुषार्थत्वलक्षणे स्वोद्देश्यतानवच्छेदकत्वं स्वयंप्रार्थितविशेषणम् । स्वपदं पुरुषार्थत्वेनाभिमतपरम् । स्वाराज्यादेस्तु वाजपेयादिनिष्ठबृहस्पतिसवाद्युद्देश्यतावच्छेदकत्वान्नातिव्याप्तिः । स्वयंप्रार्थितभिन्नवृत्त्युद्देश्यतानिरूपितविधेयतावत्त्वं च क्रत्वर्थत्वम् । अतो नाव्याप्तिः । 'अगन्म' इत्यस्य चापूर्वीयस्वर्गोद्देशेन विधावपूर्वोद्देशेन विधेरावश्यकत्वादपूर्वनिष्ठोद्देश्यतामादाय सर्वमनवद्यम् ।

तथोभयविधमप्यङ्गत्वं प्रत्येकं द्विविधम् । सिद्धरूपं क्रियारूपं चेति । तत्र व्रीह्या-

---

1 (अ० ४ पा० ३ अ० ११) अग्रस्येनोति शेषः ।

दिकं सिद्धरूपं क्रत्वर्थम् । क्रियारूपं क्रत्वर्थं प्रयाजावघातादि । एवं सिद्धरूपं पुरुषार्थं दधिगोदोहनादि । क्रियारूपं पुरुषार्थं ज्योतिष्टोमदर्शपूर्णमासादि । क्रियारूपक्रत्वर्थं च द्विविधम् । संनिपत्योपकारकम्, आरादुपकारकं चेति । तत्र द्रव्यदेवतान्यतरनिष्ठोद्देश्यतानिरूपितविधेयताशालि कर्म संनिपत्योपकारकम् । यथा प्रोक्षणावघातपशुपुरोडाशादि । 'अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपेत्' इत्यनेनोत्पन्नः पशुपुरोडाशयागो हि स्वीयोद्देशेन पशुयागीयदेवतासंस्कारार्थ इत्युक्तं दशमे[1] । अत्र 'यस्य पर्णमयी जुहूर्भवति' इत्यादौ पर्णतादेः सिद्धरूपक्रत्वर्थस्य द्रव्यनिष्ठोद्देश्यतानिरूपितविधेयताशालित्वादतिव्याप्तिरतः कर्मत्वोपादानम् ।

यत्तु द्रव्यदेवतान्यतरसंस्कारकं कर्म संनिपत्योपकारकमिति । तन्न । यजमाननिष्ठप्रयाजादिजन्यादृष्टव्यावृत्तदृष्टादृष्टसंस्कारमात्रवृत्तिसंस्कारत्वस्यैकस्याभावेन तद्घटितलक्षणासंभवात् ।

केचित्तु द्रव्यदेवतान्यतरनिष्ठापूर्वसाधनत्वावच्छिन्नोद्देश्यतानिरूपितविधेयताशालित्वं संनिपत्योपकारकत्वम् । अन्यथा पुरुषोद्देशेन विधीयमानदीक्षणीयादेरिव स्वर्गकामपुरुषाद्युद्देशेन विधीयमानज्योतिष्टोमादेरपि संनिपत्योपकारकत्वापत्तेरित्याहुः । तन्न । यूपाद्युद्देशेन विधीयमानच्छेदनादावव्याप्तेः । तस्यादृष्टरूपफलादिस्वरूप आनर्थक्याभावेनापूर्वीयत्वेनानुद्देश्यत्वात् । ज्योतिष्टोमादेस्तु पुरुषोद्देशेन विधीयमानत्वमसिद्धम् । भावनाया भाव्याकाङ्क्षाया सिद्धरूपस्य भाव्यत्वायोगेन स्वर्गकामादिपदस्य लक्षणया स्वर्गादिपरत्वात् । यत्तूद्भिदादेः पश्वादिद्रव्योद्देशेन विधानात्तत्रातिव्याप्तिरिति विभाव्यते, तदाऽस्तु प्रकृतलक्षणे क्रत्वर्थत्वनिवेशः । अस्तु वाऽस्मदुक्तरीत्याऽपूर्वावच्छिन्नत्वनिवेशः । न त्वपूर्वीयत्वावच्छिन्नत्वस्योद्देश्यताया विशेषणत्वमिति ध्येयम् । निरुक्तसंनिपत्योपकारकभिन्नक्रत्वर्थक्रियात्वमेवाऽऽरादुपकारकत्वम् । संनिपत्योपकारकेऽतिव्याप्तिवारणाय भिन्नान्तम् । पुरुषार्थज्योतिष्टोमादिक्रियायामतिव्याप्तेः[2] क्रत्वर्थेति । सिद्धरूपक्रत्वर्थवारणाय क्रियात्वोपादानम् । एतेषां लक्षणानामाकरोक्ततत्तल्लक्ष्यानुगत्यननुगती सुधीभिर्विभावनीये इत्यलं पल्लवितेन ।

एवंविधाङ्गत्वे च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि षट्प्रमाणानि । अथ केयं श्रुतिर्नाम । न तावच्छक्तशब्दमात्रम् । अङ्गत्वप्रमाणविभाजकोपाधिभूतश्रुतित्वस्योक्तप्रमाणत्वव्याप्यत्वावश्यकत्वान्निरुक्तशब्दत्वरूपश्रुतित्वस्य च तद्व्याप्यत्वासंभवात् । न हि शब्दमात्रमङ्गत्वे प्रमाणम् । घटशब्दादेरतथात्वात् । न च वेदस्थघटादिशब्दस्योद्देश्यविधेयान्यतरबोधकत्वेनाङ्गत्वे प्रमाणत्वाल्लोकवेदाधिकरण[3]न्यायेन तदभे-

---

१ (अ० १० पा० १ अ० ९) इत्यत्रेति शेषः। २ अतिव्याप्तेरिति—वारणायेति शेषः।
३ (अ० १ पा० ३ अ० ९) अत्रत्येनेति शेषः।

द्वादेव लौकिकघटादिशब्दानामपि तत्त्वोपपत्तेः श्रुतित्वस्य तत्साधारण्येऽपि क्षतिविरह इति वाच्यम् । तथाऽपि शब्दमात्रस्य वेदघटकत्वे प्रमाणाभावेन वेदाघटकलौकिकशब्दे विध्यघटकार्थवादादिशब्दे चाङ्गत्वप्रमाणत्वासंभवादुक्तश्रुतित्वसत्त्वेन तदव्याप्यत्वात्, गौणलाक्षणिकयोरपि शक्तत्वेनातिप्रसङ्गाच्च । न हि तयोः श्रुतित्वमिष्टं, तथात्वे 'सक्तून्जुहोति' इत्यादौ सक्तूनां श्रौताङ्गत्वव्यवहारापत्तेः । किं च श्रुतित्वस्य प्रातिपदिकादिसाधारण्ये 'धेनुर्दक्षिणा' इत्यादिवाक्यीयविनियोगस्थले श्रौताङ्गत्वव्यवहारापत्तिः । नापि गौणलाक्षणिकत्वाभाववद्विभक्तित्वम् । 'सक्तून्जुहोति' इत्यादौ गौण्या लक्षणया वा करणत्वादिपरद्वितीयायाः श्रुतित्वाभावादभाववदन्तम् । प्रातिपदिकादिषु श्रुतित्वव्यवहाराभावाद्विभक्तित्वोपादानम् ।

निरपेक्षो रवः श्रुतिरिति प्राचीनप्रवादोऽप्येतदर्थतात्पर्यग्राहक एवेति वाच्यम् । संबन्धार्थकषष्ठ्यादावतिव्याप्तेः । 'व्रीहीन्प्रोक्षति' इति वाक्ये व्रीह्यादिपदोत्तरद्वितीयाया अपि संमार्गाधिकरणपूर्वपक्षे लाक्षणिकत्वेनाव्याप्तेश्चेति चेत् ।

अत्र नव्याः—अङ्गत्वघटकीभूतपरोद्देश्यत्वकृतिकारकत्वयोरन्यतरस्य प्राधान्येन वाचकः शब्दः श्रुतिः । स च 'व्रीहीनवहन्ति' 'व्रीहिभिर्यजेत' इत्यादौ द्वितीयातृतीयादिः । 'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति' इत्यत्र कर्मत्वविशिष्टवाचकक्तप्रत्ययेऽतिव्याप्तेः प्राधान्येनेत्याहुः । अत्र कृतिकारकत्वं कृत्यन्वितकर्तृत्वाद्यन्यतमम् । न तु कृत्यन्वितकर्तृत्वाद्यन्यतमान्वितत्वम् । तृतीयादेस्तदवाचकत्वेनाव्याप्त्यापत्तेः । असंभवस्तु नास्ति । कर्मत्वरूपोद्देश्यतावाचकद्वितीयायां लक्षणसत्त्वात् । अङ्गत्वैकदेशोक्तान्यतरबोधकत्वाद्द्वितीयादेरङ्गत्वप्रमाणत्वमिति फलयितुमङ्गत्वघटकीभूतेति । न त्वङ्गत्वघटकत्वस्य लक्षणघटकत्वं, वैयर्थ्यात् । अत्राङ्गत्वलक्षणे कर्मत्वरूपोद्देश्यतायास्तदितरकर्तृत्वाद्यन्यतमस्य च स्वातन्त्र्येण निवेशाच्छ्रुतिलक्षणे तयोरन्यतरत्वेन निवेशः । वस्तुतस्तु, उद्देश्यतात्वावच्छिन्नप्रतियोगिताकभेद—कर्तृत्वादिप्रत्येकभेदघटितकर्तृत्वकरणत्वसंप्रदानत्वापादानत्वाधिकरणत्वान्यतमत्वावच्छिन्नप्रतियोगिताकभेदघटितान्यतरत्वापेक्षया कर्तृत्वत्वाद्यवच्छिन्नप्रत्येकभेदघटितकर्मत्वसाधारणान्यतमत्वस्य लघुत्वात्कर्तृत्वकरणत्वकर्मत्वसंप्रदानत्वापादानत्वाधिकरणत्वान्यतमस्य प्राधान्येन वाचकः शब्दः श्रुतिरित्येवैतल्लक्षणनिष्कर्षः । उक्तान्यतमवाचकत्वं चोक्तान्यतमनिष्ठसंबन्धत्वानवच्छिन्नशक्तिनिरूपकत्वम् । अतः संबन्धत्वेनोक्तान्यतमनिष्ठशक्तिनिरूपिकायामपि षष्ठ्यां नातिव्याप्तिः । न च 'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यत्र षष्ठीश्रुत्या गोदोहनस्य पश्वङ्गत्वमिति व्यवहारात्षष्ठ्याः श्रुतित्व इष्टापत्तिरिति वाच्यम् । तथात्वे 'सप्तदशारत्निर्वाजपेयस्य यूपः' इत्यत्र

सप्तदशारत्नित्वस्य श्रौतविनियोगलिप्सया वाजपेयाङ्गत्वापत्तौ वाक्यीययूपाङ्गत्वसिद्धान्तानुपपत्तेः ।

अथ तत्र श्रौतविनियोगसंभवेऽपि यूपपदानर्थक्यभिया तदनङ्गीकारः । तदधिकरणे हि वाजपेयस्य यूपस्य वोद्देश्यत्वमिति संदिह्य यूपस्योद्देश्यतायां बहुव्रीहेरुद्देश्यसमर्पकत्व एकप्रसरताभङ्गः । यूपपदस्य तत्त्वे तु यूपोद्देशेन सप्तदशारत्नित्वविधौ समासार्थमुख्यविशेष्यभूतसंबन्धिनोऽनन्वयात्समासभङ्गापत्तिः । सप्तदशारत्नित्वविशिष्टद्रव्यस्याभेदसंबन्धेनैव विधिस्तु विशेष्यांशस्यातिदेशेन प्राप्तत्वादसंभवी । अतः षष्ठीश्रुत्या सप्तदशारत्नित्वविशिष्टद्रव्यस्य वाजपेयोद्देशेन विधिः । तथा सति अव्यवहितान्वयः प्रकरणानुग्रहश्च संभवति । उक्तद्रव्यस्य वाजपेयासाधारणषोडशिपात्ररूपतया खादिरत्वसादृश्येन गौण्या यूपपदमनुवाद इति पूर्वपक्षयित्वा यूपपदीयस्वार्थत्यागापत्तिभिया न वाजपेयस्योद्देश्यत्वम् । यूपस्योद्देश्यतायां तु वाजपेयपदस्य यूपनिष्ठवाजपेयसंबन्धरूपस्वार्थानुवादकत्वान्न स्वार्थपरित्यागः । अतोऽतिदेशतः पूर्वप्रवृत्त्या यूपोद्देशेनाभेदसंबन्धेन सप्तदशारत्निद्रव्यविधिः । प्राप्ताप्राप्तविवेकेन च विशेषणमात्रे विधेस्तात्पर्यम् । व्यवहितान्वयो गुणान्वयश्च पदानर्थक्यभिया स्वीक्रियमाणो न दोषमावहति । षष्ठीश्रुतिपरित्यागोऽप्यत एव । प्रकरणानुग्रहस्तु यूपस्योद्देश्यतायामपि यूपस्वरूपस्य तत्प्रयोज्यपशुपूर्वस्य च प्रकृतौ सप्तदशारत्नित्वं विनाऽपि जायमानत्वेनाऽऽनर्थक्याद्वाजपेयापूर्वसाधनत्वलक्षणाया आवश्यकत्वान्नानुपपन्नः । अतो यूपपदीयस्वार्थपरित्यागभिया न षष्ठीश्रुत्या वाजपेयस्योद्देश्यत्वमिति सिद्धान्तितम् । वस्तुतस्तु यूपोद्देशेनाभेदसंबन्धेनोक्तद्रव्यविधानस्य कारकाणां परस्परान्वयासंभवेनासंभवाद्यूपपदे यूपकार्यलक्षणया तदुद्देशेनोक्तविशिष्टद्रव्यविधिर्वाच्यः ।

एवं च यूपपदस्य स्वार्थपरित्यागः सिद्धान्तेऽप्यविशिष्टः । अत उक्तरीत्या सिद्धान्तानुपपत्तेर्यूपपदवैयर्थ्यभियैव वाजपेयस्योद्देश्यतानङ्गीकारः । यूपपदार्थस्योद्देश्यत्वे तु वाजपेयापूर्वसाधनत्वलक्षणातात्पर्यग्राहकतयैव वाजपेयपदस्योपयोगान्न वैयर्थ्यम् । न च प्रकरणस्यैव तात्पर्यग्राहकत्वात्तस्य वैयर्थ्यम् । एकतात्पर्यग्राहकानुपस्थितिदशायामपरतात्पर्यग्राहकस्य सार्थक्यसंभवाद्युगपदुपस्थितावपि संभेदे नान्यतरवैयर्थ्यमिति न्यायेन तयोः परस्परवैयर्थ्यानापादकत्वात् ।

इदं तु तत्त्वम् । वाजपेयोद्देशेन सप्तदशारत्निद्रव्यविधेरसंभव एव । वाजपेयासाधारणपात्रस्योपदेशत एव संभवेन ततः पूर्वमेतद्विधिप्रवृत्त्यसंभवात् । इतरथा वषट्कर्तुः समाख्यादिप्रमाणान्तरप्रमितभक्षस्यैव प्राथम्यविशिष्टस्य विधानेनैकप्रसरताभङ्गप्रसङ्गा-

---

१ (अ० ३ पा० १ अ० ९) । आनर्थक्यतदङ्गाधिकरण इत्यर्थः ।

त्रैविध्यासंभवात्क्रियया मतान्तरविधिसिद्धान्तानुपपत्तेः । अतस्तत्रोपदेशतः पूर्वप्रवृत्त्यसंभव एव बीजम्, तच्च तुल्यं प्रकृतेऽपि । सप्तदशारत्नित्वस्योक्तद्रव्यपरिच्छेदकतया विधिस्तु पूर्वोक्तदूषणग्रस्तः । अतो वाजपेयोद्देशेनोक्तद्रव्यविधेरसंभवेनैव षष्ठीश्रुतेरविनियोजकत्वम् । पदानर्थक्यापत्तिमात्रेण षष्ठीश्रुतेरविनियोजकत्वोदाहरणं तु, अन्यन्मृग्यम् । सर्वथा षष्ठ्याः श्रुतित्वेऽपि सप्तदशारत्निवाक्ये तत्प्रमाणकविनियोगस्योक्तप्रकारैरसंभवान्न तत्रत्यसिद्धान्तानुपपत्तिस्तस्याः श्रुतित्वबाधिकेति चेत् । सत्यम् । तथाऽपि 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इतिसूत्रे श्रुतिपदस्यैवंविधश्रुतिवारणाय पदानर्थक्यापादकविनियोगप्रयोजकश्रुतिभिन्नश्रुतिपरतायां गौरवमेव षष्ठ्याः श्रुतित्वे बाधकमिति तद्वारणायोक्तान्यतमवाचकत्वमन्यतमनिष्ठसंबन्धत्वानवच्छिन्नशक्तिनिरूपकत्वरूपं निर्वाच्यमिति मदुन्नीतो नव्यानामाशयः । अत एव नव्यनये 'द्वादशाहीनस्य' इति वाक्यप्रकरणविरोधोदाहरणं न श्रुतिप्रकरणविरोधोदाहरणम् ।

तथा हि । ज्योतिष्टोमे, उपसदो विधाय 'तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य' इति श्रुतम् । तत्र किं द्वादशत्वं प्रकृतावेव निविशत उत द्वादशाहे, इति संदिह्य त्रित्वं तावदुपसदुद्देशेन विधीयते, साह्नोद्देशेन विधावुपसत्पदसामानाधिकरण्यानुपपत्तेः, साह्नपदाभिधेयज्योतिष्टोमस्य त्रिरावृत्त्यापत्तेश्च, उपसत्स्वरूप आनर्थक्यप्रसक्तौ दक्षिणीयावाक्यनयेनोपसत्पूर्वसाधनत्वलक्षणायामपि वस्तुत उपसदां प्रकरणेन ज्योतिष्टोमाङ्गत्वात्तस्य चाह्ना समाप्यमानत्वात्साह्नस्येति पदमुपसदां ज्योतिष्टोमसंबन्धानुवादो न तूद्देश्यविशेषणं वैयर्थ्यात् । अतश्च द्वादशत्वमपि तद्वदेवोपसदुद्देशेन विधीयमानं प्रकृतावेव निविशते । अहीनपदं तु न हीयत इति व्युत्पत्त्या ज्योतिष्टोमानुवादकम् । विकृतित्वाद्यञ्चेनमन्ये क्रतवो न जहति । 'तस्यै समूहः' इत्यनुवृत्तिसहितया 'अह्नः खः क्रतौ' इति स्मृत्याऽहःशब्दस्य क्रतुसमूहवाचिखप्रत्ययान्तत्वविधानात्तस्य चेनादेशविधानादहीनशब्दनिष्पत्तावप्यहःसाध्यक्रतुसमूहत्वस्याहीनपदबोध्यतावच्छेदकस्याभ्याससमूहात्मकज्योतिष्टोमे सत्त्वात्तदनुवादोपपत्तिरिति पूर्वपक्षयित्वा, उपसन्मात्रोद्देशेन द्वादशत्वविधौ संख्याद्वयस्याष्टदोषदुष्टविकल्पापत्तेस्तदङ्गीकारे च

---

१ (अ० ३ पा० ३ अ० ७ सू० १४) । २ उपसदो विधायेति—'अग्निमनीकम्' 'सोमं शल्यम्' 'विष्णुं तेजनम्' इति वाक्यैर्विहिता उपसत्संज्ञकास्त्रयो यागा इत्यर्थः । ३ (अ० ९ पा० १ अ० २) अत्रत्यैवेति शेषः । ४ पा० सू० (४–२–३७) । ५ अष्टदोषेति—प्रतीतप्रामाण्यपरित्यागः, अप्रतीताप्रामाण्यकल्पनम्, परित्यक्तप्रामाण्योज्जीवनम्, कल्पिताप्रामाण्यपरित्याग इति चत्वारो दोषा व्रीहियवयोर्विकल्पे, एकैकस्मिन् शास्त्रे संभाव्यन्त इत्यष्टौ दोषा ज्ञेयाः ।

संख्यान्तरसाधनत्वाभावानुवादकैवकारानुपपत्तेः साह्नाहीनपदवैयर्थ्यापत्तेश्च वैदिकप्रयोगादहीनपदबोध्याहःसाध्यक्रतुविशेषसमूहात्मकाहीनसंबन्ध्युपसदुद्देशेन द्वादशत्वविधिरिति प्राञ्चः सिद्धान्तयामासुः ।

नव्यास्तु—सुबर्थमात्रस्य भावनान्वयनियमेन षष्ठीस्थलेऽपि परस्परान्वयाव्युत्पत्तेरहीनसंबन्ध्युपसदुद्देशेन द्वादशत्वविध्यनुपपत्तेरहीनोद्देशेन द्वादशोपसत्त्वमेवातिदेशतः पूर्वप्रवृत्त्या विधीयते 'तां चतुर्भिः' इति वद्द्वादशत्वविधिरेव फलमित्याहुः ।

वयं तु ब्रूमः । 'पञ्चदशान्यान्याज्यानि' इत्यत्रेव द्वादशपदार्थोपसत्पदार्थयोरन्वयस्याक्लृप्तत्वान्नव्योक्तस्याहीनोद्देशेन द्वादशत्वविधेरप्यसंभवः । 'तां चतुर्भिः' इत्यत्र त्वर्थप्राप्तेः पूर्वप्रवृत्त्याऽऽदानभावनाया एव विधेयत्वात्तत्र चतुःपदार्थवैशिष्ट्यव्युत्पत्तेः समुच्चयफलकविशिष्टविधिसंभव इति वैषम्यम् । अत उपसदुद्देशेनैव द्वादशत्वविधिः । उपसत्स्वरूपे चाऽऽनर्थक्यप्रसक्तौ दीक्षणीयावाङ्नियमन्यायरूपतात्पर्यग्राहकस्य न्यायत्वेन दुर्बलत्वादुपसज्जन्यापूर्वसाधनत्वलक्षणामुपेक्ष्याहीनपदसमभिव्याहाररूपवाक्यस्यैव तात्पर्यग्राहकत्वमुपेत्याहीनापूर्वसाधनीभूतोपसल्लक्षणाऽङ्गीक्रियते । यत्र तु दीक्षणीयावाङ्नियमन्यायेन समं वाक्यस्याविरोधो यथा त्रित्ववाक्ये साह्नपदसमभिव्याहाररूपवाक्यस्य । तत्र न तन्न्यायबाधः । तात्पर्यग्राहकयोरपि च बलाबलमुक्तं तत्र तत्र । यथा 'अभिक्रामं जुहोति' इत्यत्र होमोद्देशेनाभिक्रमणविधौ होमस्वरूप आनर्थक्यप्रसक्तौ दर्शपूर्णमासीयमहाप्रकरणरूपतात्पर्यग्राहकबलात्प्रधानहोमापूर्वसाधनलक्षणेति पूर्वपक्षं विधाय महाप्रकरणापेक्षया प्रबलप्रयाजीयावान्तरप्रकरणरूपतात्पर्यग्राहकबलात्प्रयाजहोमापूर्वसाधनत्वलक्षणेति सिद्धान्तितं तृतीये । यद्यपि दृष्टान्तदार्ष्टान्तिकगतजुहोत्युपसत्पदयोरपूर्वाव्यभिचार एवापूर्वसामान्यसाधनत्वलक्षणातात्पर्यग्राहकः । तथाऽप्यपूर्वविशेषसाधनत्वलक्षणातात्पर्यग्राहकत्वेन वाङ्नियमन्यायादीनामुपन्यासः । यद्वोपसदाश्रितद्वादशत्वस्याहीनोद्देशेन विधिः, पूर्ववाक्य उद्देश्यत्वेनोपास्थितत्वादुपसदामेवाऽऽश्रयत्वम् । उपसत्पदावृत्त्यभावादप्येवमेव युक्तम् । सर्वथा षष्ठ्याः श्रुतित्वाभावादिदं वाक्यप्रकरणविरोधोदाहरणम् । तदपि च द्वादशोपसत्त्वविधायकवाक्याभावं कृत्वाचिन्तया । वस्तुतस्तत्र तद्वाक्यसत्त्वात्तेन सत्रात्मकद्वाशाह इवाहीनात्मकद्वादशाहेऽपि तत्प्राप्तिसंभवाद्द्वादशाहीनस्येति त्रित्वविधेरेवार्थवादः । महतो द्वादशाहस्य महती संख्योचिता, ज्योतिष्टोमस्य तु स्वल्पत्वात्त्रित्वमेव प्रशस्तामिति स्तुतिः । प्राचां मते षष्ठ्याः श्रुतित्वव्यवहारस्तु गौणः । अत एव तेषामत्र श्रुतिप्रकरणविरोधोदाहरणत्वोपन्यासः ।

वस्तुतस्तु नव्योक्तं वाक्यप्रकरणविरोधोदाहरणत्वमप्ययुक्तम् । तथा हि । किं

---

१ (अ० ३ पा० १ अ० १०) इत्यत्रेति शेषः ।

विनियोजकप्रकरणेन सममत्र वाक्यस्य विरोधोऽभिप्रेत उतापूर्वसाधनत्वलक्षणातात्पर्यग्राहकप्रकरणेन । विनियोजकताऽपि किं ज्योतिष्टोममहाप्रकरणस्योतोपसदवान्तरप्रकरणस्य । नाऽऽद्यः । ज्योतिष्टोममहाप्रकरणस्योपसद्गतद्वादशत्वग्राहकत्वायोगाज्ज्योतिष्टोमस्य द्वादशवारमावृत्त्यापत्तेश्च । न द्वितीयः । पूर्वापरवाचनिकाङ्कसंदंशरूपोपसदवान्तरप्रकरणे मानाभावात्पक्षद्वयेऽपि सिद्धरूपत्वाद्द्वादशत्वस्य प्रकरणग्राह्यत्वायोगाच्च । उपसत्पदसमभिव्याहाररूपवाक्यस्यैव त्रित्वांश इव द्वादशत्वांशेऽपि विनिगमनाविरहेण विनियोजकत्वोपपत्तौ प्रकरणस्याविनियोजकत्वाच्च । दीक्षणीयावाङ्नियमन्यायेनो[1]पसज्जन्यापूर्वसाधनत्वे लक्षणीये ज्योतिष्टोममहाप्रकरणस्य तात्पर्यग्राहकता तु न संभावितैव । उपसदवान्तरप्रकरणसत्त्वे तस्य तात्पर्यग्राहकताऽपि, उपसदामपूर्वाव्यभिचारस्यैव तात्पर्यग्राहकस्य सत्त्वान्निराकार्या । उद्देश्यस्यापूर्वव्यभिचारे हि प्रकरणस्यापूर्वसाधनत्वलक्षणातात्पर्यग्राहकत्वं, यथा 'व्रीहीनवहन्ति' इत्यादौ ।

अत एवाऽऽधानप्रकरणे 'वारणो यज्ञावचरः' इति यज्ञसाधनत्वेन श्रुतानां वारणादीना साक्षाद्यज्ञरूपे, आधाने निवेशायोगादानर्थक्यतदङ्गन्यायेनो[2]ऽऽधानाङ्गपवमानेष्टिरूपयज्ञ एव निवेश इत्याशङ्क्य पवमानेष्टीना ' यदाहवनीये जुहोति ' इति स्वप्रकरणस्थवाक्येनाग्न्यङ्गत्वादाधानाङ्गत्वस्यैवाभावे क्वाऽऽनर्थक्यतदङ्गन्यायावकाश इति भाष्यकारमतेन सिद्धान्तमभिधाय वार्तिककारमते तादृशवाक्यानङ्गीकारात्प्रकरणेन पवमानेष्टीनामाधानाङ्गत्वेऽपि यज्ञोद्देशेन वारणादिविधौ यज्ञस्यापूर्वाव्यभिचारेणेहापूर्वसाधनत्वावगमात्तदर्थं प्रकरणानुप्रवेशस्यैवाभावे वारणादीनामाधानाङ्गत्व एव प्रमाणाभावान्न तदङ्गपवमानेष्टिष्ववतार इति सकलयज्ञाङ्गत्वं नव्यैरेव सिद्धान्तितं तृतीये[3] । अतो द्वादशत्वविनियोगविधौ प्रकरणव्यापाराभावान्नेदं श्रुतिप्रकरणविरोधोदाहरणं, न वा वाक्यप्रकरणविरोधोदाहरणम् । अपि तु वाक्ययोः परस्परविरोधोदाहरणम् । पूर्वपक्षिमते वस्तुत उपसदा ज्योतिष्टोमीयत्वाज्ज्योतिष्टोमप्रकरणे द्वादशत्वस्य निवेशः सिद्धान्ते नेत्यतः प्रकरणविरोधोदाहरणत्वेन प्राचीनैर्नवीनैश्च व्यवाह्रियत इति तत्त्वम् । वाक्यप्रकरणविरोधोदाहरणं तु तदवसरे प्रदर्शयिष्यामः । तत्सिद्धं षष्ठ्याः श्रुतित्वाभावात्तद्वारकाविशेषणोपादानम् ।

इदं तु बोध्यम् । कर्तृत्वकर्मत्वादिपदानां वाक्यत्वेनावाचकत्वात्तत्रातिव्याप्त्यसंभवेऽपि कर्तृत्वादिपरतदादिपदादावतिव्याप्तिर्दुर्वारा । न च कर्तृत्वत्वादीन्येवान्यतमत्वेनानुगमय्य तदन्यतमावच्छिन्नशक्तिनिरूपकत्वं लक्षणम् । तदादेस्तु बुद्धिविषयत्वावच्छिन्नत-

---

१ (अ० ९ पा० १ अ० २) अत्रत्येनेति शेषः । २ (अ० ३ पा० १ अ० ९) अत्रत्येनेति शेषः । ३ (अ० ३ पा० १ अ० १२) इत्यत्रेति शेषः ।

वृन्यतमनिष्ठशक्तिनिरूपकत्वमिति न दोष इति वाच्यम् । तद्वादितोऽपि विशेषरूपप्रकारकबोधानुरोधेन विशेषरूपावच्छिन्नशक्तिनिरूपकत्वस्यैव तत्राभ्युपगमात्, कप्रत्यये कर्मत्वत्वस्य शक्यतावच्छेदकतावच्छेदकत्वेन शक्यतावच्छेदकत्वाभावादतिव्याप्तिवारकप्राधान्येनेत्यस्य वैयर्थ्याच्च । सक्तूनिति द्वितीयायाः करणत्वलक्षणायामपि वस्तुतस्ताद्दशान्यतमत्वावच्छिन्नशक्तिनिरूपकत्वानपायादतिप्रसङ्गश्च । अतोऽत्रेदमाकलयामः ।

स्वशक्यतावच्छेदककर्तृत्वत्वाद्यन्यतमावच्छिन्नतात्पर्यकप्रत्ययत्वं श्रुतित्वम् । 'व्रीहीन्प्रोक्षति' इत्यादिवाक्येषु द्वितीयादिश्रुतीनां स्वशक्यतावच्छेदककर्मत्वत्वाद्यवच्छिन्नतात्पर्यकत्वस्य संमार्गाधिकरणादौ निर्णीतत्वाल्लक्षणसमन्वयः । सक्तूनिति द्वितीयायास्तु स्वशक्यतावच्छेदककर्मत्वत्वाद्यवच्छिन्नतात्पर्यकत्वस्य सक्त्वधिकरणे निरस्तत्वान्नातिव्याप्तिः । अत्र स्वशक्यकर्तृत्वाद्यन्यतमतात्पर्यकत्वघटितस्य शेषषष्ठ्यामतिव्याप्तेरवच्छेदकानुधावनम् । तदादिवारणाय प्रत्ययत्वनिवेशः । कर्तृत्वत्वाद्यन्यतमावच्छिन्नतात्पर्यकविभक्तित्वस्य सक्तूनित्यादिकरणत्वादिपरद्वितीयादावतिव्याप्तिवारणाय स्वशक्यतावच्छेदकेति । अत एव 'प्रोक्षिताभ्यामुलूखलमुसलाभ्याम्' इत्यत्र क्तप्रत्ययस्य कर्मत्वविशिष्टे शक्तेः कर्मत्वत्वस्य शक्यतावच्छेदकतावच्छेदकत्वेन शक्यतावच्छेदकत्वाभावान्नातिव्याप्तिः ।

आग्नेय इत्यादि देवतातद्धितस्य संग्राह्यत्वे कर्तृत्वाद्यन्यतममध्ये देवतात्वत्वमप्युपादेयम् । न च देवतात्वविशिष्टद्रव्यवाचकस्य तद्धितस्य देवतात्वस्य शक्यतावच्छेदकत्वाद्देवतात्वत्वं न शक्यतावच्छेदकमिति वाच्यम् । आकृत्यधिकरणन्यायेन देवतात्व एव तद्धितस्य शक्तेर्द्रव्ये लक्षणाङ्गीकारात् । न च 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यादौ राजादिपदोत्तरप्रथमायाः साधुत्वार्थत्वेन कर्तृत्वाद्यन्यतमार्थत्वाभावादव्याप्तिः । अभिहितकारकवाचिनी प्रथमेति मते प्रथमाया अप्याख्यातार्थकर्तृत्वाद्यर्थकत्वात्संभेदे नान्यतरवैयर्थ्यमितिन्यायात्, प्रथमायाः साधुत्वार्थत्वमते श्रुतित्वाभावेऽपि क्षतिविरहात्, 'राजा राजसूयेन यजेत' इत्यादौ राजाद्यङ्गत्वस्य वाक्यप्रमाणकत्वोपपत्तेः । न च राजपदोत्तरप्रथमाया निरर्थकत्वेऽपि राजाङ्गत्वं कर्तृत्वाद्यर्थकाख्यातरूपश्रुतिप्रमाणकमिति शङ्क्यम् । आख्यातस्य कर्तृत्वादिशक्ततायाः कर्त्रधिकरणे निरस्तत्वेन श्रुतित्वाभावात् । कर्तृप्रथमाख्यातयोरसंग्राह्यत्वे श्रुतिलक्षणे कर्तृत्वत्वसाधारणान्यतमत्वनिवेशवैफल्यमिति तु न वाच्यम् । कर्तृतृतीयायाः संग्राह्यत्वात् । न च तथा तस्यान्यलभ्यत्वेन कर्तृत्वकर्मत्वादिघटकीभूतकृतिफलादिवृत्तिधर्माणामेव तत्तद्विभक्तिशक्यतावच्छेदकत्वात्कर्तृत्वत्वादेः शक्यतानवच्छेदकत्वादसंभव इति वाच्यम् । शक्यतावच्छेदकीभूततत्तद्धर्मवृत्त्यन्यतमत्वघटितलक्षणस्यैव विवक्षितत्वात्कर्तृ-

१ (अ० २ पा० १ अ० ४) । २ (अ० २ पा० १ अ० ४ सू० १२) । ३ (अ० १ पा० ३ अ० ९) । ४ (अ० ३ पा० ४ अ० ४) ।

त्वस्याखण्डोपाधिरूपत्वेन कर्तृत्वत्वादेरेव शक्यतावच्छेदकत्वादुक्तलक्षणेऽप्यदोषाच्च ।

ननु 'मैत्रावरुणाय दण्डं प्रयच्छति' इत्यादौ मैत्रावरुणस्यैव भावनोद्देश्यस्य चतुर्थ्यार्थत्वाद्दण्डस्यानीप्सितकर्मत्वेनैवान्वयावगतेरनीप्सितकर्मत्वार्थकदण्डपदोत्तरद्वितीयाया दण्डाङ्गत्वेऽप्रमाणत्वेन श्रुतित्वाभावात्तत्रोक्तलक्षणातिव्याप्तिः । ईप्सितानीप्सितसाधारणकर्मत्वत्वावच्छिन्न एव द्वितीयायाः शक्तेर्दण्डमिति द्वितीयायास्तदवच्छिन्नतात्पर्यकत्वाच्चेति चेन्न । व्याप्यव्याप्यस्य सुतरां व्याप्यत्वमिति न्यायेन मैत्रावरुणस्य भाव्यत्वावगतौ दण्डस्यापि कर्मत्वेनान्वये भावनाया एककर्मकत्वभङ्गापत्तेर्दण्डपदोत्तरद्वितीयायाः करणत्वे लक्षणाङ्गीकारे कर्मत्वत्वावच्छिन्नतात्पर्यकत्वाभावात् । अत एव सर्वत्रानीप्सितकर्मपदोत्तरद्वितीयायाः करणत्वे लक्षणा । सक्तूनित्यत्र विनियोगभङ्गसिद्धान्तोऽपि । अत एव द्वितीयायाः करणत्वपरत्वपर्यवसानम् । अनीप्सितकर्मत्वपरत्वपर्यवसाने इष्टस्यापि[2] भाव्यत्वेन वाक्यभेदापत्तेः ।

किं च द्वितीयाया अनीप्सितकर्मत्वपरत्वे सक्तूनां होमाङ्गत्वे किं प्रमाणम् । न तावच्छ्रुतिः । द्वितीयाया होमाङ्गताप्रयोजककरणत्वशक्तत्वाभावात् । नापि वाक्यम् । उक्तकरणत्वलक्षकत्वाभावात् । न हि शक्त्या कर्मत्वत्वेन लक्षणया वाऽनीप्सितकर्मत्वत्वेनानीप्सितकर्मत्वोक्तिः सक्तूनां होमाङ्गत्वं गमयति । प्रमाणान्तरं तु होमाङ्गतायामसंभावितमेव । न च 'सोमेन यजेत' इत्यत्र मत्वर्थलक्षणापक्षे सोमनिष्ठकरणत्वस्य शक्त्या लक्षणया वा विभक्त्यनुक्तत्वेन श्रुतिवाक्ययोः सोमनिष्ठयागाङ्गतायां प्रमाणत्वासंभवेऽपि विशेषणविधिरूपकल्पितश्रुतेरेव प्रमाणत्वमुपेयते, एवमिहापीति वाच्यम् । यजिपदसमभिव्याहाररूपतात्पर्यग्राहकबलेन सोमपदे सोमकरणके करणतासंबन्धेन सोमवति वा लक्षणाया यजिपदसमभिव्याहृतसोमपदरूपवाक्यस्यैव सोमनिष्ठयागाङ्गत्वे प्रमाणत्वात् । विशेषणविधेस्तु सोमकर्तव्यताबोध एव व्यापारात् । अत एवाङ्गत्वघटकीभूतकर्तृत्वाद्यन्यतमावगतिः श्रुतवाक्यात्, विध्यन्वयावगतिस्तु विशेषणविधितः । विशेषणविधौ हि सोमकरणकभावनाया विध्यन्वये स्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतावच्छेदकत्वसंबन्धेन विधिविशिष्टत्वरूपविध्यन्वयित्वावगतिः । करणत्वांशे तु सोमस्वरूपांश इव विशेषणविधिरनुवाद एव । प्रकृते तु सक्तूनामनीप्सितकर्मत्वेनान्वये होमाङ्गताप्रयोजकसक्तुनिष्ठकरणतायाः श्रुतवाक्यादनवगतेः । अत एव करणतावाचकपदघटितविशेषणविधिकल्पनायामपि मानाभावात्तस्यापि होमाङ्गत्वे प्रमाणत्वाभावान्निष्प्रमाणकमेव सक्तूनां होमाङ्गत्वम् । श्रुतविधौ हि कर्तृत्वाद्यन्यतमस्य यस्यावगतिस्तद्वाचकपदघटितविशेषणविधिः कल्प्यते । यथा 'सोमेन

१ (अ० ४ पा० २ अ० ६) । दद्यादिति शेषः । २ अदृष्टरूपस्येत्यर्थः ।

यजेत ' इत्यत्र तृतीयान्तपदघटितः। ' अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति ' इत्यत्र ' पदे जुहोति ' इत्यत्र च सप्तम्यन्तपदघटितः, न तु सोमवाक्येऽधिकरणतावाचकपदघटितः पदे[1]वाक्ये करणतावाचकपदघटितः । तथा सक्तुवाक्ये सक्तूनामनीप्सितकर्मत्वावगतौ तद्वाचकपदघटित एव विशेषणविधिः कल्प्येत न तु करणतावाचकपदघटित इति न तत्प्रमाणकत्वमङ्गत्वस्य । अतो द्वितीयायाः करणत्वलक्षणया वाक्यप्रमाणकहोमाङ्गत्व एव विनियोगभङ्गात्सिद्धान्तपर्यवसानमित्यवगच्छामः । अतोऽनीप्सितकर्मवाचकपदोत्तरद्वितीयायाः करणत्वपरत्वात्कर्मत्वत्वावच्छिन्नतात्पर्यकत्वाभावेन न श्रुतिलक्षणातिप्रसङ्गः । ' आचान्तेन कर्म कर्तव्यम् ' ' व्रीहीन्प्रोक्षति ' ' व्रीहिभिर्यजेत ' ' विप्राय गां ददाति ' ' उत्तरार्धात्स्विष्टकृते समवद्यति ' 'यदाहवनीये जुहोति' इत्यादीनि क्रमेण कर्तृत्वादिवाचकश्रुत्युदाहरणानि । ' गोदोहनेन पशुकामस्य प्रणयेत्' इत्यादौ षष्ठीश्रुत्या गोदोहनस्य पश्वङ्गत्वमिति षष्ठ्याः श्रुतित्वव्यवहारस्तु गौण इति ध्येयम् ।

केचित्तु—अङ्गत्वप्रमाणान्तर्भूता श्रुतिस्त्रिविधा । विधात्री, अभिधात्री विनियोक्त्री चेति । विधात्री लिङादिश्रुतिः । अभिधात्री व्रीह्यादिश्रुतिः । विनियोक्त्री त्रिविधा । विभक्तिरूपा, समानपदरूपा, समानाभिधानरूपा च । एतत्सकलसाधारणस्य निरपेक्षो रवः श्रुतिरिति प्रवादस्य यच्छब्दज्ञानमन्यव्यवधानमनपेक्ष्य यदर्थज्ञानं जनयति सा तस्मिन्नर्थे श्रुतिरित्यर्थः । न च विनियोजकमानप्रस्तावे विधात्र्यभिधात्रीसाधारणलक्षणकथनं तन्निर्देशश्चासंगताविति शङ्क्यम् । विधिविनियोज्योपस्थापनेन विधिसहकारित्वस्य तयोरपि तुल्यत्वात् । शेषशेषित्वाभिमतयोस्तत्तद्रूपेणानुपस्थितयोः संबन्धबोधो व्यवधानमनपेक्ष्य यच्छब्दज्ञानेन जन्यते सा विनियोक्त्री । संबन्धश्चाङ्गत्वात्मना साधनत्वत्वात्मना संबधत्वात्मना वा प्रतीयताम् । न तद्विशेषो लक्षणे लक्ष्यते । तेन 'दीक्षिष्यमाणः ' इत्यादौ लटः, तृतीयाषष्ठीपदश्रुतीनां च संग्रह इत्याहुः ।

तदतीव मन्दम् । शक्तत्वरूपाभिधात्रीत्वस्योक्तश्रुतित्वव्यापकतया तदवच्छिन्नविभाजकोपाधित्वानुपपत्तेः । न च समानपदश्रुतेर्यजेतेत्यादिरूपाया यागभावनयोः संबन्धरूपार्थे श्रुतित्वेन तत्र च शक्तत्वरूपाभिधात्रीत्वाभावान्न तस्य श्रुतित्वव्यापकत्वमिति वाच्यम् । तथाऽपि श्रुतिविभाजकोपाध्यन्तरसमानाधिकरणत्वेनाभिधात्रीत्वस्य तद्विभाजकोपाधित्वासंभवात्समानपदश्रुत्या शेषशेषिणोः संबन्धरूपार्थज्ञाने जननीये स्वघटकपदार्थज्ञानस्यापेक्षणीयत्वेन त्वदुक्तश्रुतित्वस्य समानपदश्रुताव भावेनाभिधात्रीत्वस्योक्तव्यापकत्वस्यापि सुवचत्वात् । अत एव श्रुतिलक्षणस्य समानपदश्रुताव्याप्तेस्तस्या

---

१ ' पदे जुहोति ' इत्यस्मिन्वाक्य इत्यर्थः ।

लक्षणत्वकथनमप्यसंगतम् । न च पदार्थोपस्थित्यतिरिक्तव्यवधायकानपेक्षत्वमुक्तलक्षणघटकमिति नाव्याप्तिरिति वाच्यम् । 'उच्चैर्ऋचा क्रियते' इत्यादौ संसर्गमर्यादया भासमानशेषशेषिसंबन्धके वाक्येऽतिव्याप्तेः । किं च सक्तूनित्यत्र प्राथमिकद्वितीयाज्ञानेन करणत्वज्ञाने जननीये शक्योपस्थितिलक्षणाज्ञानादिरूपव्यवधायकापेक्षणेऽपि करणत्वशक्यसंबन्धेन द्वितीयावदिति ज्ञानेन करणत्वज्ञाने जननीये व्यवधायकान्तरानपेक्षणाद्द्वितीयायाः करणत्वे श्रुतित्वापत्तिः । अनपेक्षान्तवैयर्थ्याच्च । यच्छक्त्या पदार्थज्ञानं जनयति, यद्यत्र शक्तं तत्तत्र श्रुतिरित्यस्यैव सुवचत्वात् ।

अपि च श्रौताङ्गत्वव्यवहारविषयीभूतश्रुतित्वस्य विधाऽयभिधात्रीसाधारणे 'सक्तून् जुहोति' 'धेनुर्दक्षिणा' इत्यादौ वाक्यीयाङ्गत्वबोधेऽपि विधिविनियोज्योपस्थापनेन विधिप्रातिपदिकरूपविधाऽयभिधाऽयोः सहकारितयाऽङ्गत्वप्रमाणतावच्छेदकं श्रुतित्वं विधिप्रातिपदिकादिव्यावृत्तमेव वाच्यम् । एवं विनियोक्त्रीलक्षणे समानाभिधानसमानपदश्रुतिसंग्रहाय स्वघटकपदार्थोपस्थितिभिन्नत्वं व्यवधाने विशेषणमावश्यकम् । तथा च संसर्गमर्यादया भासमानशेषशेषिसंबन्धके 'धेनुर्दक्षिणा' इत्यादिवाक्येऽतिव्याप्तिः । 'सक्तून् जुहोति' इत्यत्र करणत्वं द्वितीयालक्ष्यमिति द्वितीयाज्ञानेन व्यवधानमनपेक्ष्य करणत्वरूपसंबन्धबोधाद्द्वितीयादेर्विनियोजकश्रुतित्वापत्तिश्चेति न किंचिदेतत् । अतः समानाभिधानसमानपदश्रुत्यादिषु श्रुतित्वव्यवहारस्य गौणत्वमङ्गीकृत्य कारकविभक्त्यसाधारणमस्मदुक्तलक्षणमेवोचितमित्यलं पल्लवितेन ॥

(इति-श्रुतिनिरूपणम् ।)

॥ अथ लिङ्गं निरूप्यते ॥

सामर्थ्यं लिङ्गमिति प्राञ्चः । तदुक्तम्—सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते, इति । नव्यास्तु—अङ्गत्वघटकीभूतोद्देश्यताकृतिकारकत्वयोरन्यतरवाचकपदकल्पनानुकूलाक्लृप्तपदार्थनिष्ठयोग्यता लिङ्गम् । यथा 'स्रुवेणावद्यति' इत्यत्र द्रवद्रव्यमित्युद्देश्यतावाचिपदकल्पनानुकूलस्रुवकरणकावदाननिष्ठयोग्यता लिङ्गम् । यथा वा 'अध्वर्युं वृणीते' इत्यादिसंस्कारविध्यन्यथानुपपत्त्या वृतेनाध्वर्युणा यच्छक्नुयात्तत्कुर्यादिति संस्कार्यविनियोगकल्पनास्थले करणत्ववाचितृतीयाद्यन्तपदकल्पनानुकूलक्लृप्तसंस्कारनिष्ठयोग्यता । 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्रेष्वप्यनेन मन्त्रेण बर्हिर्लवनं प्रकाशयेदित्यादिस्वप्रतिपाद्यार्थकृत्स्नोद्देश्यतास्ववृत्तिकरणतादिवाचकपदकल्पनानुकूलयोग्यता लिङ्गम् । तच्च तत्त-

त्पदरूपश्रुतिकल्पनाद्वारा तत्तत्पदार्थं प्रति तत्तत्पदार्थस्याङ्गत्वे प्रमाणमित्याहुः । मृदादौ घटाद्यनुकूलाया यागादौ स्वर्गाद्यनुकूलायाश्च योग्यताया वारणायानुकूलान्तम् ।

तत्र कृतिकारकत्वपदं श्रुतिलक्षण इव कृत्यन्वितकर्तृत्वाद्यन्यतमपरम् । ‘ स्रुवेणावद्यति ’ इत्यत्रोद्देश्यतावाचकपदस्यैव कल्पनेन स्रुवकरणकावदाननिष्ठयोग्यतायाः कर्तृत्वाद्यन्यतमवाचकपदकल्पनानुकूलत्वाभावादव्याप्तिरतः परोद्देश्यतानिवेशः । कृतिकारकत्वादिनिवेशे प्रयोजनं तु यत्र संस्कारविध्यन्यथानुपपत्त्या संस्कार्यस्य क्लृप्तशेषिवाक्य एव तृतीयाद्यन्तपदकल्पनया विनियोगो न तूद्देश्यविधेयवाचकपदघटितसमस्तवाक्यकल्पनं यथा ‘ यदि सोमं न विन्देत पूतीकानभिषुणुयात् ’ इत्यादौ पूतीकानामभिषवसंस्कार्यत्वान्यथानुपपत्त्या ‘ सोमेन यजेत ’ इत्युत्पत्तिवाक्य एव सोमाभावे पूतीकैरिति तृतीयाद्यन्तपदकल्पनम् । तत्र संस्कारनिष्ठयोग्यतायामुद्देश्यतावाचकपदकल्पनानुकूलत्वाभावेनाव्याप्तिवारणम् । विकृतिनिष्ठप्रकृतिसादृश्ये प्रकृतिसंबन्धिभिरङ्गैर्विकृतिमुपकुर्यादित्युद्देश्यताकृतिकारकतान्यतरवाचकपदकल्पनानुकूलत्वादतिव्याप्तिवारणाय योग्यतेति ।

अत्र पूर्वोक्तन्यायेनोद्देश्यताकर्तृत्वाद्यन्यतमान्यतरत्वस्य गुरुत्वात्कर्तृत्वकर्मत्वकरणत्वसंप्रदानत्वापादानत्वाधिकरणत्वान्यतमवाचकपदकल्पनानुकूलयोग्यतेत्यत्रैव प्रकृतलक्षणतात्पर्यम् । अथ ‘ सोमेन यजेत ’ इत्यादिविशिष्टविध्यन्यथानुपपत्तिप्रसूतविशेषणविधिकल्पनानुकूलयोग्यतायामतिप्रसक्तिर्दुर्वारा । न हि सोमादौ लैङ्गिकमङ्गत्वं केनापि व्यवह्रियत इति चेन्न । यतः सोमाद्यङ्गत्वस्य लिङ्गप्रमाणकत्वेऽपि सोमादिपदे मत्वर्थलक्षणापक्षे सोमे वाक्यीयमङ्गत्वम् । सोमकरणत्वस्य परम्परया भावनान्वयवादिनां नव्यानां मते तु ‘ प्राधान्येन व्यपदेशा भवन्ति ’ इति न्यायेन वाक्यीयाङ्गत्वस्य श्रौताङ्गत्वस्यैव वा व्यवहारो न तु लैङ्गिकाङ्गत्वस्य, ‘ यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्या ’ इत्यादौ ब्राह्मणवाक्यस्यापि लिङ्गतः प्राबल्यावगमादिति । ‘ प्रयाजशेषेण हवींष्यभिघारयति ’ इत्यत्र हविरुद्देशेन प्रयाजशेषकरणकाभिघारणविधिमभ्युपेत्याऽऽर्थिकविधिना प्रयाजशेषोद्देशेनाभिघारणरूपप्रतिपत्तिविधिमभ्युपगच्छतां नये, आर्थिकविधिकल्पनानुकूलयोग्यतायामतिव्याप्तिस्तु तत्र लैङ्गिकाङ्गत्व इष्टापत्त्यैवानाशङ्क्या । न च तत्र प्रयाजशेषीयप्रतिपत्त्याकाङ्क्षयैव प्रतिपत्तिविधेः कल्पनात्तस्य लिङ्गकल्प्यत्वाभावेन लैङ्गिकाङ्गत्वाभावः । अभिघारणनिष्ठयोग्यतया विधिकल्पनायामाकाङ्क्षायाः सहकारित्वेन लिङ्गस्यैव तत्राभिघारणनिष्ठप्रयाजशेषाङ्गतायां प्रमाणत्वात् । तत्राऽऽकाङ्क्षायाः प्रमाणत्वेऽङ्गत्वप्रमाणविभागव्याकोपात्पाके समर्थस्यापि देवदत्तस्य पाकाकाङ्क्षाभावे पाके विनियोगादर्शनेनाऽऽकाङ्क्षां विना लिङ्गस्य क्वाप्यविनियोजकत्वात्सर्वत्राऽऽकाङ्क्षाया एवाङ्गत्वप्रमाणत्वापत्तौ लिङ्गप्रामाण्यानापत्तेश्च ।

अथ श्रुतविधिना प्रयाजशेषकरणकाभिघारणस्य हविरुद्देशेन विधावभिघारणे प्रयाजशेषस्य विनियुक्तत्वेन प्रतिपत्त्याकाङ्क्षाया अभावादार्थिकविधिकल्पनानुपपत्तिः । न च यथा ' उत्तरार्धात्स्विष्टकृते समवद्यति ' इत्यत्रोत्तरार्धस्यापादानतया गुणत्वेन विनियुक्तस्याप्यार्थिकविधिकल्पनया प्रतिपाद्यत्वं तथेहापीति वाच्यम् । तत्र त्यागांशं प्रति विनियुक्तस्याप्युत्तरार्धस्य प्रक्षेपांशीयप्रयोजनाकाङ्क्षयाऽऽर्थिकविधिकल्पनया प्रक्षेपांशं प्रति प्रतिपाद्यत्वोपपत्तावपि प्रकृतेंऽशभेदाभावेन तदनुपपत्तेः ।

एतेन ' मैत्रावरुणाय दण्डं प्रयच्छति ' इत्यत्र दण्डकरणकदानस्य मैत्रावरुणोद्देशेन विधिरिति सिद्धान्ते दीक्षितदण्डस्य दीक्षाभिव्यञ्जकालम्बनोपयुक्तस्य दानेऽपि विनियोगासंभवाच्छ्रुतविधेर्दण्डान्तरप्रयोजकशक्तिकल्पनागौरवपरिहारायाऽऽर्थिकदानप्रतिपत्तिकल्पनया दण्डस्य दानप्रतिपाद्यत्वम् । प्रतिपत्तेश्च कार्यसंकोचकत्वस्य कृष्णविषाणास्थले क्लृप्तत्वात्कार्यसंकोचेन दीक्षितदण्डविषयत्वसिद्धिरिति नव्यैरुक्तम् । तथेहाभिघारणे विनियुक्तस्य श्रुतविधेर्धारणाक्षेपशक्तिकल्पनागौरवपरिहारायोत्थाप्यप्रतिपत्त्याकाङ्क्षयाऽऽर्थिकप्रतिपत्तिविधिं कल्पयित्वा प्रतिपाद्यत्वमस्तु, ' दोषो नानुमिते ह्यसौ ' इति न्यायेनाऽऽर्थिके प्रतिपत्तिविधौ धारणप्रयोजकत्वशक्तिकल्पनस्यादोषत्वादिति निरस्तम् । तत्र समर्पणमात्रेणैव मैत्रावरुणोपकारसिद्धेस्त्यागांशेन दण्डप्रतिपत्त्यर्थताया नव्यैरेवोक्तत्वात्प्रकृते तद्रीतेरसंभवात् ।

किं च प्रयाजशेषविशिष्टाभिघारणविधौ विशेषणविधेरावश्यकत्वात्तस्यैव धारणाक्षेपशक्तिकल्पनोपपत्तौ न श्रुतविधौ तत्कल्पनप्रयुक्तगौरवावकाशः । मैत्रावरुणायेत्यत्र तु न विशेषणविधिकल्पनं लघीय इति वैषम्यम् । तैत्तिरीयशाखायां ' यद्दीक्षितदण्डं प्रयच्छति ' इति प्रतिपत्तिविधेः श्रुतत्वेन तत्र तदकल्पनाच्चेति चेन्न । श्रुतविधौ प्रयाजशेषकरणत्वस्य भावनायामन्वयेऽपि यागार्थताबोधस्योत्तरकालीनविशेषणविध्यधीनत्वात्ततः पूर्वं प्रयाजशेषीयप्रतिपत्त्याकाङ्क्षाया अनिवृत्तेर्विशेषणविधेरिव प्रतिपत्तिविधेरपि प्रतिपत्त्याकाङ्क्षासहकृतलिङ्गरूपसामग्रीसत्त्वेन कल्पनोपपत्तेः । न चैवं विशेषणविधेरपि कल्प्यत्वाविशेषेण विनिगमनाविरहाद्धारणाक्षेपशक्तिकल्पनापत्तेर्दैक्षे हृदयाद्यभिघारणार्थं वाजपेये प्राजापत्यवपाभिघारणार्थं च शेषस्य धारणीयत्वापत्तिः । तथा च प्रतिपत्तेरेव धारणप्रयोजकत्वोपगमेन संनिहितहविःषु च शेषसमापनोक्तिश्चतुर्थोक्ता विरुध्येतेति वाच्यम् । कालान्तरीयहविरभिघारणार्थं पात्रान्तरोत्पादनगौरवस्यैव विनिगमकत्वेन प्रतिपत्तिविधेरेव धारणाक्षेपशक्तिकल्पनेनाविरोध इत्याशयेन नव्यमतमव्यतासंभवात् ।

---

१ (अ० ४ पा० १ अ० १४) इत्यत्रेति शेषः ।

इदं च लिङ्गं द्विविधम् । सामान्यसंबन्धबोधकप्रमाणसापेक्षं तदनपेक्षं चेति । स्वप्रमेयोद्देश्यतावच्छेदकव्यापकधर्मावच्छिन्ननिरूपितस्वप्रमेयाङ्गतानिष्ठसंबन्धबोधकप्रमाणसापेक्षत्वं सामान्यसंबन्धबोधकप्रमाणसापेक्षत्वम् । अस्ति चेदं 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्रलिङ्गे । अत्र मन्त्रलिङ्गकल्प्यश्रुतौ न लवनत्वेन लवनस्योद्देश्यता । विनाऽपि मन्त्रं प्रकारान्तरेण स्मृत्वा लवनसंभवेनाऽऽनर्थक्यात् । अपि त्वपूर्वीयलवनत्वेन । न च तेन रूपेण मन्त्राद्बोधः संभवति । तस्य लवनत्वमात्रेण बोधकत्वात् । न चापूर्वीयलवनत्वेन बोधं विनाऽनेन मन्त्रेणापूर्वीयलवनं प्रकाशयेदिति निरुक्तोद्देश्यतावच्छेदकावच्छिन्नवाचकपदघटितश्रुतिकल्पनं संभवति । अतोऽपूर्वीयलवनत्वेन बोधार्थं प्रकरणादिरूपप्रमाणान्तरमपेक्षणीयम् । तत्र दर्शपूर्णमासप्रकरणेऽस्य मन्त्रस्य पाठाद्दर्शपूर्णमाससंबन्धि किंचिदनेन प्रकाशयेदित्यवगते किं तदित्यपेक्षाया लवनमिति मन्त्रलिङ्गतोऽवगम्यते । अतो मंन्त्रलिङ्गप्रमेयदर्शपूर्णमासापूर्वसंबन्धिलवनत्वव्यापकदर्शपूर्णमासापूर्वसंबन्धित्वावच्छिन्ननिरूपितमन्त्रनिष्ठसंबन्धबोधकप्रमाणसापेक्षत्वादस्य लिङ्गस्य सामान्यसंबन्धबोधकप्रमाणसापेक्षत्वम् । एवं पूषानुमन्त्रणमन्त्रे यागानुमन्त्रणामिति समाख्यया यागसामान्यापूर्वसंबन्धि किंचिदनेन मन्त्रेण प्रकाशयेदित्यवगते किं तदित्यपेक्षायां पूषेति मन्त्रलिङ्गादवगम्यते । अतो लिङ्गप्रमेयपूषनिष्ठत्रिजातीययागापूर्वसाधनत्वरूपोद्देश्यतावच्छेदकव्यापकयागसामान्यापूर्वसाधनत्वावच्छिन्ननिरूपितमन्त्रनिष्ठसंबन्धबोधकसमाख्यासापेक्षत्वाल्लिङ्गस्य निरुक्तप्रमाणसापेक्षत्वम् । यत्र तूद्देश्यस्वरूप आनर्थक्याभावेनापूर्वसाधनत्वादिबोधार्थं न प्रकरणाद्यपेक्षा । यथा, अर्थज्ञानस्य सामर्थ्यात्कर्मानुष्ठानाङ्गत्वे । तत्र लिङ्गस्य सामान्यसंबन्धबोधकप्रमाणानपेक्षत्वम् ।

लिङ्गस्य चाशब्दत्वेनाविधायकत्वाद्विहितत्वघटितनिरुक्ताङ्गत्वे साक्षात्प्रमाणत्वासंभवेन विधायकश्रुतिकल्पनानन्तरितप्रामाण्यस्यानन्तरितप्रामाण्यश्रुतितो दौर्बल्यम् । अत एव 'कदाचन स्तरीरसि' इतीन्द्रप्रकाशिकाया ऋचो यावल्लिङ्गादिन्द्रोपस्थानार्थत्वं कल्प्यते तावत् 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति श्रुत्या गार्हपत्योपस्थानार्थत्वमैन्द्र्यधिकरणे निरूपितम्[1] । न चोपक्रमस्थताद्धितश्रुत्यैन्द्राङ्गत्वावगमान्न गार्हपत्योपस्थानाङ्गत्वमिति वाच्यम् । लाघवात्त्यज्यमानद्रव्योद्देश्यत्वसमनियताखण्डोपाधिरूपदेवतात्वशक्तस्य तद्धितस्य प्राधान्येन प्रतिपाद्यत्वरूपसखण्डोपाधिरूपदेवतात्वे लक्षणाङ्गीकारेण प्रकृते तद्धितस्य श्रुतित्वाभावादिन्द्रोद्देशेन विधावेकप्रसरताभङ्गापत्तेश्च । चयनप्रकरणपठितत्वेनैन्द्र्येति वचनेन चयनानुपयोगीन्द्रप्रकाशकत्वेन विधानानुपपत्तेश्च । गार्हपत्यस्य तु साधनत्वेन चयनासंबन्धित्वेऽपि चयनसंस्कारार्थत्वोपपत्तिः । अतश्च शक्त्योपस्थितेन्द्रप्रकाशकत्वमा-

---

१ (अ० ३ पा० २ अ० २)।

दायेन्द्रीति संज्ञामुपपाद्य गौणसामर्थ्यसहकृततृतीयाश्रुत्या गार्हपत्यप्रकाशकत्वमै-न्द्र्या ऋच इति ध्येयम् । मुख्यसामर्थ्यरूपलिङ्गविरोधिगौणसामर्थ्यस्य श्रुतिसहाय-स्यैवाङ्गं न स्वतो विनियोजकत्वम् । अत एव दर्शपूर्णमासप्रकरणपठितस्य ' बर्हिर्दे-वसदनं दामि ' इति मन्त्रस्य शक्त्या बर्हिर्लवनाङ्गत्वं न तु गौण्योलपराजिलवना-ङ्गत्वमित्युक्तं तृतीये ॥

(इति— लिङ्गनिरूपणम् ।)

=====

॥ अथ वाक्यं निरूप्यते ॥

पदसमभिव्याहारो वाक्यम् । यथा ' धेनुर्दक्षिणा ' ' उच्चैर्ऋचा क्रियते ' इत्यादौ । ' ऐन्द्या गार्हपत्यमुपतिष्ठते ' इत्यादिश्रुतिस्थले पदसमभिव्याहाररूपवाक्यसत्त्वेऽपि ' प्राधान्येन व्यपदेशा भवन्ति ' इति न्यायेन श्रौताङ्गत्वस्यैव व्यवहारो न तु वाक्यी-याङ्गत्वस्येति प्राञ्चः । नव्यास्तु, अङ्गत्वघटकीभूतपरोद्देश्यताकृतिकारकत्वान्यतर-पदार्थकल्पनानुकूलः श्रुतपदसंनिधिः । कल्पनाशब्देन च सांसर्गिकविषयताशालिशाब्द-बोधलक्षणाजन्यशाब्दबोधान्यतरद्विवक्षितम् । अतः संसर्गविधया भासमानकरणता-कस्य ' धेनुर्दक्षिणा ' ' उच्चैर्ऋचा क्रियते ' इत्यादेः, लक्षणया भासमानकर्मत्वस्य ' प्रयाजशेषेण हवींष्यभिघारयति ' ' सक्तून् जुहोति ' इत्यादेश्च संग्रहः । श्रुतिघटित-पदसंनिधेरङ्गत्वघटकीभूतपरोद्देश्यताकृतिकारकत्वान्यतरनिरूपितसांसर्गिकविषयताशालि-शाब्दबोधलक्षणाजन्यशाब्दबोधान्यतररूपनिरुक्तकल्पनानुकूलत्वाभावान्नातिव्याप्तिरित्या-हुः । पूर्ववदङ्गत्वैकदेशबोधप्रयोजकत्वेनाङ्गत्वप्रमाणत्वसूचनायाङ्गत्वघटकीभूतेति, न त्वङ्गत्वघटकत्वस्य लक्षणे निवेशः । प्रयोजनाभावात् । परोद्देश्यताकृतिकारकत्वपदेन च कर्तृत्वकर्मत्वकरणत्वसंप्रदानत्वापादानत्वाधिकरणत्वान्यतमं विवक्षितम् । संसर्गमर्या-दया भासमानकरणताके लिङ्गकल्पितवाक्येऽतिव्याप्तिवारणाय श्रुतेति । कर्तृत्वाद्यन्यत-तमशक्तिज्ञानाजन्यकर्तृत्वाद्यन्यतमशाब्दबोधप्रयोजकपदसमभिव्याहारो वाक्यमिति तु ज्यायः ।

नीलो घट इत्यादिसमभिव्याहारवारणाय प्रयोजकान्तम् । श्रुतिस्थलीयपदसमभि-व्याहारवारणायाजन्यान्तं शाब्दबोधविशेषणम् । ' धेनुर्दक्षिणा ' इत्यादिपदसमभिव्या-हारप्रयोज्यशाब्दबोधस्य धेन्वादिशक्तिज्ञानजन्यत्वात्प्रथमतः कर्तृत्वाद्यन्यतमेति । नीलो घट इत्यादिपदसमभिव्याहारवारणाय द्वितीयं कर्तृत्वाद्यन्यतमेति । निरुक्तशाब्दबोध-

---

१ (अ० ३ पा० २ अ० १) ।

प्रयोजकत्वं निरुक्तशाब्दबोधानुकूलाकाङ्क्षायोग्यतादिमत्त्वम् । तेन करणत्वाद्यनुगृहीतनृतीयादिशक्तिकस्य विपरीतव्युत्पन्नस्य 'व्रीहिभिर्यजेत' इत्यादिश्रुतिस्थलीयपदसमभिव्याहारात्कर्तृत्वाद्यन्यतमसंसर्गकव्रीह्यादिप्रकारकयागादिविशेष्यकशाब्दबोधेऽपि नातिव्याप्तिरिति ध्येयम् ।

नन्वेवम् 'औदुम्बरो यूपो भवति' इत्यादौ वाक्योदाहरणत्वापत्तावौदुम्बरताया वाक्यीययूपाङ्गत्वमुपेक्ष्य 'पशूनाप्नोति' इति द्वितीयादिश्रुतिप्रमाणकपश्वङ्गत्वस्यैवोचितत्वादौदुम्बराधिकरणसाधितयूपाङ्गत्वविरोधः । अत एव संनिध्यनुग्रहादपि न वाक्यीययूपाङ्गत्वाङ्गीकार इति चेन्न । यूपकर्तृकभवनाक्षिप्तायां भावनायां यूपेतरस्य कर्मत्वेनान्वेतुमयोग्यत्वात्, आश्रयालाभेन च श्रौतपश्वङ्गत्वायोगात्तत्र वाक्यीययूपाङ्गत्वस्वीकारात् । न च 'सोमापौष्णं त्रैतमालभेत पशुकामः' इति प्रकृतस्य त्रिवर्षपशुसाध्यस्य यागस्यौदुम्बराश्रयत्वं संभवति । न च स्वसाधनद्रव्यपरिच्छेदद्वारकाश्रयत्वासंभवेऽपि, अतिदेशप्राप्तपशुनियोजनाङ्गयूपपरिच्छेदद्वारकाश्रयत्वसंभवः । यूपस्येव जुह्वादीनामतिदेशप्राप्तत्वेन तत्परिच्छेदस्यापि द्वारतापत्तौ यूपानुवादानुपपत्तेः । अत एवाऽऽतिदेशिकपशुनियोजनं यूपद्वाराऽऽश्रय इत्यपि न ।

अथ 'यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्या' इत्यत्रावदानानुवादेन पञ्चत्वविधिमङ्गीकृत्य हृदयाद्यवदानेऽपि पञ्चत्वसिद्धिः सिद्धान्तिता दशमे । वपापदमवयुत्यानुवाद उपलक्षणं वा सत्सर्वानुवादः । तथाऽत्रापि यूपपदमवयुत्यानुवाद उपलक्षणं वा स्यादिति चेन्न । तत्र हि हृदयादिषु पञ्चावदानाभावे चतुरवदानघटकद्व्यवदानस्यातिदेशादेव प्राप्तेः 'एकादश वै पशोरवदानानि तानि द्विर्द्विरवद्यति' इत्यस्य वैयर्थ्यापत्त्याऽवदानस्य निरुक्तानुवादत्वस्वीकारः । तदा हि, अवदानमात्रोद्देशेन पञ्चत्वविधौ हृदयाद्यवदानेष्वपि पञ्चत्वप्राप्तेर्हविषत्र्यवदानप्राप्तौ द्व्यवदानविधिस्तद्व्यावर्तकत्वेन सार्थकः । न च हृदयादिष्वपि जामदग्न्यादीनां पञ्चावदानस्यातिदेशादेव प्राप्तेस्तेषां हविषत्र्यवदानप्राप्तौ द्व्यवदानविधिः सार्थक इति नव्योक्तं युक्तमिति वाच्यम् । तथाऽपि विधेः पाक्षिकफलत्वमुपेक्ष्य वपापदस्यैकस्यैव पाक्षिकानुवादत्वौचित्यात् । प्रकृते तु न कस्यापि वैयर्थ्यादिकमिति किमिति यूपपदस्य पाक्षिकानुवादत्वाङ्गीकारः ।

इदं च प्राचीनाभ्युपेतवाक्यार्थानुसारेणोक्तम् । वस्तुतस्तु, अवदानोद्देशेन पञ्चत्वविधौ हृदयादिवाक्यैर्हृदयाद्येकादशेतराङ्गेष्ववदानस्य परिसंख्यातत्वाद्वपायामवदानस्यैवाभावे पञ्चत्वप्रसक्त्यभावाद्वपानुवादानुपपत्तेरेकप्रसरताभङ्गापत्तेश्च नायं वाक्यार्थः समञ्जसः । किं तु पञ्चत्वविशिष्टावदानान्तरस्यातिदेशतः पूर्वप्रवृत्त्या पञ्चत्वविशिष्टप्रा-

१ (अ० १ पा० २ अ० ३) । २ (अ० १० पा० ७ अ० १८) इत्यत्रेति शेषः ।

कृतावदानस्य वा वपोद्देशेन विधिस्तस्यैवोपस्थितत्वात् । हृदयादिवाक्ये हृदयाद्युद्देशेन विधिरिति हृदयादिषु तदङ्गपञ्चत्वप्राप्तिरिति नव्यमताश्रयणे न वपापदस्यावयुत्यानुवादत्वादिप्रसक्तिः । परं तु नव्यमतेऽवदानविधिसमकालप्रवृत्तानां हृदयाद्यवदानविधीनां तदुत्तरप्रवृत्तौ द्व्यवदानविधिपाक्षिकफलकत्वापत्त्यतिरिक्तप्रबलप्रमाणं न पश्यामः।

किं च पञ्चत्वविशिष्टावदानान्तरस्य वपोद्देशेन विधाववदानोद्देशेन पञ्चत्वविशेषणविधिकल्पनायामवदानस्वरूप आनर्थक्यप्राप्तौ वपाभ्यासापूर्वसाधनत्वलक्षणाया आवश्यकत्वाद्धृदयाद्यवदानेषु कथं पञ्चत्वप्राप्तिः । न ह्यभ्यासविशेषधर्मस्याभ्यासान्तरे प्राप्तिः संभवति । उपदेशस्याभ्यासविशेषविषयत्वात्, अतिदेशस्याभ्यासयोः प्रकृतिविकारभावाभावेनासंभवात् । पञ्चत्वविशिष्टप्राकृतावदानस्यैव वपोद्देशेन विधौ तु प्रकृतविधेरेव वपाभ्यासापूर्वसाधनीभूतावदाने पञ्चत्वविधौ तात्पर्यान्नावदानान्तरे पञ्चत्वविधिः संभवतीति तदधिकरणसिद्धान्तश्चिन्त्य एवेति न वपापदद्दृष्टान्तेन यूपपदस्यावयुत्यानुवादत्वादीति । अतश्चाऽऽश्रयालाभान्न पशूद्देशेनौदुम्बरत्वविधिः संभवतीति वाक्याद्यूपाङ्गत्वमेवौदुम्बरतायाः । न च प्रकारान्तरेणाऽऽश्रयालाभेऽपि प्रकृतवाक्य एवौदुम्बरत्वकरणकपशुकर्मकयूपाश्रयकभावनाविधानाद्यूपात्मकौदुम्बरत्वाश्रयलाभः । आश्रयत्वस्य साध्यत्वातिरिक्तस्य दुर्वचत्वेन भावनाया अनेककर्मकत्वाद्वाक्यभेदापत्तेः ।

यत्तु राणके[1] 'अतिदेशप्राप्तस्य पशुनियोजनस्य यूपद्वाराऽऽश्रयत्वमाशङ्क्य प्रकृतौ हि प्रत्यक्षोपदिष्टस्य होमप्रणयनादेः पश्चात्साधनापेक्षाया पयश्चमसादिवत्फलार्थस्यापि गोदोहनादेराश्रयीभूतसाध्यापेक्षादर्शनादुभयाकाङ्क्षावशात्साधनत्वमवसीयते । न चैतावताऽङ्गत्वप्रसङ्गः । तादर्थ्येन विधानाभावात् । अत एव गुणकामप्रयोगे प्रासङ्गिकोपकारिणा गोदोहनादिना कार्यसिद्धौ चमसादेरनङ्गत्वेन तदभावे वैगुण्याभावः । विकृतौ त्वखण्डकरणोपकारमुखेन क्लृप्तोपकारप्राकृतखादिरत्वादिविशिष्टस्यैव पशुनियोजनस्यातिदेशात्साधनानाकाङ्क्षस्य परार्थविहितसाधनान्तरग्राहकत्वं न युक्तम् । अन्यतराकाङ्क्षाहेतुकस्य संबन्धस्येतराकाङ्क्षोद्भावनपूर्वकत्वाद्विधिमन्तरेण चाऽऽकाङ्क्षानुत्थापनात्' इति परिहृतम् । तच्चिन्त्यम् । प्रणयनस्य श्रुत्यवगताङ्गताकचमसेन निराकाङ्क्षतया गोदोहनाश्रयत्वस्योभयाकाङ्क्षालभ्यत्वासंभवाद्गोदोहनादेः फलसाधनताबोधनसमकालमेव हि प्रणयने चमससाध्यत्वबोधः, तदैव प्रणयनस्य नैराकाङ्क्ष्यं गोदोहने फलसाधनत्वान्यथानुपपत्तिमूलकाकाङ्क्षाबललभ्यः, प्रणयने गोदोहनसाध्यत्वबोधस्तु तदुत्तरकालीन इति सर्वतो बलवती ह्यन्यथानुपपत्तिरिति न्यायेन गोदोहनीय-

---

[1] राणकापरनामधेयन्यायसुधायामौदुम्बराधिकरणे (अ० १ पा० २ अ० २ सू० २२) इत्यत्र महेशोमेश्वरोक्तमनुवदति—यत्तु राणक इत्यादिना।

फलसाधनत्वान्यथानुपपत्त्या निराकाङ्क्षस्यापि प्रणयनस्याऽऽकाङ्क्षामुत्थाप्य गोदोहनाश्रयत्वाङ्गीकारः । काम्यं नित्यस्य बाधकमिति न्यायेन काम्यप्रयोगे चमसस्यानङ्गत्वम् । इत्थमेव चोत्पत्तिशिष्टसोमेन निराकाङ्क्षस्यापि ज्योतिष्टोमस्य फलोद्देशेन विधीयमानोद्भिद्गुणाश्रयत्वमुद्भिदधिकरणे पूर्वपक्षाद्युक्तं संगच्छते । अत एव प्रबलप्रमाणावगतसाधनान्तरावरुद्धक्रियायाः फलार्थगुणाश्रयत्वं स्थानप्रमाणकमेव । दध्याद्याश्रयत्वस्य प्राकरणिकत्वव्यवहारस्तु संनिधिपाठनिबन्धनः । अतः प्राकृतखादिरत्वावरुद्धेऽपि यूपे, औदुम्बरतानिवेशसंभवादाश्रयत्वं संभवत्येवेत्यस्मदुक्तरीत्यैवाऽऽश्रयत्वखण्डनमित्यलमनया प्रासङ्गिकचिन्तया ।

न च ' धेनुर्दक्षिणा ' ' उच्चैर्ऋचा क्रियते ' ' सह श्रपयति ' इत्यादिषु यथाक्रमं दक्षिणोद्देशेनाभेदसंबन्धेन धेनोः, ऋग्वेदविहितकर्मोद्देशेन मन्त्रघटितपरम्परासंबन्धेनोच्चैष्ट्वस्य, श्रपणोद्देशेन स्वरूपसंबन्धेन साहित्यस्य च विधेयत्वात्कर्तृत्वाद्यन्यतमत्वस्य शाब्दबोधाविषयत्वेनाव्याप्तिरिति वाच्यम् । वस्तुतो धेन्वादीनां करणत्वेन भावनान्वयस्यैव तत्तदुदाहरणे विवक्षितत्वात् । तथा हि । ' धेनुर्दक्षिणा ' इत्यत्र तावत्सुबन्तयोः परस्परान्वयाभावात् । ' न हि क्रियारहितं वाक्यमस्ति ' इति न्यायेन क्रियापदाध्याहार आवश्यकः । तत्र च भावनाया भाव्यापेक्षाया दक्षिणापदस्य दक्षिणाकार्यपरतया भाव्यसमर्पकत्वम् । करणाकाङ्क्षाया च करणतासंसर्गेण धेनुपदार्थस्य धेनुपदोत्तरप्रथमाया वा करणत्वलक्षणया धेनुकरणत्वस्य भावनायामन्वयः । धेनुदक्षिणयोरभेदबोधस्तु पार्ष्ठिकः । धेनुत्वैकत्वयोर्विधाने वाक्यभेदस्तु विशिष्टकारकविधानादनाशङ्क्यः ।

एवम् ' उच्चैर्ऋचा क्रियते ' इत्यत्र वेदोपक्रमानुरोधाद्धातुना, ऋग्वेदविहितकर्मलक्षणात्तस्य च प्राप्तत्वेन भावनायामुद्देश्यत्वेनान्वये जाते करणाकाङ्क्षायामुच्चैष्ट्वस्य मन्त्रघटितपरम्परासंबन्धावच्छिन्नकरणतासंसर्गेण भावनान्वयः । न तु मन्त्रघटितपरम्परासंबन्धमात्रेण । तथात्वे भावनायाः करणाकाङ्क्षोपशान्त्यभावात् । एवं ' सह श्रपयति ' इत्यत्रापि प्रामाणान्तरप्राप्तश्रपणोद्देश्यकभावनाया साहित्यस्य कर्तृत्वाद्यन्यतमसंसर्गेणैवान्वयः । तथा हि । दर्शपूर्णमासयोः ' यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात्स त्रेधा तण्डुलान्विभजेत् । ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत् । ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुम् । येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम् ' इति श्रुतम् । तत्रामावास्याकर्मणश्चन्द्राभ्युदयावच्छिन्नदिनप्रारम्भे निमित्ते त्रेधा तण्डुलानिति वाक्येनापनीतपूर्वदेवतासंबन्धकानां प्रकृतहविषामेव देवतान्तरसंबन्धबोधनार्थानि त्रीण्युत्तरवाक्यानि न तु कर्मान्तरविधायकानि ।

---

१ (अ० १ पा० ४ अ० १) ।

अपरित्यक्तपूर्वकर्मसंबन्धकप्रकृतहविषामेव देवतान्तरसंबन्धात् । अत एव पूर्वहविर्देवतान्तरसंबन्धस्य निरूपकीभूतयागापेक्षायाम् ' ऐन्द्रवायवं गृह्णाति ' इत्यत्रेव पूर्वप्रकृतयागा एव निरूपकाः । अत आग्नेयस्य मध्यमादिभेदेन वारत्रयमावृत्तिः । दधियागपयोयागयोः स्थविष्ठाणिष्ठसाध्ययागाभ्यां साम्यासाम्यां सह तन्त्रेणानुष्ठानमिति सिद्धान्तितं षष्ठे । तत्र च मध्यमाद्युद्देशेन दातृत्वादिगुणविशिष्टदेवताविधिः । समानाधिकरणपदस्थले परस्परान्वयस्य क्लृप्तत्वात् । अतो न विधेयानेकत्वनिमित्तको वाक्यभेदः । उत्तरवाक्ययोः द्रव्यद्वयोद्देश्यत्वप्रयुक्तवाक्यभेदस्तु स्वीक्रियते । अभ्युदितेष्टिप्रकरणस्थ ' सह श्रपयति ' इति वाक्येन संप्रतिपन्नदेवताकहविषः सहश्रपणविधानाच्चरुत्वाधिकरणत्वे आर्थिके अनूद्येते । अतो द्रव्यदेवताविशिष्टभावनान्तरविधिपक्षे गौरवापत्तेर्द्रव्योद्देशेन देवतान्तरविधिपक्ष एव श्रेयानिति प्राञ्चः ।

नव्यास्तु—समानाधिकरणपदस्थले परस्परान्वयस्वीकारे ' पञ्चदशान्याज्यानि ' इत्यत्रापि स्तोत्रोद्देशेन पञ्चदशत्वसंख्याविशिष्टाज्यविधानापत्तेः, उत्तरवाक्ययोः स्थविष्ठादिप्रकृतिकस्य पुरोडाशेन समं सहश्रपणापत्त्या चरुत्वविधेरप्यावश्यकत्वात् , द्रव्योद्देशेन देवतान्तरविधिपक्षे विधेयानेकत्वनिमित्तकवाक्यभेदापत्तेः, द्रव्यदेवतातद्गुणचरुत्वादिविशिष्टभावनान्तरविधिपक्ष एव श्रेयानित्याहुः । तत्र च श्रपणविधिं विनैव श्रपणस्य प्राप्तत्वात् , ' सह श्रपयति ' इत्यनेन संप्रतिपन्नदेवताकहविःश्रपणोद्देशेन साहित्यं विधीयते । तच्चैककालावच्छेदेनैकपात्राधिकरणकत्वम् । निरुक्तैकपात्राधिकरणतासंबन्धेनाऽऽधारतानिरूपकाधेयतासंबन्धेन भावनान्वयीति कर्तृत्वाद्यन्यतमस्य शाब्दबोधविषयत्वान्नोक्तातिप्रसङ्गः । यद्वैकपात्रवृत्त्येककालावच्छिन्नाधिकरणत्वसंबन्धेन भावनान्वयीति नोक्तदोषः । न च श्रपणानुकूलकृतिरूपभावनाया आत्मवृत्तित्वान्निरुक्तसंबन्धैर्निरुक्तसाहित्यविशिष्टत्वासंभवः । 'यजेत स्वर्गकामः' इत्यत्र स्वर्गनिरूपितकरणतासंबन्धेन भावनायां यागविशिष्टत्ववच्छ्रपणानुयोगिकनिरुक्ततत्तत्संबन्धेन निरुक्तसाहित्यविशिष्टत्वस्यापि प्रकृतभावनायां संभवात् । यदि तु तत्र करणतानिरूपकोद्देश्यकत्वमेव संबन्धः । तर्हि प्रकृतेऽपि निरुक्ततत्तत्संबन्धानुयोगिश्रपणोद्देश्यकत्वमेव संबन्ध इति न काप्यनुपपत्तिः ।

अथ श्रपणोद्देशेन साहित्यविधौ दध्नः, पयसः श्रपणाभावात्तत्र कथं साहित्यप्रतीतिः । अत एवायं साहित्यविशिष्टश्रपणविधिः । तत्राऽऽग्नेयद्रव्ये श्रपणप्राप्तावपि दधिपयसोस्तत्प्राप्तिरेव विशेषणांशे विधेः फलमिति प्राचीनैरुक्तम् । भवन्मते तु श्रपणांशे विध्यनङ्गीकाराद्दधिपयसोः श्रपणं न स्यात् , नितरां च तदुद्देशेन विधीयमानं साहित्यमिति चेत् । सत्यम् । दधिपयसोर्न प्रमाणान्तरेण श्रपणप्राप्तिः । तथाऽपि श्रपणो-

१ (अ० ६ पा० ५ अ० १) इत्यत्रेति शेषः । २ संप्रतिपन्नदेवताकेति—एकदेवताकेत्यर्थः ।

द्देशेन साहित्यविधौ केनचित्साहित्यावश्यकत्वेऽनुपस्थितयत्किंचिद्द्रव्यस्य साहित्यनिरूपकत्वकल्पने गौरवाल्लाघवेन प्रदानसाहित्यनिरूपकत्वेन क्लृप्तयोर्दधिपयसोरेव तन्निरूपकत्वं कल्प्यते । तथा च प्रहरणे शाखासाहित्यवशेन शाखाप्रहरणवदाग्नेयद्रव्यश्रपणे दधिपयःसाहित्यवशेन दधिपयसोरपि श्रपणविधिः । एवं च तृतीयविधिप्रकाराश्रयणेन प्राप्त्युपपत्तौ प्राचां पञ्चमविधिप्रकाराश्रयणमपि, अप्रामाण्यं प्रकटयति । न च संप्रतिपन्नदेवताकहवि श्रपणस्यैवोद्देश्यतायां प्रमाणाभावात्, श्रपणमात्रस्योद्देश्यत्वे मध्यमसाध्ययागाभ्यासीयश्रपणेऽपि केनचित्साहित्यापत्तिरिति वाच्यम् । लाघवानुरोधेन प्रदानसाहित्यनिरूपकनिरूपितसाहित्यस्यैवात्र विधेयत्वेन पुनराधेयन्यायेन विधेयसामर्थ्यानुरोधेनोद्देश्यसंकोचात्संप्रतिपन्नदेवताकहविःश्रपणस्यैवोद्देश्यत्वे मध्यमसाध्ययागीयश्रपणे साहित्याप्रसक्तेरिति ध्येयम् ।

केचित्तु—समभिव्याहारो वाक्यमिति प्राचीनप्रवादस्य साध्यत्वादिवाचकद्वितीयाद्यभावे सति वस्तुतः शेषशेषिणोः सहोच्चारणं वाक्यमित्यर्थः । स्वप्रकृत्यर्थनिष्ठशेषित्वबोधिकानां विभक्तीनां शेषिपदोत्तरत्वेन, स्वप्रकृत्यर्थगतशेषत्वबोधिकानां च शेषपदोत्तरत्वेनाभावे सति, इति सत्यन्तार्थः । तेन प्रयाजशेषाभिघारणसक्त्वादिविनियोजकवाक्यसंग्रहः । शेषशेषिणोर्वाचकपदयोरेकान्वयबोधोपयोगिसंनिधिविशेषेणोच्चारणमिति शेषशेषिणोः सहोच्चारणमित्यस्यार्थः । तेन न प्रकरणविषयातिप्रसङ्ग इत्याहुः । तत्तु स्वत्वाननुगमादुपेक्षणीयम् । निरुक्तलक्षणं ब्राह्मणवाक्यस्यैव । मन्त्रवाक्यं तु, एकान्वयबोधोपयोगिमन्त्रपदसमभिव्याहारः । अत एव 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां निर्वपामि' इति मन्त्रे कर्तृत्वाद्यन्यतमशक्तिज्ञानाजन्यस्य कर्तृत्वाद्यन्यतमसंसर्गकस्य कर्तृत्वाद्यन्यतमलक्षणाज्ञानजन्यस्य वा कर्तृत्वाद्यन्यतमशाब्दबोधस्याजननेऽपि, उक्तपदसमभिव्याहाररूपवाक्यान्तरात्, देवस्य त्वादिपदानां स्वार्थविशिष्टनिर्वापप्रकाशनद्वारा निर्वापाङ्गत्वम् । विधिवाक्यमन्त्रवाक्ययोरयमपरो विशेषः । यद्विधिवाक्ये कर्तृत्वाद्यन्यतमलक्षणया संसर्गविधया तद्भानाङ्गीकारेण वा स्वत एव विनियोजकत्वम् । मन्त्रवाक्ये तु देवस्य त्वादिपदैर्निर्वापं प्रकाशयेदित्यादिवाक्यान्तरकल्पनया । देवस्य

---

१ अत्र चैवं विधिप्रकारा अनुसंधेयाः । शुद्धधात्वर्थकरणकभावनाविधिः, आद्यो विधिप्रकारः । यथा 'अग्निहोत्रं जुहोति' इति । अन्योद्देशेन तद्विधिरपरः । यथा 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति । धात्वर्थोद्देशेनान्यकरणकभावनाविधिस्तृतीयः । यथा 'दध्ना जुहोति' इति । अन्योद्देशेनान्यकरणकभावनाविधिश्चतुर्थः । यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इति । गुणविशिष्टधात्वर्थकरणकभावनाविधिः पञ्चमः । यथा 'सोमेन यजेत' इति । अन्योद्देशेन गुणविशिष्टधात्वर्थकरणकभावनाविधिः षष्ठः । यथा 'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' इति । अत्र च पूर्वपूर्वविधिप्रकारापेक्षयोत्तरोत्तराणां दौर्बल्यमनुसंधेयम् । २ (अ० ६ पा० ४ अ० ८) अग्रस्येनेति शेषः ।

त्वादिपदानां मन्त्रघटकपदार्थत्वाभावेन विध्यभावेन च मन्त्रवाक्यस्य स्वतोऽविनियोजकत्वात् । विध्यभावादेव च देवस्य त्वादिपदार्थानां निर्वापाङ्गत्वमपि न स्वतो मन्त्रवाक्यगम्यम् । अपि तु श्रुतिघटकवाक्यान्तरकल्पनयेति बोध्यम् । अत्र विधिवाक्यस्य योग्यताज्ञानं विना लक्षणया संसर्गविषया वा कर्तृत्वाद्यन्यतमबोधकत्वाभावेन योग्यतारूपलिङ्गानुमापकत्वेनाङ्गत्वप्रमाणत्वेऽपि न लिङ्गतो दौर्बल्यम् । प्रत्युत सश्रुतिकवाक्यान्तरकल्पनया प्रमाणभूताल्लिङ्गात्स्वतो विनियोजकत्वेन प्रबलत्वमेव । अत एवाग्नीषोमीयप्रकरणपठितस्य ' त्वं ह्यग्ने प्रथमो मनोता ' इति मनोतामन्त्रस्य केवलाग्निप्रकाशकस्योभयदेवत्याग्नीषोमीये विनियोगासंभवाज्ज्योतिष्टोममहाप्रकरणरूपसामान्यसंबन्धबोधकप्रमाणसहकृतलिङ्गेन केवलाग्निदेवताके सवनीय उत्कर्षप्राप्तौ ' यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्या ' इति ब्राह्मणवाक्येन लिङ्गबाधेनाग्नीषोमीयाङ्गत्वमित्युक्तं दशमे[1] ।

मन्त्रवाक्यस्य तु सामर्थ्यकल्पनाद्वारा सश्रुतिकवाक्यान्तरकल्पकस्य द्व्यन्तरितप्रामाण्यकतया श्रुतिकल्पनारूपैकान्तरितप्रामाण्यकाल्लिङ्गाद्दुर्बलत्वम् । अत एव ' स्योनं ते सदनं करोमि । घृतस्य धारया सुशेवं कल्पयामि । तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः ' इत्येकान्वयबोधोपयोगिपदसंनिधिरूपाद्वाक्यात्संपूर्णस्य सदनाङ्गत्वप्रसक्तौ तद्बाधेन लिङ्गात्पूर्वार्धस्य सदने, उत्तरार्धस्य सादनेऽपि विनियोगः । तच्छब्दस्तु ' तप्ते पयसि दध्यानयति । सा वैश्वदेव्यामिक्षा ' इत्यत्रेव वाक्यान्तरीयार्थपरामर्शकत्वेन युज्यत इत्युक्तं बलाबलाधिकरणे[2] ।

(इति—वाक्यनिरूपणम् ।)

=====

।। अथ प्रकरणं निरूप्यते ।।

अथ किं प्रकरणम् । न तावत्संनिधिपठितत्वम् । सर्वस्यैव यत्किंचित्संनिधिपठितत्वेन सर्वाङ्गत्वापत्तेः । न च तत्संनिधिपठितत्वं तद्विनियोजकप्रकरणमिति विशिष्य निर्वचनान्नोक्तदोषः । अङ्गानां प्रधानसंनिधिपठितत्वेन प्रधानाङ्गित्वापत्तेः । दर्शपूर्णमासयोर्गोदोहनसंनिधिपठितत्वेन तदङ्गत्वापत्तेश्च । अथाश्रुतभाव्यकतत्संनिधिपठितत्वं तद्विनियोजकप्रकरणं, प्रधानानां श्रुतभाव्यकत्वान्नोक्तदोष इति चेत् । न । समिद्यागस्याश्रुतभाव्यकतनूनपाद्यागसंनिधिपठितत्वेन तनूनपाद्यागाङ्गित्वापत्तेः । अथ श्रुतभाव्यकत्वे सति अश्रुतभाव्यकतत्संनिधिपठितत्वं तद्विनियोजकप्रकरणम् । समिद्यागस्याश्रुतभाव्यकतनूनपाद्यागसंनिधिपठितत्वेऽपि श्रुतफलकत्वाभावान्नोक्तदोषः । गोदोहनस्य

---

१ (अ० १० पा० ४ अ० २०) इत्यत्रोक्ति शेषः । २ (अ० ३ पा० ३ अ० ७) ।

दर्शपूर्णमासाङ्गत्ववारणायाश्रुतमाव्यकेति चेत् । विश्वजितो विकृतित्वेन प्रकरणित्वाभावात्तत्राव्याप्त्यभावेऽपि पिण्डपितृयज्ञस्य श्रुतफलकत्वाभावेन स्वाङ्गप्रकरणित्वानापत्तेः । प्रयाजादीनां श्रुतभाव्यकप्रोक्षणाङ्गत्वापत्तेश्च । अतोऽशक्यनिर्वचनं प्रकरणमिति चेत् । न । संनिधिपठितत्वे सति, इतिकर्तव्यताकाङ्क्षाया एव प्रकरणपदार्थत्वात् । तत्संनिधिपठितत्वविशिष्टकथंभावाकाङ्क्षा तद्विनियोजकप्रकरणमिति तु निष्कर्षः ।

अस्ति चेदं प्रयाजादिविनियोजकदर्शपूर्णमासादिकरणकभावनाकथंभावाकाङ्क्षात्मकप्रकरणे । दर्शपूर्णमासादीनां प्रयाजादिसंनिधिपठितत्वात् । दर्शपूर्णमासादिषु दीक्षणीयादिप्रकरणित्ववारणाय, विकृतेः प्राकृताङ्गप्रकरणित्ववारणाय च विशिष्टान्तम् । प्रयाजादीनां पुरोडाशादिरूपद्रव्याङ्गत्ववारणाय कथंभावाकाङ्क्षेति । तदुक्तम् , ‘ असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात् ’ इति । प्रमाणान्तरासंयुक्तमितिकर्तव्यतार्थित्वरूपात्प्रकरणादङ्गमिति सूत्रार्थः । अत्र श्रुत्यादिप्रमाणान्तरविनियुक्तस्य प्रोक्षणादेः प्रयोजनाकाङ्क्षारूपसहकारिकारणविरहान्न प्रधानीयकथंभावाकाङ्क्षारूपप्रकरणादङ्गत्वम् । प्रयाजादेरेव प्रयोजनाकाङ्क्षारूपसहकारिकारणवशादङ्गत्वमिति प्रकरणविनियोज्यविषयविशेषसूचनाय प्रमाणान्तरासंयुक्तत्वोक्तिः, न तु तस्य लक्षणे निवेशः, प्रयोजनाभावात् । प्रधानीयप्रयोजनाकाङ्क्षारूपसहकार्यभावादेवाङ्गानां प्रधानसंनिधिपठितत्वविशिष्टकथंभावाकाङ्क्षावत्त्वेऽपि न प्रधानानामङ्गाङ्गत्वम् । न च समिद्यागादेः प्रयोजनाकाङ्क्षारूपसहकारिसत्त्वात्तनूनपाद्यागाङ्गत्वापत्तिरिति वाच्यम् । तनूनपादादेरितिकर्तव्यताकाङ्क्षाकाले समिदादेः प्रयोजनाकाङ्क्षाभावात् । तनूनपादादेः फलवत्त्वावगमोत्तरं हि, इतिकर्तव्यताकाङ्क्षा तदवगमश्च, प्रधानभावनाया इतिकर्तव्यताकाङ्क्षया प्रधानभावनान्वये सति भवेत्, प्रधानभावनेतिकर्तव्यताकाङ्क्षायां च स्वप्रयोजनाकाङ्क्षारूपसहकारिवशात्तनूनपात इव समिधोऽप्यन्वयान्नैराकाङ्क्ष्यमिति न तनूनपाद्यागाङ्गत्वापत्तिः । अत एव ज्योतिष्टोमाश्रितानां ‘ पशुकाम उक्थ्यं गृह्णीयात् ’ इत्यादिकाम्यसंस्थानां दीक्षणीयादिसंनिहितत्वविशिष्टकथंभावाकाङ्क्षावत्त्वेऽपि न प्रकरणाद्दीक्षणीयादीनां संस्थाङ्गत्वम् । अन्यप्रयुक्ताश्रयसापेक्षगुणफलसंबन्धविधेः पूर्वं दीक्षणीयाद्यङ्गानामाश्रयीभूतज्योतिष्टोमभावनान्वयावश्यकत्वेन प्रयोजनाकाङ्क्षाभावात् । अतो गुणभावनाया इतिकर्तव्यताकाङ्क्षायामाश्रयतोऽतिदेशादेव धर्मप्राप्तिरिति नाऽऽश्रयसामानविध्यमित्युक्तं तृतीये, प्रयोजनाकाङ्क्षाविरहादेव च न फलार्थगुणस्याऽऽश्रयाङ्गत्वम् । पिण्डपितृयज्ञस्य तु श्रुत्याद्यविनियुक्ताङ्गसत्त्वेऽपि न विनिगमनाविरहात्तदङ्गत्वप्रसक्तिः । कालश्रवणस्यैव प्राधान्ये

---

१ (अ० ३ पा० ३ अ० ४ सू० ११) । २ (अ० ३ पा० ६ अ० १६) इत्यत्रेति शेषः ।

विनिगमकत्वात् । कालादिश्रवणाद्यविशेषे तु पिण्डपितृयज्ञवच्छ्रुत्याद्यविनियुक्तस्यापि फलार्थत्वापत्तेर्न परस्पराङ्गत्वापत्तिः । विकृतिसंनिधिपठितोपहोमानां तु स्वसंनिधिपठितत्वविशिष्टविकृतिभावनाकथंभावाकाङ्क्षारूपप्रकरणसत्त्वेऽपि न ततोऽङ्गत्वम् । उपहोमेभ्यः क्लृप्तोपकारकत्वेन पूर्वान्वितैः प्राकृताङ्गैः कथंभावाकाङ्क्षायाः शान्तत्वनोपहोमविनियोगबोधाव्यवहितपूर्वं निरुक्तप्रकरणाभावात् । अपि तु संनिधिरूपस्थानवशाद्विकृत्याकाङ्क्षामुत्थाप्य तत एवाङ्गत्वम् । न चैवमुत्थाप्याकाङ्क्षायां प्रकरणलक्षणातिव्याप्तिः । तस्या अपि स्थानकल्प्यप्रकरणत्वेन लक्ष्यत्वात् । उपहोमेषु प्राकरणिकाङ्गत्वव्यवहारापत्तिस्तु लिङ्गविनियोज्यमन्त्रेषु श्रौताङ्गत्वापत्तिवत्क्लृप्तनिरुक्तकथंभावाकाङ्क्षाया एव तद्व्यवहारनियामकत्वेन निराकार्येति बोध्यम् ।

नव्यास्तु–अवगतफलसंबन्धसंनिहितवाक्यप्रमितपदार्थवृत्ति यत्पूर्वप्रमाणानवगताङ्गताकविषये, इतिकर्तव्यतात्वप्रकारकापेक्षणं तत्प्रकरणम् । अस्ति च दर्शपूर्णमासादौ प्रयाजादिविषये तत् । समिद्यागस्य प्रकरणात्तनूनपाद्यागाङ्गत्ववारणायावगतफलसंबन्धेति पदार्थविशेषणम् । प्रयाजादीना प्रकरणादसंनिहितज्योतिष्टोमाद्यङ्गत्ववारणाय संनिहितवाक्यप्रमितेति तद्विशेषणम् । अङ्गस्य पूर्वप्रमाणानवगताङ्गताकेति विशेषणाच्च न प्रोक्षणादीनां श्रुतिलिङ्गवाक्यैरवगतव्रीह्याद्यङ्गभावाना प्रकरणाद्दर्शाद्यङ्गत्वापत्तिः । 'वामदेव्यं गायति' इत्यादौ प्रमाणान्तरेणानवगताङ्गताकसामविषयेऽवगतफलसंबन्धस्य स्तोत्रस्य स्वसाधनीभूतऋगक्षराभिव्यक्त्यर्थमपेक्षासत्त्वात्प्रकरणेनाङ्गत्वप्रसक्तौ तद्व्यावृत्त्यर्थमितिकर्तव्यतात्वेनेति विशेषणम् । तस्य ऋगक्षराभिव्यक्त्यर्थं सामापेक्षायामपि सिद्धसामापेक्षाया-मितिकर्तव्यतात्वप्रकारकत्वाभावादित्याहुः । अत्र समिद्यागादौ तनूनपाद्यागाङ्गत्वस्य प्रोक्षणादीना प्रकरणाद्दर्शपूर्णमासाङ्गत्वस्य चोक्तरीत्या वारणसंभवादवगतफलसंबन्धेति पूर्वप्रमाणानवगताङ्गताकेति च विशेषणं सूत्रस्थासंयुक्तत्वरूपविशेषणवद्विनियोगप्रयोजकप्रकरणशरीरे प्रकरणविनियोज्यविषयविशेषबोधनार्थमेव ।

अस्तु वा तनूनपादादौ समिद्यागप्रकरणित्वव्यवहाराभावाद्व्यवहारप्रयोजकप्रकरणशरीरेऽवगतसंबन्धेति विशेषणम् । दर्शपूर्णमासादौ प्रोक्षणादिप्रकरणित्वव्यवहारस्य तु सर्वानुभवसिद्धत्वात्तद्वारकविशेषणोपादानं तु, अनुचितमेव ।

अस्तु वा गोदोहनादौ प्रयाजादिप्रकरणित्वव्यवहाराभावात्पूर्वप्रमाणानवगताङ्गताकेति स्वपूर्वप्रवृत्तप्रमाणानवगताङ्गताकेत्यर्थकम् । न तु प्रकरणपूर्वोद्दिष्टश्रुतिलिङ्गवाक्यानवगताङ्गताकेत्यर्थकम् । दर्शपूर्णमासादौ प्रोक्षणादिप्रकरणित्वव्यवहारानापत्तेः । गोदोहनभावनाकथंभावाकाङ्क्षातः पूर्वप्रवृत्तदर्शपूर्णमासभावनाकथंभावाकाङ्क्षारूपप्रकरणेन प्रयाजादीनामङ्गतावगमात्तु न गोदोहनादिषु तत्प्रकरणित्वव्यवहारः । अत इदं

व्यवहारप्रयोजकप्रकरणलक्षणम् । विनियोजकप्रकरणलक्षणं तु, अस्मदुक्तमेव । तनूनपादादिषु समिदादिविनियोजकप्रकरणसत्त्वेऽपि समिदादीनामुक्तरीत्या तदङ्गत्वस्य वारयितुं शक्यत्वादिति तत्त्वम् ।

केचित्तु—उभयाकाङ्क्षा प्रकरणम् । सा च फलाकाङ्क्षाविशिष्टकथंभावाकाङ्क्षा । वैशिष्ट्यं च स्वाश्रयभावनासंनिहितभावनाश्रितत्वसंबन्धेन । न त्वेकपुरुषावगतत्वादिना । तेन न विश्वजिदादेः प्रकरणेन दर्शाङ्गत्वम् । उक्तसंबन्धेन यदीयफलाकाङ्क्षाविशिष्टा, निर्णीततदनङ्गत्वकगता या कथंभावाकाङ्क्षा सा तद्विनियोजकप्रकरणमिति निष्कर्षः । उक्तं हि ' असंयुक्तं प्रकरणादितिकर्तव्यतार्थत्वात् '[1] इति । अत्र पञ्चम्याः सामानाधिकरण्यात्कथंभावाकाङ्क्षैव प्रकरणमित्यवसीयते । असंयुक्तपदं च फलाकाङ्क्षोपस्थापकम् । न तु संनिपातिनिवारणमित्याहुः[2] । तदतीव मन्दम् । तथा हि, विनियोगफलोपधायकप्रकरणस्य वेदं लक्षणं तत्स्वरूपयोग्यस्य वा । नाऽऽद्यः । स्वाश्रयभावनासंनिहितभावनाश्रितत्वसंबन्धेन प्रयाजादिभावनीयफलाकाङ्क्षाविशिष्टायां श्रुतभाव्यकत्वेन निर्णीतप्रयाजाद्यनङ्गत्वकप्रोक्षणादिभावनागतकथंभावाकाङ्क्षायां प्रयाजविनियोगरूपफलानुपधायकायामतिव्याप्तेः । प्रधानकथंभावाकाङ्क्षारूपप्रकरणेन फलवत्त्वेऽवगते तनूनपाद्यागीयकथंभावाकाङ्क्षोदयान्निर्णीतानङ्गत्वकतनूनपाद्यागगतायां तस्यामुक्तसबन्धेन समिद्यागीयफलाकाङ्क्षाविशिष्टत्वेनातिव्याप्तेश्च । न च प्रधानकथंभावेन तनूनपाद्यागीयफलवत्त्वावगमसमकालमेव समिद्यागस्यापि फलवत्त्वावगमेन फलाकाङ्क्षोपरमात्तदुत्तरकालीनतनूनपाद्यागीयकथंभावाकाङ्क्षायां न तद्वैशिष्ट्यमिति वाच्यम् । आलोकपरामर्शजन्यानुमितौ सामानाधिकरण्यसंबन्धेनातीतधूमपरामर्शवैशिष्ट्यस्येवोक्तसंबन्धेनातीतसमिद्यागीयफलाकाङ्क्षावैशिष्ट्यस्य तनूनपाद्यागीयकथंभावाकाङ्क्षायां सत्त्वे बाधकाभावात् ।

यदि तु धूमपरामर्शजन्यतावच्छेदककोटावुक्तदोषवारणाय स्वाव्यवहितोत्तरत्वसंबन्धस्यापि निवेशवदत्र समानकालीनत्वसंबन्धस्यापि निवेश इत्युच्यते ततो निर्णीततदनङ्गत्वेति व्यर्थम् । अङ्गकथंभावाकाङ्क्षायामुक्तसंबन्धेनातीतप्रधानफलाकाङ्क्षावैशिष्ट्यविरहेणातिव्याप्त्यभावात् । तस्य तद्वारकत्वेन त्वदभिप्रेतत्वात् । न द्वितीयः । अङ्गकथंभावाकाङ्क्षायाः प्रधानविनियोगस्वरूपयोग्यप्रकरणत्वेऽपि प्रधानफलाकाङ्क्षारूपसहकारिविरहात्, तनूनपाद्यागकथंभावाकाङ्क्षायाः समिद्यागविनियोजकप्रकरणत्वेऽपि समिद्यागफलाकाङ्क्षारूपसहकारिविरहादेवाङ्गत्वप्रसङ्गवारणोपपत्तौ फलाकाङ्क्षावैशिष्ट्यनिवेशस्य निर्णीततदनङ्गत्वानिवेशस्य च व्यर्थत्वात् । तदुभयानिवेशेऽपि प्रयाजादीनां

१ (अ० २ पा० ३ अ० ४ सू० ११)। २ संनिपातीति—संनिपत्योपकारकाङ्गमित्यर्थः ।

प्रोक्षणाद्यङ्गत्ववारणाय फलाकाङ्क्षायाः सहकारित्वकल्पनाया आवश्यकत्वादिति दिक् ।

एतस्य च प्रकरणस्याऽऽकाङ्क्षारूपत्वेन स्वतोऽप्रमाणत्वाद्वाक्यकल्पनाद्वारैव प्रामाण्यम् । तथा हि । प्रधानगतेतिकर्तव्यताकाङ्क्षया प्रयाजादिगतप्रयोजनाकाङ्क्षासहकृतया प्रयाजवाक्यस्य प्रधानवाक्यस्य च स्वस्वावान्तरवाक्यार्थसमाप्तस्यापि महावाक्यैकदेशत्वरूपपदत्वाक्रान्तस्य संनिधिरूपं वाक्यं कल्प्यते । उक्तपारिभाषिकपदानामपि स्वार्थोपस्थितिद्वारा तन्निष्ठाश्रुतपदान्तरकल्पनानुकूलयोग्यतारूपलिङ्गानुमानद्वारेतिकर्तव्यतात्ववाचीत्थमित्यादिगौणश्रुतिकल्पकत्वमिति परम्परया प्रकरणस्याङ्गत्वे प्रामाण्यम् । वाक्यैकवाक्यताकल्पनप्रकारश्च ‘ समिधो यजति, इत्थं दर्शपूर्णमासाभ्यां यजेत ’ इति । अत एव दर्शपूर्णमासप्रकरणाम्नातेन ‘ संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपेत् ’ इत्यनेन विहितवैमृधस्य प्रकरणाद्दर्शपूर्णमासोभयाङ्गत्वप्रसक्तौ वाक्यात्पौर्णमास्यङ्गत्वमित्युक्तं बलाबला[1]धिकरणे ।

(इति—प्रकरणनिरूपणम् ।)

====

॥ अथ स्थानं निरूप्यते ॥

सादेश्यं स्थानम् । तच्च द्विविधम् । अनुष्ठानसादेश्यं पाठसादेश्यं चेति । पाठसादेश्यं द्विविधम् । यथाक्रमपाठः संनिधिपाठश्चेति । पशुधर्माणामग्नीषोमीयपश्वङ्गत्वमनुष्ठानसादेश्यात् । तथा हि ‘ यो दीक्षितो यदग्नीषोमीयं पशुमालभेत ’ इति क्रयसंनिधावाम्नातस्याग्नीषोमीयपशोः ‘ स एष द्विदेवत्यः पशुरौपवसथ्येऽहन्यालब्धव्यः ’ इति वचनादौपवसथ्येऽहन्यनुष्ठानम् । तद्दिन एव च पशुधर्माः श्रूयन्ते । अतस्तेऽनुष्ठानसादेश्यात्पश्वङ्गम् । ज्योतिष्टोममहाप्रकरणसत्त्वेऽपि पशुधर्माणां सोमद्रव्यकज्योतिष्टोमाङ्गत्वायोग्यत्वात्तदनङ्गत्वम् । अत एवाऽऽनर्थक्यतदङ्गन्याये[2]न ज्योतिष्टोमाङ्गसर्वपश्वङ्गत्वप्रसक्तावपि स्थानेनोपसंहारन्यायेनाग्नीषोमीयमात्राङ्गत्वम् । पक्षान्तरे त्वतिदेशादेव तेषां प्राप्तिरिति सिद्धान्तः । ‘ इन्द्राग्नी रोचना दिवः ’ इत्यादीनां क्रमाम्नातानां याज्यानुवाक्यानाम् ‘ ऐन्द्राग्नमेकादशकपालं निर्वपेत् ’ ‘ वैश्वानरं द्वादशकपालं निर्वपेत् ’ इति क्रमाम्नातेष्वङ्गत्वं यथाक्रमपाठात् । नक्षत्रेष्टिसंनिधिपठितोपहोमाना नक्षत्रेष्ट्यङ्गत्वं संनिधिपाठात् । नक्षत्रेष्टेः प्राकृताङ्गनिराकाङ्क्षत्वेन प्रकरणादङ्गत्वायोगादिति प्राचीन-

---

१ (अ० ३ पा० ३ अ० ७) । २ (अ० ३ पा० १ अ० ९) अन्नयेनेति शेषः.

प्रवादः । स्व-स्वबोधकवाक्यान्यतरसमानदेशीयत्वसंबन्धेन किंचित्पदार्थविशिष्टत्वं स्थानमिति निष्कर्षः । उक्तसंबन्धेन तत्पदार्थविशिष्टत्वं तद्विनियोजकक्रम इति यावत् ।

एतेन—देशसमानत्वं प्राथम्यादिरूपसादृश्यमित्युक्तौ यथाक्रमपाठसंग्रहेऽपि, अभिन्नदेशतायामुपहोमाङ्गताप्रमाणभूतायामव्याप्तिः । अभिन्नत्वमित्युक्तौ तु सदृशदेशभूतायां यथाक्रमपाठरूपायामव्याप्तिरिति निरस्तम् । अन्यतमत्वादिना संबन्धानुगमसंभवेन संबन्धाननुगमस्यादोषतयोक्तनिरुक्तावव्याप्त्यसंभवात् । यथाक्रमपाठस्थले याज्यामन्त्राणामैन्द्राग्नादिषु, सांनाय्यसंनिधिपठितस्य, 'शुन्धध्वं दैव्याय कर्मणे' इति मन्त्रस्य सांनाय्ये च स्वबोधकवाक्यसमानदेशीयत्वसंबन्धेन वैशिष्ट्याभावादव्याप्तिरतः स्वेति । उपहोमबोधकवाक्यसमानदेशीयत्वसंबन्धेनोपहोमवैशिष्ट्यस्य संग्रहाय स्वबोधकवाक्येति । न च विकृत्युपहोमयोरेकदेशानुष्ठेयत्वेन स्वसमानदेशीयत्वसंबन्धेनोपहोमवैशिष्ट्यस्य विकृतौ क्रमत्वोपपत्तौ स्वबोधकवाक्यसमानदेशीयत्वस्यासंग्रहेऽप्यदोष इति वाच्यम् । विकृत्युपहोमयोरङ्गाङ्गित्वानवगतावुपहोमानां विश्वजिन्न्यायेन फलार्थत्वापत्त्या भिन्नदेशानुष्ठेयत्वापत्तेस्तयोरेकदेशानुष्ठेयत्वस्याङ्गताबोधोत्तरकालीनत्वेनाङ्गत्वप्रमाणत्वानुपपत्तेः । उपहोमबोधकवाक्यसमानदेशीयत्वस्यैवाङ्गत्वप्रमाणत्वावश्यकत्वेन संग्राह्यत्वात् ।

उक्तदेशीयत्वं च, उक्तदेशवृत्तित्वम् । तच्चानुष्ठेयत्वपठितत्वान्यतरसंबन्धेन । तेन पशुधर्मबोधकवाक्यसमानदेशानुष्ठेयत्वस्य, उपहोमबोधकवाक्यसमानदेशपठितत्वस्य च संग्रहः । उक्तसंबन्धेन समिद्यागवैशिष्ट्यस्य च तनूनपादादौ सत्त्वेऽपि वक्ष्यमाणरीत्या प्रकरणप्राबल्याद्दर्शपूर्णमासाङ्गत्वस्यैवावगतेर्न समिद्यागस्य तदङ्गत्वम् ।

नव्यास्तु—इतिकर्तव्यतात्वेनायोग्यसंबन्धयोर्वाक्यार्थयोः संनिधिः क्रमः । इतिकर्तव्यतात्वेनायोग्यत्वं च द्वेधा । क्वचित्तदाकाङ्क्षाविरहात् । यथा विकृतौ । क्वचिदव्यापारात्मकत्वात् । यथा, अनुमन्त्रणजपादिमन्त्रादौ । एकवाक्योपात्तव्रीहियागादिसंनिधेरपि क्रमत्वापत्तेर्वाक्यार्थेत्युक्तम् । प्रयाजाद्यङ्गवाक्यप्रधानवाक्यार्थयोः संनिधौ स्थानत्वापत्तिनिरासायाऽऽद्यं विशेषणम् । वाक्यार्थसंनिधेरुक्तत्वान्नानुष्ठानसादेश्यासंग्रह इत्याहुः । अत्रोपहोमवाक्यार्थस्य व्यापाररूपत्वेनेतिकर्तव्यतात्वेनान्वययोग्यत्वात्, अन्ययोस्तथाप्येतिकर्तव्यताकाङ्क्षयाऽपि तदन्वयानापत्तेस्तत्संनिधावव्याप्तेः । संनिधिपाठयथाक्रमपाठस्थलीयसंनिधित्वानिरुक्तेः, व्रीहियागसंनिधेः प्रयाजादिवाक्यप्रधानवाक्यार्थसंनिधेश्च सत्त्वेऽपि 'प्रधानेन व्यपदेशा भवन्ति' इति न्यायेन तदङ्गाङ्गिभावस्य श्रौतप्राकरणिकत्वव्यवहारोपपत्तेस्तद्वारकविशेषणद्वयवैयर्थ्यापाताच्चैतदुपेक्षितम् ।

---

१ (अ० ४ पा० ३ अ० ५) अत्रत्येनेति शेषः ।

केचित्तु–देशसामान्यमित्यस्य प्रधानाविपरिवृत्तिविशिष्टदेशवृत्तित्वमित्यर्थः। अतः सामान्यपदेन प्राथम्यादिसादृश्याविवक्षायामभिन्नदेशत्वासंग्रहः। अभेदविवक्षायां सदृशदेशत्वासंग्रह इति दूषणमनवकाशमित्याहुः। तन्न। देशे प्रधानाविपारिवृत्तिवैशिष्ट्यानिरुक्तेः। उपहोमदेशे दर्शपूर्णमासाविपरिवृत्तेरपि स्मृत्याद्यात्मिकायाः कदाचित्सत्त्वादुपहोमानां तदङ्गत्वापत्तेश्च। न च शास्त्रीयत्वं विपरिवृत्तौ विशेषणमतो नोक्तदोषः। दर्शपूर्णमासशास्त्रस्मृतिजन्यायाः शास्त्रीयदर्शपूर्णमासविपरिवृत्तेरपि तत्र संभवात्। न च प्रधानाविपरिवृत्तिविशिष्टदेशवृत्तित्वं स्वविनियोजकक्रमः। दर्शपूर्णमासयोरुपहोमप्रधानत्वाभावान्न दोष इति वाच्यम्। अङ्गत्वज्ञानजनकक्रमशरीरेऽङ्गतानिरूपकत्वरूपप्राधान्यनिवेशेऽन्योन्याश्रयप्रसङ्गात्। अतोऽस्मदुक्त एव सादेश्यनिष्कर्षो गरीयान्।

अयं च द्विविधोऽपि क्रमः प्रत्येकमुभयाकाङ्क्षयाऽन्यतराकाङ्क्षया च विनियोजक इत्यतः षड्विधः। तत्र प्रधानस्य विकृतित्वेऽनुष्ठानसादेश्यस्यान्यतराकाङ्क्षया विनियोजकत्वम्। यथा, उक्तपशुधर्मस्थलीयानुष्ठानसादेश्यस्य क्लृप्तोपकारप्राकृताङ्गनिराकाङ्क्षतया प्रधानस्याऽऽकाङ्क्षाभावात्। प्रधानस्य प्रकृत्यनिरूपकदर्विहोमादिरूपत्वे तु, अनुष्ठानसादेश्यस्योभयाकाङ्क्षया विनियोजकत्वम्। एवमैन्द्राग्नादिविकृतिक्रमपठितमन्त्राणामन्यतराकाङ्क्षासहकृतयथाक्रमपाठात्तदङ्गत्वम्। यद्यपि याज्यानुवाक्यामन्त्राणां लिङ्गविनियोज्यत्वेन यथाक्रमपाठस्य तत्रापूर्वविशेषसाधनत्वबोधकत्वमेव न तद्विनियोजकत्वम्। तथाऽपि विकृतिक्रमपठितलिङ्गाविनियोज्यजपादिमन्त्राणां यथाक्रमपाठ एवान्यतराकाङ्क्षासहकारेण विनियोजकोऽन्वेषणीयः। अत एव दर्विहोमाद्यङ्गभूतजपादिमन्त्राणां यथाक्रमपाठ एवोभयाकाङ्क्षया विनियोजकोदाहरणम्। एवमुपहोमीयविकृतिसंनिधिपाठोऽन्यतराकाङ्क्षासहकृतस्तदुदाहरणम्। शुन्धनमन्त्रस्य सांनाय्यपात्रप्रोक्षणे लिङ्गादेव विनियोगात्तस्य सांनाय्यसंनिधिपाठः साक्षादविनियोजकोऽपि, अपूर्वविशेषसाधनत्वोपस्थापकत्वेन विनियोगप्रयोजकत्वादुभयाकाङ्क्षासहकृतसंनिध्युदाहरणम्। न ह्यन्यदत्रोदाहरणं संभवति। प्रकृतित्वानिरूपकप्रधानसंनिधिपठितारादुपकारकस्य प्रकरणविनियोज्यत्वात्। अत्रान्यतराकाङ्क्षासहकृतक्रममात्रस्येतिकर्तव्यताकाङ्क्षोत्थापकतया प्रकरणाद्दुर्बलत्वं स्पष्टम्। उभयाकाङ्क्षासहकृतयथाक्रमपाठानुष्ठानसादेश्ययोर्विधिसंनिधिघटितप्रकरणाद्दुर्बलत्वमपि।

एवं विनियोजकप्रकरणसहकृतपाठसंनिधेस्तु स्वतोऽविनियोजकत्वादपि दुर्बलत्वम्। प्रकरणापेक्षया क्रमस्य दुर्बलत्वादेव चेष्टिपशुसोमयागात्मकराजसूयान्तर्गताभिषेचनीयसंनिधिसमाम्नातविदेवनादीनामन्यतराकाङ्क्षासहकृतसांनिधिपाठादभिषेचनीयमात्राङ्गत्वप्रसक्तौ राजसूयमहाप्रकरणाद्राजसूयाङ्गत्वमित्युक्तं बलाबलाधिकरणे। न च

१ (अ० ३ पा० ३ अ० ५)।

राजसूयस्यापि विकृतिसमुदायात्मकत्वेन प्राकृताङ्गैरेव निराकाङ्क्षत्वात्प्रकरणासंभवः। प्रत्येकजन्यपरमापूर्वाणां प्राकृताङ्गैर्नैराकङ्क्ष्येऽपि सर्वयागजन्यपरमापूर्वस्य साकाङ्क्षत्वेन तदनुकूलप्रत्येकपरमापूर्वनिष्ठयोग्यताजनकत्वेन प्रकरणग्राह्यत्वोपपत्तेः। न च सर्वयागजन्यैकपरमापूर्वे मानाभावः। दर्शपूर्णमासयोः समुदितसाधनताश्रवणस्य समुदायापूर्व इव सर्वयागसमुदायात्मकराजसूयत्वावच्छिन्नसाधनताश्रवणस्यैव तत्र मानत्वात्। तदनङ्गीकारेऽपि वा पवित्रादारभ्य क्षत्रस्य धृतिं यावदङ्गविधिषु 'राजसूयाय ह्येना उत्पुनाति' इत्यनेनोपक्रमात् 'राजसूयेनेजानः सर्वमायुरेति' इत्युपसंहाराद्वाचनिकाङ्क्षसंदर्शेन राजसूयत्वेन रूपेण सर्वेषामाकाङ्क्षाया उत्तेजनात्तत्प्रकरणोपपत्तेश्च। एवमन्यविधक्रमस्यापि प्राबल्यदौर्बल्ये, उदाहरणानि सुधीभिर्यथासंभवमूह्यानि।

(इति—स्थाननिरूपणम्।)

=====

॥ अथ समाख्या निरूप्यते ॥

समाख्या यौगिकः शब्द इति प्राञ्चः। परस्परार्थान्वयतात्पर्यकपदघटितयौगिकशब्दत्वं समाख्यात्वमिति तु निष्कर्षः। स्वघटकपदार्थनिरूपितस्वघटकपदार्थनिष्ठाङ्गत्वाबोधके द्वंद्वेऽतिव्याप्तिवारणाय घटितान्तम्। 'धेनुर्दक्षिणा' इत्यादिवाक्येऽतिव्याप्तिवारणाय यौगिकशब्देति।

अथ यौगिकत्वं नानेकपदघटितत्वम्। 'धेनुर्दक्षिणा' शुक्लो घट इत्यादिव्यस्तवाक्यसाधारणत्वात्। अत एव न विग्रहवत्त्वम्। स्वसमानार्थकवाक्यान्तरकत्वरूपस्य तस्य गौर्भूतिः, श्वेतः कलशः, इत्यादिवाक्यान्तरमादायोक्तव्यस्तवाक्येऽपि सत्त्वात्। न च स्वघटकपदघटितविग्रहकत्वस्य तत्त्वान्नोक्तदोषः। गौर्दक्षिणा, श्वेतो घट इत्यादिवाक्यमादायोक्तदोषात्। स्वघटकयावत्पदघटितविग्रहकत्वम्, आध्वर्यवमित्याद्यस्वपदविग्रहकसमाख्यास्वव्याप्तमिति चेन्न। आनुशासनिकानुपूर्वीकपदघटितत्वस्य प्रकृतं यौगिकत्वरूपत्वात्। कृदन्ततद्धिताद्यानुपूर्वी, आनुशासनिकीति न दोषः। अत्र यजेतेत्यादिपदश्रुतावतिव्याप्तिवारणाय सुबन्तत्वं परस्परार्थान्वयतात्पर्यकपदविशेषणं बोध्यम्। आध्वर्यवमित्यादौ सुबन्तादेव तद्धितोत्पत्तेः। होतृचमस इत्यादौ सुप्सुपेत्यनेन सुबन्तयोरेव समासविधानादस्ति सुबन्तपदघटितत्वम्। यजेतेत्यादौ न तदिति न दोषः।

वस्तुतस्तु—परस्परार्थान्वयतात्पर्यकपदघटितत्वे सति सुबन्तत्वं समाख्यात्वम्। 'कृत्तद्धितसमासाश्च' इत्यनेन कृदन्ततद्धितान्तसमासेषु प्रातिपदिकसंज्ञावगमात्तेषां सुप्प्रकृतित्वरूपसुबन्तत्वमिति लक्षणसमन्वयः। सुबन्तसोमादिपदे द्वंद्वे चातिव्याप्तेर्घटि-

---

१ पा० सू० (१-२-४६)।

सान्तम् । 'सोमेन यजेत' इति सुपिङ्घटितसमुदायेऽतिव्याप्तेः सुबन्तेति । 'अर्थवद्धातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेऽप्रत्ययपदस्य प्रत्ययतदन्तान्यपरतया सुपिङ्घटितसमुदायस्य प्रातिपदिकसंज्ञाभावेन तदुत्तरं सुपोऽनुत्पत्तेः । 'धेनुर्दक्षिणा' इत्यत्र दक्षिणाप्रातिपदिकस्य सुप्प्रकृतित्वेऽपि धेनुर्दक्षिणापदघटितसमुदायस्यातत्त्वान्नातिव्याप्तिरिति न तद्वारकतया यौगिकत्वनिवेश इति तत्त्वम् ।

सा च द्विविधा वैदिकी लौकिकी चेति । याजुर्वेदिकपदार्थेषु आध्वर्यवमिति । आर्ग्वेदिकेषु हौत्रमिति । सामवेदिकेषु औद्गात्रमिति । तथा होतृचमस इति पात्रविशेषे । पौरोडाशिकमिति दार्शपूर्णमासिकपदार्थेषु या समाख्या सा, आध्वर्यवमधीत इत्यादिवेदप्रयुक्तत्वाद्वैदिकी । सोमचमस इत्याद्या याज्ञिकप्रयुक्ता लौकिकी । अत्र विशेष्यविशेषणसंबन्धस्य सिद्धवन्निर्देशस्तदन्यथानुपपत्त्याऽवयवार्थसंबन्धबोधकं वाक्यमाकाङ्क्षायोग्यतादिबलेन कल्पयित्वा कर्तृत्वादिरूपः संबन्धः प्रतीयत इति सा विशेषणस्य विशेष्याङ्गतायां प्रमाणम् । उक्ताङ्गत्वस्य च प्रमाणान्तरागम्यत्वात्सामाख्यानिकत्वम् । अत एव यत्र वाक्यादिप्रमाणान्तरेण समाख्याघटकीभूतपदार्थस्याङ्गत्वावगमस्तत्र न सामाख्यानिको विनियोगः । यथा, 'निर्मन्थ्येनेष्टकाः पचन्ति' 'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति' इत्यादौ मन्थनप्रोक्षणादेः । तत्र मन्थमकर्मभूताग्नेः, प्रोक्षितोलूखलमुसलयोश्च विध्यन्वयेऽपि प्राप्ताप्राप्तविवेकेन मन्थनप्रोक्षणयोरेव विधितात्पर्येण विनियोगस्य वाक्यीयत्वात् । 'आध्वर्यवमधीते' इत्यादौ त्वध्वर्य्वादेर्विधितात्पर्यविषयत्वात्समाख्याविनियोज्यत्वमेव ।

अत्र च समाख्याघटकीभूतपदार्थयोः संसर्गविधादिना संबन्धे बुद्धे तन्निर्देशान्यथानुपपत्त्या न स्वतन्त्रो विधिः कल्प्यते । अध्वर्युणाऽन्वाधानादि कर्तव्यमिति, गौरवात् । अपि तु 'अध्वर्युं वृणीते' इत्यध्वर्युवाक्यस्यान्वाधानादिवाक्यस्य चैकवाक्यतासंपादकपदमात्रं 'यमध्वर्युं वृणीते सोऽग्नीनन्वादधाति' इति । तच्च द्वयोर्विध्योरेकबुद्धिस्थतारूपस्थानकल्पनां विना न संभवतीति कल्पयित्वा, अध्वर्य्वादेश्च व्यापारविषयतया इतिकर्तव्यतात्वं प्रकल्प्य तदाकाङ्क्षारूपप्रकरणकल्पनया द्वयोर्विध्योर्महावाक्यैकदेशत्वरूपपारिभाषिकपदत्वाक्रान्तयोः संनिधिरूपं वाक्यं कल्प्यते । ततश्चाध्वर्युनिष्ठयोग्यतारूपलिङ्गं प्रकल्प्यैकवाक्यतासंपादकपदरूपश्रुतिकल्पनात्समाख्याया विनियोजकत्वम् ।

अत एव पञ्चान्तरितप्रामाण्यकत्वेन समाख्यायाश्चतुरन्तरितप्रामाण्यकस्थानापेक्षया दुर्बलत्वम् । अत एव पौराडाशिकसमाख्याते काण्डे समाम्नातस्य 'शुन्धध्वम्' इति मन्त्रस्य समाख्यया पुरोडाशसाध्याग्नेयादियागीयपात्रप्रोक्षणाङ्गत्वे प्रसक्ते सांनाय्यसंनि-

---

पा० सू० (१-२-४५) ।

समाख्यास्थानात्समाख्यायाः प्राबल्यमित्युक्तं बलाबलाधिकरणे। यद्यप्यत्र लिङ्गस्य विनियोजकत्वेन स्थानसमाख्ययोरपूर्वविशेषसाधनत्वबोधकत्वमेव, तथाऽपि विनियोगप्रमाणसहकारित्वादुदाहरणत्वोपपत्तिः। तयोरेव विनियोजकत्वोदाहरणं तु मृग्यमित्यनवद्यं श्रुत्यादिप्रमाणकमङ्गत्वम्।

(इति—समाख्यानिरूपणम्)।

श्रीजैमिनीयाभिमताङ्गताया-
स्तत्तन्निबन्धेष्वपि तन्निबन्धे।
अनुग्रहं सुग्रहमत्र कर्तुं
मुरारिरेतामकरोन्निरुक्तिम्॥

मुरारिनिर्मिता न्यायमीमांसावासितात्मनाम्।
तोषाय विदुषामेषा कण्ठभूषा प्रकल्प्यताम्॥

इति श्रीमन्न्यायमीमांसापारावारपारीणमुरारिमिश्रविरचिताङ्गत्वनिरुक्तौ षट्प्रमाणकमङ्गत्वनिरूपणं संपूर्णम्।

समाप्ता चाङ्गत्वनिरुक्तिः।

---

*(अ० १ पा० ३ अ० ७)।

॥ द्वितीयभागस्थपूर्वमीमांसासूत्रादीनां सूचीपत्रम् ॥

द्वितीयभागस्थपूर्वमीमांसासूत्राणां—वर्णानुक्रमसूचीपत्रम् ।

समाप्तं च सूत्रवर्णानुक्रमसूचीपत्रम् ।

द्वितीयभागस्थतन्त्रवार्तिकान्तर्गतश्लोकानां वर्णानुक्रमसूचीपत्रम् ।

समाप्ता च तन्त्रवार्तिकस्थश्लोकवर्णानुक्रमणिका ।

आहत्य द्वितीयभागे तन्त्रवार्तिकस्थाः श्लोकाः—१००४

आहत्य भागद्वये च श्लोकाः—२४२५

सतन्त्रवार्तिकशाबरभाष्यसहितमीमांसादर्शने

शुद्धिपत्रम् ।

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४६२	६	ततो न	ततोऽने
४६३	७	तम्प	तम्य
	१०	च्छ्रयेत	च्छ्रयेत
	१९	तव्याऽपू	तव्यापू
४६४	१	शिष्टापू	शिष्टाऽपू
४७२	१९	वृत्य बि	वृत्तरवि
	१९	मन्यसे	मन्यते
४७३	१३	क्षलण	लक्षण,
४७४	३	वा यं	वा य
	२६	पौर्णभा	पौर्णमा
४७५	७	एके	एक
	२७	साम्यं	साम्यं
४७६	२८	यागाभ्यां	यादृग्भ्यां
४८१	११	पौर्ण—यजेत—	पौर्ण—यजेत '
४९३	२९	भविष्यति । कथं	—भविष्यति, कथं
४९५	१८	नोपाशु	नोपांशु
४९७	३	जुहोति	जुहोति
४९८	२७	पदे.—	पदो—
४९९	८	धातुंय	धातुं य
	२३	कथंमा	कथंमा
	२४	त्स्या	त्स्यात्,
	२५	धातुभ	धातुम
५००	१६	अध्वर' इत्याधारमिति—	अध्वर इत्याधारम्' इति

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
	३०	न्याय	न्यायः
५०१	४	विधाने ।	विधाने
	११	नत्बा	नत्वा
	२९	सवं	संब
५०२	१३	बिधि	विधि
	२७	श्राल	श्राऽऽल
	२८	यवा	यत्वा
५०३	२०	दिश्येतै	दिश्येत
५०४	३०	(अ.२पा. अ.३सू.६) ।	
५०५	२	वाचेत	वोचत
	२१	स्यान्तवान्तर—	स्यावान्तर
	२८	त्वात् ।	त्वात्
५०६	९	गतम् ।	गतम्
५०७	१०	होति इति'	होति' इति
५०८	४	येते	येते ।
५०९	२२	१ (तै०	१ तै०
	२५	त्वात् ।	त्वात्
५१०	२	गृह्णात्येव—	गृह्णाति, इत्येव
	३	लैम	लैम
	८	बन्घा	बन्धा
५११	६	दैध्व	दैव
	९	ततश्च ।	ततश्च
	१४	देवतां	देवता
	२५	नास्मा	नास्म

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
	,,	कत्वे—	कत्वे
	२१	तुल्या।	तुल्या।
	,,	द्यते	द्यते ।
	२९	स्याति	स्यानि
	,,	ष्टोम	ष्टोमो
५१२	२	तत्स्मा	तम्मा
	५	रंन्ति	रन्ति
	१३	न्देव	न्देवता
५१६	१	त्वयत्	त्वन्यत्
	२३	गृहीत्वा	गृहीतत्वा
५१७	२	न्नः	न्न
	८	वाषु	वायु
५२०	६	एष	एव
	८	त्पन्नैःस्त	पन्नैस्त
५२५	२७	रूपा	रूपो
५२६	१२	स्तूपरा	स्तूपरा[२]
	२९	योगो	यागा
५२८	२२	संनिधौ	संनिधौ[४]
५२९	१७	त्ताद्द	ताद्द
५३०	१९	मव	मेव
५३१	२	प्रमाणा	प्रमाणा[१]
	४	प्रमाणा	प्रमाणा
५३३	२९	अस्य शब्दा—	अस्यशब्दा
५३४	१८	तार्हि	तार्हि ।
५३५	४	तार्हि	तार्हि ।
	९	अस्य पदार्थे—	अस्यपदार्थे
५३६	२०	देवतासं	देवता सं
५४०	७	र्गयाव	स्वर्गयाव

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
	११	याद	यदि
	१६	स्थाष	स्थाप
५४१	२	कुतः	कुतः ।
	१६	षेक्षि	पेक्षि
५४२	२	व्रीह्लादि	व्रीह्यादि
	१७	स्थिम्	स्थितम्
५४३	२९	द्रव्यम	द्रव्यम्
५४५	१३	फलत्वम्	फलत्वम् ।
	२०	फलमिति । न्या—	फलामिति न्या
	२८	अनैकान्तिकीं क—	अनैकान्तिकीक
५४९	१०	र्भति	र्भवति
	१८	शात्रे	शात्र
५५२	६	किंमु ।	किम्
	११	ष्टोमं	ष्टोमः
	१२	विधाय ’	विधाय
	२०	कृत्वा श	कृत्वाश
५५६	९	कृत्वा श	कृत्वाश
५५८	१९	श्रूयते ।	श्रूयते
५६०	२८	मिति । स्व	मिति स्व
५६१	८	तार्हि	तार्हि,
५६४	२३	समा	साम
५६६	१८	च्यते	च्यते—
	२८	नियतं	निधनं
५६७	१२	मवे	मवे
	२३	च्यते	च्यते ।
	२७	नाम	साम
५६८	१	हामेः	होमः
	७	।किं च	किं च ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
	२२	चान्य	चान्यत्र
५६९	११	विमा—	विभा—
	१५	यते त	यते । त
५७०	१	अ० १४	अ० १
	३	[१४]	[१]
	२३	पृष्ट	पृष्ठ
	३०	ध्याये	ध्याये
५७१	१	अ० १४	अ० १
	१९	मिति 'त	मिति' । त
५७२	१	अ० १४	अ० १
	२	श्रृक्रा	शुक्रा
५७३	१	अ० १४	अ० १
	२९	यदि श	यदिश
५७४	१	अ० १४	अ० १
	२३	प्यें	प्ये
	२७	च्चिति । पा—	च्चिति, इति पा
५७५	१	अ० १४	अ० १
	२२	भाष्ये	भाष्यं
	२४	र्थम् । 'अ—	र्थम् 'अ
	२६	इत्यस्यसू	इत्येतत्सु
५७६	१	अ० १४	अ० १
५७७	१०	क्षेणं	क्षणं
	१८	न्निम	न्निमि
	२०	दृष्ट	दृष्ट—
	२३	रवे	रेव
	२४	रोति	रोति ।
	२७	सर्थ	सर्व
५७८	३	अवे	अवे
	२१	देहः	देहः ।
	२२	ध्यथा	ध्यस्था
	२४	वक्या	वाक्या
५७९	३	ण्येवं जा	ण्येवंजा
	१६	कर्तृकं	कर्तृक
	१८	द्वावेवेव	द्वावेव
५८०	१०	मेघि	मेघि
५८२	१९	ष्टमं्	ष्टम्
५८३	१	यदि	यदि—
५८४	१५	बर्त	वर्त
	१७	णैव—	णैव
५८५	२१	त्यत अत आ—	त्यत आ
५८६	८	षितंच	षितं च
	१२	बाच्य	वाच्य
	२६	प्रमाणा	प्रमाण
५८७	३	चारेध्य	चारेभ्य
५८८	१७	यदि श	यदिश
५८९	२४	बिधि	बिधि
५९१	१२	त्याह—	त्याह ।
	२४	द्योपाद्य	द्योत्पाद्य
५९३	१८	विधिः	विधिः ।
५९४	२०	नैषदो	नैष दो
५९६	२५	रिवं	रिव
	२८	त्वादाक्ष	त्वाद्दाक्षा
५९९	१५	मिद्ये	मिद्ये
६०१	२६	न्यस्तं	न्यस्त
६०२	१७	सत्स	तत्स
६०४	२	संकारः	संस्कारः
६०५	२८	विध्य	विध्य
६०७	५	न्द्रस्यैवेन्द्र	न्द्रस्येवेन्द्र

पुंटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
६१४	१६	एब	एव
६२०	८	न प्येक	नाप्येक
६२३	३	यावज्जीं	यावज्जी
६२४	२३	यथा	याथ।
६२९	२९	लिङ्बहर्शन्नाच्च—	
			लिङ्गदर्शनाच्च
६३०	१३	वालः	काल:
६३२	२१	णान्तप्रद्	णान्तरप्रद्
६३४	१०	सांनायि	सांनाय्यि
	१०	सांनायि	सांनाय्यि
६३६	१९	यजेत्	यजेत
६४०	९	तर्हि	तर्हि
६४१	२९	प्यन्ते	प्यन्ते ।
६४९	२८	शड्क नी	शंड्कनी
६४६	२०	मेदी सद्धि	मेदसिद्धि
६४७	१९	प्रदर्श ,	प्रदर्श—
६४८	२३	क्षया अत	क्षायामत
६५५	२	स्पर्शाभि	स्पर्शादिभि
६५९	२९	कृत्यन्वितत्वं—	
			कृतिकारकत्वं
६६०	२६	याग.	याग—
६६३	१	६६	६६३
६६३	२३	नत्र	तत्र
	३०	यस्योत	यस्येति
६६५	२०	वाक्या	वाक्यां
६६८	१८	वा य	वा यः
६६९	२७	द्धयन्थ	च्चन्य
	२८	रंपक्ष	रपेक्षं
६७१	११	रारम्मः	रारम्भः ।
६७२	२८	अथर्ने	अर्थेन

पुंटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
६७४	१९	यनऽम	यनम
६७९	६	दुपद्ये	दुपपद्ये
६८०	११	धर्म	धर्म
६८४	६	शक्ति	शक्ति—
	१०	त्यर्त्थे	त्यर्थे
	११	त्याय्यते	त्याय्यते ।
६८५	२४	नाम श	नामश
६८८	२२	नियमो	नियमो
	२३	देवेति, ।	देवेति ।
	२८	.........—	
			१ सममिति क्वचिन्नास्ति
	,,	(१ अ० ६—	
			२ (अ० ६
	,,	............—	
			३(अ०४पा०१अ०९)
६९३	७	प्ररिच्छि	परिच्छि—
	११	नान्थे	नान्ये
६९४	१३	ब्रिरु	विरु
६९५	१४	दानीसि	दानीं सि
६९६	९	हाथ	हाय
६९७	१६	जनांदि	जनादि
	२१	यथैव	यथैव
६९७	२१	क्रयार्या	क्रयार्था
६९८	१६	गुणं	गुणं
	,,	पूर्वं	पूर्वं
६९९	१८	न्यथार्थे	न्यथार्थे
७००	३	त्रिध्य	विध्य
७०६	६	सज्ज्य	सज्य
७०७	९	षन्माबाना	षन्मावना
	२६	मध्ये	मध्ये

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
	२८	प्रहश्च	प्रहश्च
७०८	२७	सज्ज्य	सज्य
७१०	६	सज्ज्य	सज्य
७१२	१८	सज्ज्ये	सज्ये
	२२	तयैवे	तयैवे
	२७	विध्यु	विध्यु
७१३	२२	करणेः	करणे
	२३	कार्य	कार्य
७१४	२८	प्येवत्वं	प्येकत्वं
७१६	१०	परौ	परो
७२०	२	तेथां	तथा
	२८	वकैस्य	वैकस्य
७२२	२९	वत्वात्	वत्वात्
७३०	२३	ममित्ये	ममित्ये
	२९	प्रयाजैः	प्रयाजैः ।
७३१	१४	एकं	एवं
	१८	कर्तृ	कर्तृ
	२९	व्यक्ते	व्यक्तेः
	३०	लाथ	लाघ
७३७	१२	सत्यम् ।	सत्यम्,
	२१	गम्या	गम्या
७३८	२९	पन्ययां	पन्यया
	२६	वार्त्रघ्नी यु	वार्त्रघ्नीयु
	२७	वधे	वृधे
	,,	वावचो	वचो
७३९	२६	प्रयोगः	प्रयोगः,
७४०	११	मिमौ संस्काराविमिमे	संस्कारा इ
७४१	१७	तस्याप्यु	तस्याप्यु
७४४	१४	देवन—	देवना—

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
	२३	येंय	येंय
	१०	श्लोक;	श्लोकपूर
७४५	१३	दाभि	दामि
७४७	२	वाटि	वाति
	१४	दस्यं	दस्य
७५४	२७	गुणोः	गुणो
७५५	३	द्रौणममिदभि—	द्रौणमिदमभि
७५९	१८	पेक्षाना	पेक्षा ना
७६६	७	तयाः	तया
७७१	२२	सवोर्थत्वे	सर्वार्थत्वे
	३७	सब	संब
७७३	९	सबाधो	संबाधे
७७४	१३	हत्य	हृत्य
	,,	न—नस्यात्ततस्तद्प्यनेनैव	
७७५	८	वाधे	बाधे
७७६	४	रुद्धय	रुध्य
	२०	वाक्थ	वाक्य
	२४	क्त्ययामि	क्त्यमि
७७७	१७	यत्रं	यत्र
	१८	रंयि	रयि
७७८	२९	द्भिन्ने	तद्भिन्ने
७७९	१७	गुंर्वा	गुर्वां
७८०	१	धयि	धीय
	२	चैवं लि	चैवंलि
	१९	चैवं लि	चैवंलि
७८२	१८	इत्ये व	इत्येव
७८५	१७	प्रान	प्राना
७८६	२९	......	(इति-तृप्तिप्रकाशकमन्त्रस्य भक्षमन्त्रैकवाक्यताधिकरणम् ॥ १० ॥)

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
७८८	२४	ऊहस्थ	ऊहस्य
७९१	१९	स्याऽऽटः	स्याऽऽङः
७९६	२३	मप्येर्न्नदृष्टथिमेवति—	मप्यग्नेर्दृष्टार्थमेवेति
	२९	चे ािदेत	चोदिते
७९७	१४	र्थम्य	र्थस्य
	२७	कल्पेनन	कल्पनेन
७९९	४	ऐद्राग्ने	एन्द्राग्ने
७९९	८	मिन्द्रण	मिन्द्रेण
	१८	कथ्थते	कथ्यते
८००	४	पीत	पीत
८०१	९	च्छन्दो	छन्दो
	१३	थदु	यदु
८०४	२८	पर्य	पर्या
८०८	९	ब्रयी	त्रयी
८१०	४	स गुणः	सगुणः
	२१	वैंदि	वेंदि
८१२	३	पूवे	पूर्वे
	४	अग्नि	अग्नी
	२६	सामवदेयरोपि—	सामवेदयोरपि
	२८	देना	दिना
८१३	२६	वदेयारेपी	वेदयोरपी
८२१	२०	निष्पन्नः	निष्पन्नः
८२३	१	अ० १७	अ० ७
८२४	१	अ० १७	अ० ७
८२६	२१	ख्यानवि	ख्यानां वि
८३०	११	त्वनि	त्वविनि
	२४	शक्क्नो	शक्नो
८३१	१४	प्रागमाविना	प्राग्माविना
	१७	देशं चिरेण प्राप्तिर्म—	देशश्चिरेण प्राप्तो म
८३२	१९	त्वार्थे प्र	त्वर्थप्र
८३३	१९	शेषत्वनि	शेषत्वं नि
	२९	पातित्वे	पातित्वेन
	,,	त्पुरता	त्पुरस्त
८३४	२०	श्च या	ततश्च या
८३५	१४	ज्ञान सं	ज्ञानसं
	१९	नोदपा	नोपपा
८३७	३	पदस्यैव	पदकस्यैव
	९	मनोताग्नी—	मनोता, अग्नी
	१४	इत्यु	इत्युं
८३९	१३	धारय'	धारयेति
	१४	कुर्यादि	कुर्यात्' इ
८४०	७	समय	समवाय
	१४	पौर्वापर्यावि—	पौर्वापर्यवि
	२६	सत्तरे	सत्तेर
८४१	१२	पुनरस्य	पुनरत्र
	२२	स्तेपा क्रम—	स्तेषां गुणः क्रम
८४२	१८	तस्य	तस्य
	१९	निश्चितः	निश्चयः
	,,	त्यविरोधेऽप्र—	त्यविरोधेऽप्यप्र
	२३	विंचि	किंचि
८४३	२२	तथा च कृते—	तथा कृते
८४४	२२	गुणमभिवदति	क्रिया—

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
			गुणमिन्द्रातिक्रिया
८४९	२९	लामो वि	लाभाद्वि
	२९	किं च	किं च-
८४८	१६	घारणे	घारणे
	२४	भिति	मिति
	२९	तावाल्लि ङ्ग-	तावाल्लिङ्ग
८५०	१९	सदि	सीद
७५१	३०	वर्नव्य	कर्तव्य
८५२	१५	अह	आह
८५६	९	रत्रर्थ	रत्रार्थ
७५७	१	न च	च
	२३	नामांय्य	सांनाय्य
८५९	२४	बघ	बाघ
	२७	तृष्णादि	तृष्णादि-
७६३	१७	तोक्थ्यासंस्था—	तोक्थ्यादिसंस्था
८६४	१५	संबन्ध प्रसज्यत एव इति	संबन्ध एव प्रसज्यत इति
८६५	३	युक्तं चोदना—	युक्तं चाचोदना
	६	कुलायादि	कुलायादिं
	११	अन्यत्तु तत्,—	अन्यत्त्वेतत्
	१६	वक्या	वाक्या
८६७	१६	त्युत्कृष्ये—	त्युत्कृष्यते ।
	२५	इिति नै	इति । नै
८७०	१५	वाक्य भेदः—	वाक्यभेदः
	२५	त्वात्' ।	त्वात्'
८७१	८	वद्वाद्धि	वाद्धि

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
८७३	२२	संस्थाना	संस्थानां
	२५	मस्याभि	मस्यामि
८७४	१२	व्यथैव	व्यर्थैव
८७८	८	तस्माऽज्ज्यो—	तस्माज्ज्यो
८८१	२३	भाष्यत्य	भाष्यस्य
	२८	प्राति	प्राप्ति
८८३	८	सौमापौष्णे एकादश· कपाले.	सोमापौष्ण एकादश· कपालः,
	११	धार्कण	र्धाकरणे
८८६	१६	सौमा	सोमा
	२०	सौमा	सोमा
	२३	सौमा	सोमा
	,,	सौमा	सोमा
	२५	सौमा	सोमा
८८८	६	योगे	यागे
८९०	१	अ. पा.	अ० ३पा०
८९३	२	भष्याति	भविष्यति
८९५	१३	त्रिण्यधि	त्रीण्यधि
८९६	९	पुवर	पुनर
	२४	पौर्ण	पूर्ण
८९७	२५	प्रपक्त	प्रसक्त
८९९	३	दग्वं	दग्धं
	२९	शब्दोः	शब्दो
९००	१	तरमा	तस्मा
	२८	पौर्ण	पूर्ण
९०२	,,	अ० पा०—	अ० ३पा०
	२०	र्थस्थ	र्थस्य
९०४	७	शक्नेति	शक्नोति
	२६	मव	भव

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
९०६	५	बुद्दि	बुद्धि
९०७	१३	काङ्क्षा	काङ्क्षा
	२३	का ण	कार्येण
९०८	२८	रमृतेः	स्मृते
९ ९	७	पौर्ण	पूर्ण
	१५	पौर्ण	पूर्ण
९१०	१	तत्संस्का	संस्का
	४	पौर्ण	पूर्ण
	५	पैार्ण	पूर्ण
	६	पौर्ण	पूर्ण
	१७	तारेप्य	तोरप्य
	१९	पौर्ण	पूर्ण
९११	२३	सत्यत्य	सत्यम्य
	२५	पौर्ण	पूर्ण
९१२	७	रायं	राय
	८	पौर्ण	पूर्ण
	१५	पौर्ण	पूर्ण
	१८	पौर्ण	पूर्ण
९१३	८	प्युन	प्युत्त
९१४	३	दशक्कोति	दशक्तोति
९१५	२८	रवभा	स्वभा
९१६	१५	प्रथमं तावद	प्रथम तरम
९१७	७	व्यापर	व्यापार
	१०	धातु	धातु
	१३	प्यन्प	प्यन्त
९१८	७	दोष	दोषः
	१०	धातुम्य	धातुभ्या
	१७	हित	हित-
९१९	६	तम्मा	तस्म
९२२	१	भृत	भूत
	२१	घस्य–	घस्य ।
	२४	रोधो ।	रोधो–
९२४	१	ना	ननु
९२५	१८	प्वपिः	प्वपि
	२२	वाः भ	वा भ
९२७	२१	ष्यत्वे	ष्यत्वेन
	२५	न्यतेऽसि	न्यतोऽसि
९२८	९	र्गनक	र्गमक
९२९	१०	क्तिभि	क्तिभिः
९३१	३	प्रत्य–	प्रत्यक्षम् ।
	७	विण्णु	विष्णु
९३२	२७	तिडा	तिङा
	२८	तिड्	तिङ्
९३३	१	विप रू	विषयरू
	२८	सारूया	सारूप्या
९३६	१६	प्रपक्तौ	प्रसक्तौ
	२६	शेष	शेषे
९४३	९	स्वााम	स्वसाम
	१२	समख्या	समाख्या
	२४	निषेध्य	न्निषेध्य
९४४	१	वत्पूरु	वत्पुरु
९४४	११	तेति	तेति ।
९४५	१३	षनु	षनु
	१४	पुरा	पुरुष
	१६	षवर्म	षधर्म
	१७	कुनः	कुतः
	२४	एा	एषा
९४६	१८	क म	काम
	२३	वदो	पदो

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
९४८	२६	सत्या	सृत्या
९४९	३	रहरयो	साहस्यो
९५२	१	इयु	इत्यु
	७	शेपात्	शेषात्
	१४	वर्य	चर्य
	२२	प्रप्तवु	प्राप्तावु
९५३	९	वमित	वमिति
९५५	२१	शेपत्वा	शेषत्वा
	२९	द्वासा	द्वासा भवेच्च
९५७	१	र्युणाऽप	र्युणाऽपि
	११	त्त्विष्ट	त्त्विष्टि
९५८	४	दोपसँ	दोषसं
	१६	मान्यनै	मान्येनै
	२५	दोपस्य	दोषस्य
	२६	वापूतु	वात्पुरु
	२८	निर्वा	निर्घा
९५९	२४	गृह्णती	गृह्णाती
	२६	व्यापार	व्यापारा
९६०	२९	इत्यादि वि—	इत्यादिवि
९६१	१६	क्रीत्वां	क्रीत्वा
	२९	दिवेति	दिनेति
९६३	६	पेत् । इ	पेत्, इ
९६४	१७	स्तुय	स्तुत्य
९६५	२१	व्यापारोः	व्यापारो
९६६	१०	शक्नेति	शक्नोति
	२७	प्रतिं	प्रति
	३०	विरुध्यते	न विरध्यते
९६८	६	ह्लोक	ह्लोक
	३०	रुक्त्य परि—	रुक्त्यपरि
	३१	विभ्रात	विभ्रातृ
९६९	२१	त्युमौ	त्युभौ
	२३	तकर्तृ	तत्कर्तृ
	२४	नाम	जामि
९७२	१७	स्वामि	स्वामि
	२५	तदभ्रे	तद्भ्रे
	२७	मवित	भवित
९७४	१०	गयम्ते	गम्यते
	२६	हविष	हविषः
९७९	६	दूव्यव	द्व्यव
	११	पूर्वा	पूर्वा
९८१	१२	भाचार	माचार
९८२	४	हर्वा	हर्वी
९८३	२	द्युम	द्युग
	६	दोपा	दोषा
९८४	२७	रत्रम	रक्रम
९८५	२६	भाव्य	माष्य
९८६	११	पूंर्ण	पूर्ण
	१५	एव । श्रु	एवाश्रु
९८७	१४	पंकांर	पकार
९८९	१५	श्रृय	श्रूय
९९०	७	पगमा	परामा
	२२	दृष्टों थ	दृष्टार्थ
	२९	चतुर्ध्नु	चतुर्ध्रु
९९२	६	संबद्धं,	संबद्धं, चतुरवत्तं जुहोतीति वचनात् ।
९९३	१८	अक्त	अवत्त
	२५	वर्यवर	वयवस्या
	२९	रणा धा	रणाभिधा
९९४	११	सोत्रामणी	सौत्रामर्णि

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
	१८	कार्या	कार्या
९९६	१९	स्वंन्धो	संबन्धो
९९७	१	करय	कस्य
	८	रणतः	रणः
	१६	त्सवृद्ध	त्सकृद्ध
	२२	संरकार	संस्कार
	२६	क्ष्यन	क्ष्यन्
९९८	१	वचस्या	वचनस्या
	१८	प्राप्त्यापेक्ष—	प्राप्त्यपेक्ष
	२०	हेम	होम
९९९	२६	आदना	अदना
१०००	३	सम । च	सम'च
	१३	मक्ष नि	मक्षनि
	,,	सैपा	सैषा
	१९	न चान्याद—	न चान्यद
१००३	२०	त्यण् प्र	त्यणप्र
१००४	२१	ससब्र	ससुब्र
१००२	७	यंदा	यदा
	१८	यथा चम	यथाचम
१००६	२	तरमा	तस्मा
१००८	३३	पठितंवावयवादि—	पठितवाक्यवादि
१००९	१६	च्छन्त	च्छन्तः
१०१२	२०	नेतिः	नेति
१०१३	६	मयाऽधर्म्	मयाऽर्धम्
१०१६	५	बिमक्ष	बिमक्ष
१०१७	१७	मक्ष	मक्ष
	१८	मिरे	गिरे
१०१९	१९	वालम्वने	वावलम्बते
१०२८	१	वेवद्ध	वेतद्ध
	१२	मिर	निर
	१३	रवगो	स्वगो
१०३४	२२	गामिणः	गामिनः
१०४२	१४	पूवश्च	पूर्वैश्च
	२८	सवनी	सवनीय
१०४४	९	मवन्धु	मवधु
	१७	षशू	पशू
१०४७	१४	मुत्त	मुक्त
	१९	वल्प्ये	कल्प्ये
१०४९	२०	नान्त—	नानन्त—
	२४	प्रात स	प्रातः स
१०५०	२०	दोमेऽ	भेदोऽ
१०५३	२९	न्ते । त	न्तेत
१०५५	१८	र्धमे	र्धर्म
१०५६	१६	विभ	बिभ
१०५७	९	र्नित्य	निर्य
	१९	क्ति	रिक्ते
१०५८	१७	क्रर्त	कर्त
१०६०	१	यत्रे	यते
	१०	सर्वम्या	सर्वस्या
	२६	वथ्या	वथ्या
१०६२	५	रतः	स्तः
	,,	रतोत्र	स्तोत्र
	२३	स्द्धिव	सिद्धव
१०६४	७	मम्यु	मभ्यु
	१६	मिते	मिति
१०६९	९	संस्था—	संस्था
१०६६	९	एवं	एव
	१४	द्रह	द्रुह
	१९	वथ्ये	वध्ये

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१०६७	१३	मारा	भारा	११०९	९	कल	कल्प
१०६८	२	मम्य	गम्य	११०९	२३	॥ २३ ॥	॥ २२ ॥
	१७	रवग	स्वग		२४	योग इ	योगः' इ
१०६९	२४	प्टोम	ष्टोम	१११०	१९	रुयात	रुयातः
१०७०	२७	मेताञ्	मेतान्	११११	७	तयव	तयैव
१०७३	३	स्वामि	स्वामि	१११९	१९	स्यु.	स्युः
१०७९	७	उयत्ते	उच्यते	१११६	२०	तपासि	तपांसि
१०७७	१९	वर्तृ	कर्तृ	११२०	८	किं त,	किं ते,
१०८०	२	त्सत्रार्थ	त्सवार्थं	११२१	२३	बूया	ब्रूया
१०८६	२६	तंत्रे—	तत्रे—	११२९	८	र्येवंसं	र्येवसं
१०९०	२८	३ (अ०	४ (अ०	११२७	३२	हिय	ह्रिय
१०९२	१६	उत्पत्तौ त—	उत्पत्तौ तु	११२८	१४	षेषुं	षेषु
	१९	स्वामि	स्वामि	११२९	१९	णाध्व	णाध्व
१०९४	२३	र्वर्तते	वर्तते	११३२	१६	ध्वयोर्य	ध्वर्योर्य
१०९९	१९	रतोतुंम	स्तोतुम	,,	६	विकृतापू	विकृतावपू
१०९८	२६	अध्युं	अध्वर्यु	११३३	२०	मतत्	मेतत्
	२८	मैत्र	मैत्रा	११३४	४	पेक्ष्य	पेक्ष्य—
१०९९	२४	सुत्रे	स्तुत्रे	,,	२४	पशु रो	पशुपुरो
	२९	कपाले	कपालो	११३९	४	तिप	तिप—
११००	१९	मृत्वि	मृत्वि	११३८	२६	तत्रैवं	तत्रैव
११०१	१४	ऋत्विक्त्व	ऋत्विक्त्व	११३९	२४	महण	ग्रहण

सूत्रसूच्यां शुद्धिपत्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२	८	यस्तू	यस्तू	६	२६	मुञ्च	मुञ्च
५	२०	कृतापू	कृतावपू	८	२९	स्वाभि	स्वामि
५	२१	छेत्	छेत				

अङ्गत्वनिरुक्तिशुद्धिपत्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम् ।
११४३	४	त्वावच्छेदकदर्श	—त्वाद्दर्श
,,	८	पात्तिः नाहि	पत्तिः । न हि
,,	२६	कर्तुश्च, क कर्तृत्वेन क	र्तृश्च तृत्वेन,
११४६	१४	कृतत्व	कृतत्व,
,,	२८	दिरूा	दिरूप
११४७	३	देशप	देशप्र
,,	९	कृत्यान्व तत्वम्	कृत्यन्वि तत्वम्
११४७	१९	काङ्क्ष	काङ्क्ष
११४८	....	१४४८	११४८
११४९	....	१४४९	११४९
,,	५	त्वस्ये-	त्वस्यो
,,	६	द्विश्य	द्वेश्य
,,	१९	तदन्त	तदनन्त
११५०	,,	१४५०	११५०
,,	१०	काग्क	कारक
,,	३०	१(अ०८	१(अ०७
११५१	,,	१४५१	११५१
११५२	,,	१४५२	११५२

पृष्ठे	पङ्क्तौ	अशुद्धम्
११५७	२	राङ्केक
,,	३	स्यैवोद्दे
११६०	३	च्छेद्
११६५	२०	मानं
११६८	१६	कर्तृत्वा
,,	२८	कर्म
११६९	२	मत्रा
११७०	१५	रवः–
११७१	८	धारणे
११७२	७	त्परया
११७६	२८	वाह्व
११७७	२०	ण्यावः
११७८	१४	मर्सित
११७९	२५	दध्न
११८०	३१	णां दौ
११८१	३	घटक
११८८	२१	प्रकृत
११८९	१	वदं
,,	७	होत:
,,	१५	मन्थम

इत्यङ्गत्वनिरुक्तिशुद्धिपत्रम् ।